तिनाम्नः कन्॥अजिनांतस्योत्तरपदलोपश्च॥ठाजादावूर्ध्वंद्वि
तीयादचः॥शेवलसुपरिविशालवरुणार्यमादीनांतृतीयात्
४ ॥अल्पे॥ह्रस्वे॥संज्ञायांकन्॥कुटीशमीशुंडाभ्योरः॥कुत्वाडु
पच्॥कासूगोणीभ्यांष्टरच्॥वत्सोक्षाश्वर्षभेभ्यश्चतनुत्वे॥
किंयत्तदोनिर्धारणेद्वयोरेकस्यडतरच्॥वाबहूनांजातिपरिप्र
श्नेडतमच्॥एकाच्चप्राचां॥अवक्षेपणेकन्॥इवेप्रतिकृतौ॥

सू॰ पा॰ संज्ञायांच॥लुंमनुष्ये॥जीविकार्थेचापण्ये॥देवपथादिभ्यश्च॥
५८ ५॥वस्तेर्ढञ्॥शिलायाढः॥शाखादिभ्योयः॥द्रव्यंचभव्ये॥कु
शाग्राच्छः॥समासाच्चतद्विषयात्॥शर्करादिभ्योण्॥अंगुल्या
दिभ्यष्ठक्॥एकशालायाष्ठजन्यतरस्यां॥कर्कलोहितादीकक्
॥प्रत्नपूर्वविश्वेमात्थाल्छंदसि॥पूगाञ्ञ्योग्रामणीपूर्वात्॥व्रा
तच्फञोरस्त्रियां॥आयुधजीविसंघांञ्यड्वाहीकेष्वब्राह्मणरा
जन्यात्॥वृकाट्टेण्यण्॥दामन्यादित्रिगर्तषष्ठाच्छः॥पर्श्वा राम
दियौधेयादिभ्योणञौ॥अभिजिद्विदभृच्छालावच्छिखाव ५८

छमीवदूर्णावच्छुमदणोयञ्॥ञादयस्तद्राजाः॥६॥प्राग्दिशोनद्यातने
विभाषाज्यच्च जातिनाम्नोवस्तेरेकोनविंशतिं॥२॥इतिपंचमाध्यायस्य
तृतीयःपादः॥पादशतस्यसंख्यादेर्वीप्सायांवुन्लोपश्च॥दंडव्यवसर्ग
योश्च॥स्थूलादिभ्यःप्रकारवचनेकन्॥अनत्यंतगतौक्तात्॥नसामिव
चने॥वृहत्याअच्छादने॥अषडक्षाशितंग्वलंकर्मालंपुरुषाध्युत्तर
पदात्खः॥विभाषांचेरदिक्स्त्रियां॥जात्यंताच्छबंधुनि॥स्थानांताद्वि
भाषासस्थानेनेतिचेत्॥किमेत्तिङव्ययघादाम्वद्रव्यप्रकर्षे॥अमु
चच्छंदसि॥अनुगादिनष्ठक्॥णचःस्त्रियामञ्॥अणिनुणः॥विसा

सू॰पा॰ रिणो मत्स्ये॥ संख्यायाः क्रियाभ्यावृत्तिगणने कृत्वसुच्॥ द्वित्रिचतु
५९ र्भ्यः सुच्॥ एकस्य सकृच्च॥ विभाषा बहोर्धाविप्रकृष्टकाले॥ १॥ त
त्प्रकृतवचने मयट्॥ समूहवच्च बहुषु॥ अनंतावसथेतिहभेषजा
६४ ञ्ञ्यः॥ देवतांतात्तादर्थ्ये यत्॥ पादार्घाभ्यां च॥ अतिथेर्ञ्यः॥ देवात्तल्॥
अवेः कः॥ यावादिभ्यः कन्॥ लोहितान्मणौ॥ वर्णे चानित्ये॥ रक्ते॥
कालाच्च॥ विनयादिभ्य ष्ठक्॥ वाचो व्याहृतार्थायां॥ तद्युक्तात्क ६६
र्मणोण्॥ ओषधेरजातौ॥ प्रज्ञादिभ्यश्च॥ मृदस्तिकन्॥ सस्नौ राम
प्रशंसायां॥ २॥ वृकज्येष्ठाभ्यां तिल्तातिलौ च च्छंदसि॥ बह्व ५९

ल्पार्थाच्छकृत्करकादन्यतरस्यां॥ संख्यैकवचनाद्वीप्सायां॥ प्रति
योगे पंचम्यास्तसिः॥ अपादाने चाहीयरुहोः॥ अतिग्रहाव्यथ
नक्षेपेष्वकर्त्तरि तृतीयायाः॥ हीयमानपापयोगाच्च॥ षष्ठ्या व्याश्र
त ये॥ रोगाच्चापनयने॥ अभूततद्भावे कृभ्वस्तियोगे संपद्यकर्त्तरि
तो च्विः॥ अरुर्मनश्चक्षुश्चेतोरहोरजसां लोपश्च॥ विभाषा साति का
र्त्स्न्ये॥ अभिविधौ संपदा च॥ तदधीनवचने॥ देये त्रा च॥ देवमनुष्य
पुरुषपुरुमर्त्येभ्यो द्वितीयासप्तम्योर्बहुलं॥ अव्यक्तानुकरणाद्द्व्यज राम
वरार्द्धादनितौ डाच्॥ कृञो द्वितीयतृतीयशंबबीजात्कृषौ॥ संख्यायां

स्र·पा· श्चगुणांतायाः।समयाच्चयापनायां॥ ॥सपत्रनिष्पत्रादतिव्यथने।
५०
निष्कुलांनिष्कोषणे।सुखप्रियादानुलोम्ये।दुःखात्प्रातिलोम्ये।शूल
त्पाके।सत्यादशपथे।मद्रात्परिवापणे।समासांताः।नपूजनात्॥ ताः ११ ३
किमःक्षेपे।नञस्तत्पुरुषात्।पथोविभाषा।बहुव्रीहौसंख्येयेडजबहु
गणात्।ऋक्पूरब्धूःपथामानक्षे॥अच्प्रत्यन्ववपूर्वात्सामलोम्नः।
अक्ष्णोदर्शनात्।अचतुरविचतुरसुचतुरस्त्रीपुंसधेन्वनडुह राम
र्क्सामवाङ्मनसाक्षिभ्रुवदारगवोर्वष्ठीवपदष्ठीवनक्तंदिवरात्रिंदि प ६०
वाहर्दिवसरजसनिःश्रेयसपुरुषायुषद्व्यायुषत्र्यायुषर्ग्यजुषजा

१ नगोष्ठश्वाः॥ ब्रह्महस्तिभ्यां वर्चसः॥ अवसमंधेभ्यस्तमसः॥ श्वसोवसीयः श्रेय+१

तोक्षमहोक्षवृद्धोक्षोपशुंसः॥ ६॥ अन्ववतप्ताद्रहसः॥ प्रतेरुरसः सप्त
मीस्थात्॥ अनुगवमायामे॥ द्विस्तावा त्रिस्तावा वेदिः॥ उपसर्गादध्वनः॥
तत्पुरुषस्यांगुलेः संख्याव्ययादेः॥ अहः सर्वैकदेशसंख्यातपुण्याच्च
रात्रेः॥ अह्नोह्न एतेभ्यः॥ नसंख्यादेः समाहारे॥ उत्तमैकाभ्यांच॥ राजा
हः सखिभ्यष्टच्॥ गोरतद्धितलुकि॥ अग्राख्यायामुरसः॥ अनोश्मा
यःसरसां जातिसंज्ञयोः॥ ग्रामकौटाभ्यांच तक्ष्णः॥ अतेः शुनः॥ उपमा
नादप्राणिषु॥ उत्तरमृगपूर्वाच्च सक्थ्नः॥ नावोद्विगोः॥ अर्द्धाच्च॥ प
खार्याः प्राचां॥ द्वित्रिभ्यामंजलेः॥ अनसंतान्नपुंसकाच्छंदसि॥ ब्र

भ्यः

सू. पा. ह्मणोजानपदाख्यायां॥कुमहद्भ्यामन्यतरस्यां॥द्वंद्वाच्चुदषहांतात्समा
६१ हारे॥अव्ययीभावेशरत्प्रभृति॥अनश्च॥नपुंसकादन्यतरस्यां॥नदीपौर्णमा
स्याग्रहायणीभ्यः॥झयः॥गिरेश्चसेनकस्य॥बहुव्रीहौसर्के क्ष्णोःस्वांगा थ्य
त्षच्॥अंगुलेर्दारुणि॥द्वित्रिभ्यांषमूर्ध्नः॥अप्पूरणीप्रमाण्योः॥अंतर्बहिर्भ्यां
लो चम्नः॥अञ्नासिकायाः संज्ञायांनसंचास्थूलात्॥उपसर्गाच्च॥सुप्रातसु
श्वसुदिवशारिकुक्षचतुरश्रैणीपदाजपदप्रोष्ठपदाः॥ ६॥नञ्दुःसुभ्योह
लिसक्थ्योरन्यतरस्यां॥नित्यमसिच्प्रजामेधयोः॥बहुप्रजाश्छंदसि॥
धर्मादनिच्केवलात्॥जंभासुहरिततृणसोमेभ्यः॥दक्षिणेर्मालुब्धयो राम्
गे॥इच्कर्मव्यतिहारे॥द्विदंड्यादिभ्यश्च॥प्रसंभ्यांजानुनोर्ज्ञुः॥ऊर्ध्वाद्वि ६१

भाषा॥ ऊधसोनङ्॥ धनुषश्च॥ वासंज्ञायां॥ जायायानिङ्॥ गंधस्येदुत्पूतिसुसु
रभिभ्यः॥ अल्पाख्यायां॥ उपमानाच्च॥ पादस्यलोपोहस्त्यादिभ्यः॥ कुंभपदीषुच
॥ संख्यासुपूर्वस्य॥ ७॥ वयसिदंतस्यदतृ॥ छंदसिच॥ स्त्रियांसंज्ञायां॥ विभाषा
भ्र ४ श्यावारोकाभ्याम्॥ अग्रांतशुद्धशु[illegible]वृषवराहेभ्यश्च॥ ककुदस्यावस्थायां॥
लोपः॥ त्रिककुत्पर्वते॥ उद्विभ्यांकाकुदस्य॥ पूर्णाद्वि भाषा॥ सुहृद्दु
र्हृदौ मित्रामित्रयोः॥ उरःप्रभृतिभ्यःकप्॥ इनस्त्रियां॥ नद्यृतश्च॥ शेषाद्वि
भाषा॥ नसंज्ञायां॥ ईयसश्च॥ वंदितेभ्रातुः॥ ऋतश्छंदसि॥ नाडीतं
त्र्योःस्वांगे॥ निष्प्रवाणिश्च॥ ८ ॥ पादशतस्यतत्प्रकृतवत्कंसपत्रान्व
वखायीनन्त्युःयासिविंशतिः॥ ॥ इतिचतुर्थः पादः॥ ॥ पंचमोध्यायःसमाप्तः

सुभ्योव

ज्मेषाभ्यां

स्र॰ पा॰ ॐ न्नम्॥ एकाचोद्वेप्रथमस्य॥ अजादेर्द्वितीयस्य॥ नंद्राः संयोगादयः॥ पूर्वो
६२ भ्यासः॥ उभे अभ्यस्तं॥ जक्षित्याद्यः षट्॥ तुजादीनांदीर्घोभ्यासस्य
॥ लिटिधातोरनभ्यासस्य॥ सन्यङोः॥ श्वै॥ चङि॥ दाम्धात्सात्क्रान्मी
द्वौं श्च॥ ष्यङः संप्रसारणंपुत्रपत्योस्तत्पुरुषे॥ बंधुनिबहुव्रीहौ॥ वचि
स्वपियजादीनांकिति॥ ग्रहि ज्यावयिव्यधिविष्टिविचतिवृश्चतिपृच्छ
तिभृज्जतीनांङिति च॥ लिट्यभ्यासस्योभयेषां॥ स्वापेश्चङि॥ स्व
पिस्यमिव्येञांयङि॥ नवशः॥ २॥ चायः की॥ स्फायस्फी निष्ठायां॥ स्त्यः
प्रपूर्वस्य॥ द्रवमूर्तिस्पर्शयोः श्यः॥ प्रतेश्च॥ विभाषाभ्यवपूर्वस्य॥ शृतं र एम
पाके॥ प्यायः पी॥ लिड्यङोश्च॥ विभाषाश्वेः॥ णौचसंश्चङोः॥ ह्वः संः ६२

५।२।७

प्रसारणं॥ अभ्यस्तस्य च॥ बहुलं छंदसि॥ चायः की॥ अपस्पृधेथामा
नृचुरानृहुश्चिच्युषेतित्याजश्राताश्रितमाशीराशीर्त्तः॥ नसंप्रसार
णेसंप्रसारणं॥ लिटिवयोयः॥ वश्चास्यान्यतरस्यांकिति॥ वेञः॥
॥२॥ ल्यपि च॥ ज्यश्च॥ व्यश्च॥ विभाषापरेः॥ आदेच उपदेशेशि
ति॥ नव्यो लिटि॥ स्फुरतिस्फुलत्योर्घञि॥ क्रीङ्जीनाण्णौ॥ सिध्य
तेरपारलौकिके॥ मीनातिमिनोतिदीङांल्यपिच॥ विभाषाली
यतेः॥ खिदेश्छंदसि॥ अपगुरोणमुलि॥ चिस्फुरोर्णौ॥ प्रजनेवी
यतेः॥ बिभेतेर्हेतुभये॥ नित्यंस्मयतेः॥ सृजिदृशोर्झल्यमकिति॥

अनुदात्तस्य चर्दुपधस्यांन्यतरस्यां ॥ शीर्षंश्छंदसि ॥ ३ ॥ ये च तद्धिते ॥ अ
चि शीर्षः ॥ पद्दन्नोमास्हृन्निशसन्यूषंदोषन्यकञ्छकन्नुदन्नासञ्छ[illegible]
भृतिषु ॥ धात्वादेः षः सः ॥ णो नः ॥ लोपो व्योर्वलि ॥ वेरपृक्तस्य ॥ हल्ङ्या
ब्भ्यो दीर्घात्सुतिस्यपृक्तं हल् ॥ एङ्ह्रस्वात्संबुद्धेः ॥ शेश्छंदसि बहुलं ॥ ह्रस्व
स्य पिति कृति तुक् ॥ संहितायां ॥ छे च ॥ आङ्माङोश्च ॥ दीर्घात् ॥ पदांता
द्वा ॥ इको यणचि ॥ एचोयवायावः ॥ वांतो यि प्रत्यये ॥ धातोस्तन्निमि
त्तस्यैव ॥ ४ ॥ क्षय्यजय्यौ शक्यार्थे ॥ क्रय्यस्तदर्थे ॥ भय्यप्रवय्ये च छं

दसि ॥ एकः पूर्वपरयोः ॥ अंतादिवच्च ॥ षत्वतुकोरसिद्धः ॥ आद्गुणः ॥
वृद्धिरेचि ॥ एत्येधत्यूठ्सु ॥ आटश्च ॥ उपसर्गादृति धातौ ॥ वासुप्यापि
शलेः ॥ औतोम्शसोः ॥ एङि पररूपं ॥ ओमाङोश्च ॥ उस्यपदांतात् ॥
अतोगुणे ॥ अव्यक्तानुकरणस्यात इतौ ॥ नाम्रेडितस्यांत्यस्य तु वा ॥ नि
त्यमाम्रेडिते डाचि ॥ ५ ॥ अकः सवर्णे दीर्घः ॥ प्रथमयोः पूर्वसवर्णः ॥
तस्माच्छसो नः पुंसि ॥ नादिचि ॥ दीर्घाज्जसि च ॥ वा छंदसि ॥ अमि २।४।
पूर्वः ॥ संप्रसारणाच्च ॥ एङः पदांतादति ॥ ङसिङसोश्च ॥ सतउत् ॥

ख्यत्यात्परस्य॥ अतोरोरप्लुतादप्लुते॥ हशि च॥ प्रकृत्यांतःपादमव्यपरे॥
अव्यादवद्यादवक्रमुरव्रताँमवंत्ववस्युषु च॥ यजुष्युरः॥ आपोजुषा
णोवृष्णोवार्षिष्ठेंबेंबालेंबिकेपूर्वे॥ अंग इत्यादौ च॥ अनुत्ते च कुध दा
परे॥६॥ अवपथासि च॥ सर्वत्र विभाषा गोः॥ अवङ् स्फोटाय
नस्य॥ इंद्रे च नित्यं॥ प्लुतप्रगृह्या अचि॥ आङोनुनासिकश्छं
दसि॥ इकोसवर्णे शाकल्यस्य ह्रस्वश्च॥ ऋत्यकः॥ अप्लुतवदु
पस्थिते॥ ई चाक्रवर्मणस्य॥ दिव उत्॥ एतत्तदोः सुलोपोकोरनञ्

समासेहलि॥स्यश्छंदसिबहुलं॥सोचिलोपेचेत्पादपूरणं॥सुट्का
त्पूर्वः॥अड्भ्यासव्यवायेपि॥संपर्युपेभ्यःकरोतौभूषणे॥समवाये
च॥उपात्प्रतियत्नवैकृतवाक्याध्याहारेषु॥किरतौलवने॥७॥हिं
सायांप्रतेश्च॥अपाच्चतुष्पाच्छकुनिष्वालेखने॥कुस्तुंबुरूणिजा
तिः॥अपरस्पराःक्रियासातत्ये॥गोष्पदंसेवितासेवितप्रमाणेषु॥
आस्पदंप्रतिष्ठायां॥आश्चर्यमनित्ये॥वर्चस्केवस्करः॥अपस्क
रोरथांगं॥विष्किरःशकुनिर्विकिरोवा॥ह्रस्वाच्चंद्रोत्तरपदेमंत्रे॥

स्व॰पा॰ प्रतिष्कशश्चकशेः॥ प्रस्कण्वहरिश्चंद्रावृषी॥ मस्करमस्करिणोवेणु
६५ परिव्राजकयोः॥ कास्तीराजस्तुंदेनगरे॥ कारस्करो वृक्षः॥ पारस्कप्र २
भृतीनिचसंज्ञायां॥ अनुदात्तंपदमेकवर्जं॥ कर्षात्वतोघञोंतउदा
त्तः॥ उंछादीनांच॥ ८॥ अनुदात्तस्यचयत्रोदात्तलोपः॥ धातोः॥ चि
तः॥ तद्धितस्य॥ कितः॥ तिसृभ्योजसः॥ चतुरः शसि॥ सावेकाच
५ स्तृतीयादिर्विभक्तिः॥ अंतोदात्तादुत्तरपदादन्यतरस्यामनित्यसमा
से॥ अंचेश्छंदस्यसर्वनामस्थानं॥ ऊडिदंपदाद्यप्पुम्रैद्युभ्यः॥ अ ६५

ष्नोदीर्घात् ॥ शतुरनुमो नद्यजादी ॥ उदात्तयणो हल्पूर्वात् ॥ नोङ्धा
त्वोः ॥ ह्रस्वनुड्भ्यां मतुप् ॥ नामन्यतरस्यां ॥ ङ्याश्छंदसि बहुलं ॥ षट्
त्रिचतुर्भ्यो हलादिः ॥ झल्युपोत्तमं ॥ ८ ॥ विभाषा भाषायां ॥ न गोश्व
६ न्साववर्णराडङ्क्रुङ्कृद्भ्यः ॥ दिवो झल् ॥ नृ चान्यतरस्यां ॥ तित्स्वरि
तं ॥ तास्यनुदात्तेन्ङिददुपदेशाल्लसार्वधातुकमनुदात्तमह्न्विङोः ॥
आदिः सिचोन्यतरस्यां ॥ स्वपादिहिंसामच्यनिटि ॥ अभ्यस्तानामा
दिः ॥ अनुदात्ते च ॥ सर्वस्य सुपि ॥ भीह्रीभृहुमदजनधनदरिद्रा

जागरं प्रत्ययात्पूर्वं पिति ॥ लिति ॥ आदिर्णमुल्यन्यतरस्यां ॥ अचः क
र्तृयकि ॥ थलि च सेटीडंतोवा ॥ ञ्नित्यादिर्नित्यं ॥ आमंत्रितस्य च ॥ प
थिमथोः सर्वनामस्थाने ॥ अंतश्चतवैयुगपत् ॥ १० ॥ क्षयो निवासे ॥
जयः करणं ॥ वृषादीनां च ॥ संज्ञायामुपमानं ॥ निष्ठा च द्व्यजनात् ॥
शुष्कधृष्टौ ॥ आशितः कर्ता ॥ रिक्ते विभाषा ॥ जुष्टार्पिते च छंदसि ॥
नित्यं मंत्रे ॥ युष्मदस्मदोर्ङसि ॥ ङयि च ॥ यतोनावः ॥ ईडवंदवृशंस
दुहाण्यतः ॥ विभाषा वेण्विंधानयोः ॥ त्यागरागहासकुहश्वठक्रथा

जय्या
वकः

नां॥ उपोत्तमं रिति॥ चड्यन्यतरस्यां॥ मतोः पूर्वमात्संज्ञायां स्त्रियां॥ अं
तोवत्याः॥ ११॥ ईवत्याः॥ चौ॥ समासस्य॥ २॥ एकाच श्वायो ल्यपि च
ये चक्ष [illegible] य्या कौ [illegible]ः सद र्गैवपथासि हिंसायामनुदात्तस्य चैव विभाषा
क्षय ईवत्यास्त्रीणि॥ ॥ इति षष्ठोध्यायस्य प्रथमः पादः॥ ॥ बहुव्री
हौ प्रकृत्या पूर्वपदं॥ तत्पुरुषे तुल्यार्थतृतीयासप्तम्युपमानाव्ययद्विती
याकृत्याः॥ वर्णो वर्णेष्वनेते॥ गाधलवणयोः प्रमाणे॥ दायाद्यं दाया
दे॥ प्रतिबंधि चिरकृच्छ्रयोः॥ पदेपदेशे॥ निवाते वातत्राणे॥ शारदे

स.पा.
६७

नार्तवि॥अध्वर्युकषाययोर्जातौ॥सदृशप्रतिरूपयोःसादृश्ये॥द्विगौप्रमा
णे॥गंतव्यंपण्यंवाणिजे॥मात्रोपज्ञोपक्रमच्छायेनपुंसके॥सुखप्रिययो
र्हिते॥प्रीतौच॥स्वंस्वामिनि॥पत्यावैश्वर्ये॥नभूवाक्चिद्दिधिषु॥वा
भुवनं॥१॥आशंकाबाधनेदीयःसुसंभावने॥पूर्वेभूतपूर्वे॥सविधस
नीडसमर्यादसवेशसदेशेषुसामीप्ये॥विस्पष्टादीनिगुणवचनेषु॥
श्रज्यावमकन्यापवत्सुभावेकर्मधारये॥कुमारश्च॥आदिःप्रत्येनसि॥
पूगेष्वन्यतरस्यां॥इगंतकालकपालभगालशरावेषुद्विगौ॥बह्वन्य ६७

तरस्यां॥ दिष्टिवितस्त्योश्च॥ सप्तमी सिद्धशुष्कपक्वबंधेष्वकालात्
॥ परिप्रत्युपापा वर्ज्यमानाहोरात्रावयवेषु॥ राजबहुवचनद्वंद्वेंधकवृ न्य
ष्णिषु॥ संख्या॥ आचार्योपसर्जनश्चांतेवासी॥ कार्त्तकौजपादयश्च॥
महान्व्रीह्यपराह्णगृष्टीष्वासजाबालभारभारतहैलिहिलरौरवप्र
वृद्धेषु॥ क्षुल्लकश्च वैश्वदेवे॥ उष्ट्रः सादिवाम्योः॥ २॥ गौः सादसादिसा
रथिषु॥ कुरुगार्हपरितक्तगुर्वसूतजरत्यश्लीलदृढरूपापारेव
डवातैतिलकद्रूः पण्यकंबलो दासीभाराणां च॥ चतुर्थी तदर्थे॥

अर्थे॥ क्ते च॥ कर्मधारये निष्ठा॥ अहीने द्वितीया॥ तृतीया कर्मणि॥
गतिरनंतरः॥ तादौ च निति कृत्यतौ॥ तवै चांतश्च युगपत्॥ अनि
गंतोंच तौ वप्रत्यये॥ न्यधी च॥ ईषदन्यतरस्यां॥ हिरण्यपरि
माणं धने॥ प्रथमोचिरोपसंपत्तौ॥ कतरकतमौ कर्मधारये॥
आर्यो ब्राह्मणकुमारयोः॥ राजा च॥ षष्ठी प्रत्येनसि॥ क्ते नि
त्यार्थे॥ ग्रामः शिल्पिनि॥ राजा च प्रशंसायां॥ आदिरुदात्तः॥
सप्तमी हारिणौ धर्म्येहरणे॥ युक्ते च॥ विभाषाध्यक्षे॥ पापं च
शिल्पिनि॥ गोत्रांतेवासिमाणवब्राह्मणेषु क्षेपे॥ अंगानि

मैरेये ॥ भक्ताख्यास्तदर्थेषु ॥ गोबिडालसिंहसैंधवेषूपमाने ॥ अके
जीविकार्थे ॥ प्राचां क्रीडायां ॥ अणि नियुक्ते ॥ शिल्पिनि चाकृञः ॥
५।३।५ संज्ञायां च ॥ गोतंतियवं पाले ॥ णिनि ॥ उपमानं शब्दार्थप्रकृता
वेव ॥ ४ ॥ युक्तारोह्यादयश्च ॥ दीर्घकाशतुषभ्राष्ट्रवटं जे ॥ अं
त्यात्पूर्वं बह्वचः ॥ ग्रामे निवसंतः ॥ घोषादिषु च ॥ छात्र्यादयः शाला
यां ॥ प्रस्थे वृद्धमकर्क्यादीनां ॥ मालादीनां च ॥ अमहन्नवन्नग
रे नुदीचां ॥ अर्मे चावर्णं द्व्यच्त्र्यच् ॥ न भूताधिकसंजीवम

सू॰पा॰

द्राश्मकंजलं॥अंतः॥सर्वंगुणकार्त्स्न्ये॥संज्ञायांगिरिनिकाय्योः॥कु य
६९ मार्यांवयसि॥उदकेकेवले॥द्विगोक्रतौ॥सभायांनपुंसके॥पुरे
प्राचां॥अरिष्टगोडपूर्वेच॥५॥नहास्तिनफलकमार्देयाः॥कुसू
लकूपकुंभशालंबिले॥दिक्शब्दाग्रामजनपदाख्यानचानराटे
षु॥आचार्योपसर्जनश्चांतेवासिनि॥उत्तरपदवृद्धौसर्वंच॥ब
हुव्रीहौविश्वंसंज्ञायां॥उदराश्वेषुषु॥क्षेपे॥नदीबंधुनि॥निष्ठो ६९
पसर्गपूर्वमन्यतरस्यां॥उत्तरपदादिः॥कर्णोवर्णलक्षणात्॥

संज्ञौपम्ययोश्च॥कंठपष्ठग्रीवाजंघंच॥शृंगमवस्थायांच॥नञोजर
मरमित्रमृताः॥सोर्मनसीअलोमोषसी॥क्रत्वादयश्च॥आद्युदात्तंद्व्य
च्छंदसि॥वीरवीर्यौच॥द॥कूलतीरतूलमूलशालाक्षसममव्ययी
भावे॥कंसमंथशूर्पपाय्यकांडंद्विगौ॥तत्पुरुषेशालायांनपुंसके
॥कंथाच॥आदिश्चिहणादीनां॥चेलखेटकटुककांडंगर्हायां॥
चीरमुपमानं॥पललसूपशाकंमिश्रे॥कूलसूदस्थलकर्षाःज्ञौसं
यां॥अकर्मधारयेराज्यं॥वर्ग्यादयश्च॥पुत्रःपुंभ्यः॥नाचार्यरा

सू॰पा॰
७०

जार्त्विकसंयुक्त ज्ञात्याख्येभ्यः ।। चूर्णादीन्यप्राणिषष्ठ्याः ।। षट्चक्रा
डादीनि ।। कुंडंवनं ।। प्रकृत्या भगालं ।। शितेर्नित्याबह्वज्बहुव्रीहाभेव
सत् ।। गतिकारकोपपदात्कृत् ।। उभे वनस्पत्यादिषु युगपत् ।। ७५
देवताद्वंद्वे च ।। नोत्तरपदेनुदात्तादावपृथिवीरुद्रपूषमंथिषु ।। अं
तः ।। थाथघञ्क्ताजबित्रकाणां ।। सूपमानात्क्तः ।। संज्ञाया
मनाचितादीनां ।। प्रवृद्धादीनां च ।। कारकाद्दत्तश्रुतयोरेवाशि
षि ।। इत्थंभूतेन कृतमिति च ।। अनो भावकर्मवचनः ।। मन्

७०

षा०२। ६

क्तिन्व्याख्यानशयनासनस्थानयाजकादिक्रीताः॥सप्तम्याःपु
ण्यं॥ऊनार्थकलहंतृतीयायाः॥मिश्रंचानुपसर्गमसंधौ॥न
ञोगुणप्रतिषेधेसंपाद्यर्हहितालमर्थास्तद्धिताः॥ययतो
श्चातदर्थे॥अच्कावशक्तौ॥आक्रोशेच॥संज्ञायां॥कृत्यो
केष्णुच्चार्वादयश्च॥८॥विभाषातृन्नन्नतीक्ष्णशुचिषु॥
बहुव्रीहाविदमेतत्तद्भ्यःप्रथमपूरणयोःक्रियागणने॥संख्या
यास्तनः॥विभाषाछंदसि॥संज्ञायांमित्राजिनयोः॥व्यवायिनो

तरं ॥ मुखंस्वांगं ॥ नाव्ययदिक्शब्दगोमहत्स्थूलमुष्टिपृथुवत्सेभ्यः
॥ निष्ठोपमानादन्यतरस्यां ॥ जातिकालसुखादिभ्योनाच्छादनात्
क्तोकृतमि तप्रतिपंनाः ॥ वाजाते ॥ नञ्सुभ्यां ॥ कपिपूर्वं ॥ ह्रस्वां
तेंत्यात्पूर्वं ॥ बहोर्नञ्वदुत्तरपदभूम्नि ॥ नगुणादयोवयवाः ॥ उ
पसर्गात्स्वांगंध्रुवमपर्शु ॥ वनंसमासे ॥ अंतः ॥ अंतश्च ॥ २ ॥ न
निविभ्यां ॥ परेरभितोभाविमंडलं ॥ प्रादस्वांगंसंज्ञायां ॥ निरुद
कादीनिच ॥ अभेर्मुखं ॥ अपाच्च ॥ स्फिगपूतवीणांजोध्वकु

क्षिसीरनामनाम च॥अधेरुपरिस्थं॥अनीरप्रधानकनीयसी॥पुरु
षश्चान्वादिष्टः॥अतेरकृत्संदे॥नेरनिधाने॥प्रतेरंश्वादयस्तत्पुरु
षे॥उपाद्वजजिनमगौरादयः॥सोरवक्षेपणे॥विभाषोत्पुच्छे॥द्वि
त्रिभ्यांपाद्दन्मूर्धसु बहुव्रीहौ॥सक्थं चाक्रांतात्॥परादिश्छंदसि
बहुलं॥१०॥बहुव्रीहावाशंकागोः [illegible] क्कै निरवधि युक्तान हास्ति
षा कूलतीरदेवताविभौननिध्ये नि कोनाविंशतिः॥ ॥इति षष्ठाध्या
यस्य द्वितीयपादः॥ ॥अलुगुत्तरपदे॥पंचम्याः स्तोकादिभ्यः॥

आदि
निरपेक्ष
तीर

तिर।
वि१०।१३

ओजःसहोंभस्तमसस्तृतीयायाः॥मनसःसंज्ञायां॥आज्ञायि
निच॥आत्मनश्चपूरणे॥वैयाकरणाख्यायांचतुर्थ्याः॥प
रस्यच॥हलदंतात्सप्तम्याःसंज्ञायां॥कारनाम्निचप्राचांहला
दौ॥मध्याद्गुरौ॥अमूर्धमस्तकात्स्वांगादकामे॥बंधेचविभा
षा॥तत्पुरुषेकृतिबहुलं॥प्रावृट्शरत्कालदिवांजे॥विभाषा
वर्षक्षरशरवरात्॥घकालतनेषुकालनाम्नः॥शयवासवा
सिष्वकालात्॥नेत्सिद्धबध्नातिषुच॥स्थेचभाषायां॥१॥

षष्ठ्या आक्रोशे ॥ पुत्रेन्यतरस्यां ॥ ऋतो विद्यायोनिसंबंधेभ्यः ॥
विभाषा स्वसृपत्योः ॥ आनङ् ऋतो द्वंद्वे ॥ देवताद्वंद्वे च ॥ ईदग्नेः
सोमवरुणयोः ॥ इद्वृद्धौ ॥ दिवो द्यावा ॥ दिवसश्च पृथिव्यां ॥ उषा
सोषसः ॥ मातरपितरावुदीचां ॥ पितरामातरा च छंदसि ॥ स्त्रियाः
पुंवद्भाषितपुंस्कादनूङ् समानाधिकरणे स्त्रियामपूरणीप्रिया
दिषु ॥ तसिलादिष्वाकृत्वसुचः ॥ क्यङ्मानिनोश्च ॥ न कोपधायाः
॥ संज्ञापूरण्योश्च ॥ वृद्धिनिमित्तस्य च तद्धितस्यारक्तविकारे ॥ स्वां

गाच्चेतोमानिनि॥२॥जातेश्च॥पुंवत्कर्मधारयजातीयदेशीयेषु॥घरू
पकल्पचेलड्ब्रुवगोत्रमतहतेषुङ्योनेकाचोह्रस्वः॥नद्याःशेषस्या
न्यतरस्यां॥उगितश्च॥आन्महतःसमानाधिकरणजातीययोः॥
द्व्यष्टनःसंख्यायामबहुव्रीह्यशीत्योः॥त्रेस्त्रयः॥विभाषाचत्वारिंश
त्प्रभृतौसर्वेषां॥हृदयस्यहृल्लेखयदण्लासेषु॥वाशोकष्यञ्रोगे
षु॥पादस्यपदाज्यातिगोपहतेषु॥पद्यत्यतदर्थे॥हिमकाषिहति
षुच॥ऋचःशे॥वाघोषमिश्रशब्देषु॥उदकस्योदःसंज्ञायां॥पे

षंवासवाहनधिषुच॥एकहलादौपूरयितव्येन्यतरस्यां॥मंथोद
नसक्तुबिंदुवज्रभारहारवीवधगाहेषुच॥इकोह्रस्वोङ्योगा
लवस्य॥एकतद्धितेच॥ङ्यापोःसंज्ञाछंदसोर्बहुलं॥त्वेच॥इष्टके
षीकामालानांचिततूलभारिषु॥खित्यनव्ययस्य॥अरुर्द्विषदजं
तस्यमुम्॥इचएकाचोम्प्रत्ययवच्च॥वाचंयमपुरंदरौच॥कारेस
त्यागदस्य॥श्येनतिलस्यपातेञे॥रात्रेःकृतिविभाषा॥नलोपोनञः॥
भ्रा तस्मान्नुडचि॥नँ[illegible]ण्नपान्नवेदानासत्यानमुचिनकुलनखनपुं

सकनक्षत्रनक्रनाकेषुप्रकृत्या॥एकादिश्चैकस्यचादुक्॥नगोप्रा
णिष्वन्यतरस्यां॥सहस्यसः संज्ञायां॥ग्रंथांताधिकेच॥द्वितीयेचानु
पाख्ये॥४॥अव्ययीभावेचाकाले॥वोपसर्जनस्य॥प्रकृत्याशिष्य
गोवत्सहलेषु॥समानस्यछंदस्यमूर्द्धप्रभृत्युदर्केषु॥ज्योतिर्ज
नपदरात्रिनाभिनामगोत्ररूपस्थानवर्णवयोवबंधुषु॥चरणे चन
ब्रह्मचारिणि॥तीर्थेये॥विभाषोदरे॥दृग्दृशवतुषु॥इदंकि
मोरीश्की॥आसर्वनाम्नः॥विष्वग्देवयोश्चटेरद्र्यंचतौव

प्रत्यये॥समःसमि॥तिरसस्तिर्यलोपे॥सहस्यसध्रिः॥
सधमादस्थयोश्छंदसि॥द्यंतरुपसर्गेभ्योप ईत्॥ऊनोर्दे
देशे॥अषष्ठ्यतृतीयास्थस्यान्यस्यदुगाशीराशास्थास्थितोत्सुको
तिकारकरागच्छेषु॥अर्थेविभाषा॥५॥कोःकत्तत्पुरुषेचि॥र
थवदयोश्च॥तृणेचजातौ॥कापथ्यक्षयोः॥ईषदर्थे॥वि
षा भाषापुरुषे॥कवंचोष्णे॥पथिचछंदसि॥पृषोदरादीनियथो
पदिष्टं॥संख्याविसायपूर्वस्याह्नस्याहनन्यतरस्याङ्ङौ॥ढ्र

सू०पा०
७५

लोपेपूर्वस्यदीर्घोणः॥सहिवहोरोदवर्णस्य॥साढ्यैसाढ्वासाढेतिनिगमे॥
संहितायां॥कर्णेलक्षणस्याविष्टाष्टपंचमणिभिन्नछिन्नछिद्रस्रुव
स्वस्तिकस्य॥नहिवृतिवृषिव्यधिरुचिसहितनिषुक्वौ॥वनगिर्योः
संज्ञायांकोटरकिंशुलकादीनां॥वले॥मतौबह्वचोनजिरादीनां॥
शरादीनांच॥द॥इकोवहेपीलोः॥उपसर्गस्यघञ्यमनुष्येबहुलं॥
इकःकाशे॥दस्ति॥अष्टनःसंज्ञायां॥छंदसिच॥चितेःकपि॥वि
श्वस्यवसुराटोः॥नरेसंज्ञायां॥मित्रेचर्षौ॥मंत्रेसोमाश्वेंद्रियवि

७५

विश्वदेव्यस्यमतौ।।ओषधेश्चविभक्तावप्रथमायां।।ऋचितुनुघमक्षु
तङ्कुत्रोरुष्याणां।।इकःसुञि।।द्व्यचोतस्तिङः।।निपातस्यच।।अ
न्येषामपिदृश्यते।।च्वौ।।संप्रसारणस्य।।अलुकृष छ्याजातेरिको
व्ययीभावेकोः ~~कना~~ दिकोवहरकोनाविंशतिः।। ।।इतिषष्ठाध्यायस्य
तृतीयःपादः।। ३ ।।अंगस्य।।हलः।।नामि।।नातिसृचतसृ।।छंदस्यु
भयथा।।नच।।नोपधायाः।।सर्वनामस्थानेचासंबुद्धौ।।वाषपूर्वस्य
निगमे।।सांतमहतःसंयोगस्य।।अप्तृन्तृच्स्वसृनप्तृनेष्टृत्वष्टृक्ष
त्तृहोतृपोतृप्रशास्तॄणां।।इन्हन्पूषार्यम्णांशौ।।सौच।।अत्वसंतस्यचा

धांतोः॥अनुनासिकस्यक्विझलोः क्ङिति॥अज्झनगमांसनि॥तनोतेर्विभा
षा॥क्रमश्चक्त्वि॥छ्वोः शूडनुनासिके च॥ज्वरत्वरस्रिव्यविमवामुपधा
याश्च॥१॥राल्लोपः॥असिद्धवदत्राभात्॥श्नांनलोपः॥अनिदितांह
लउपधायाः क्ङिति॥दंशसंजस्वंजां शपि॥रंजेश्च॥घञि च भावकर
णयोः॥स्यदोजवे॥अवोदैधौद्मप्रश्रथहिमश्रथाः॥नांचेः पूजायां॥
क्त्वि स्कंदस्यंदोः॥जांतनशां विभाषा॥भंजेश्च चिणि॥शास इदङ्हलोः॥
शाहौ॥हंतेर्जः॥अनुदात्तोपदेशवनतितनोत्यादीनामनुनासिकस्य

श्रा

लोपोझलिक्ङिति॥वाल्यपि॥नक्तिचिदीर्घश्च॥गमःक्वौ॥२॥वि
ड्वनोरनुनासिकस्यात्॥जनसनखनांसन्झलोः॥येविभाषा॥तनो
तेर्यकि॥सनःक्तिचिलोपँस्यान्यतरस्यां॥आर्द्धधातुके॥भ्रस्जो
रोपधयोरमन्यतरस्यां॥अतोलोपः॥यस्यहलः॥क्यस्यविभा
षा॥णेरनिटि॥निष्ठायांसेटि॥जनितामंत्रे॥शमितायज्ञे॥
अयामंताल्वाय्येल्विष्णुषु॥ल्यपिलघुपूर्वात्॥विभाषापः॥यु
प्लुवोर्दीर्घश्छंदसि॥क्षियः॥निष्ठायामण्यदर्थे॥३॥वाक्रो

सू०पा०

७६

शांदैन्ययोः॥स्यसिच्सीयुट्तासिषुभावकर्मणोरुपदेशेज्झनग्र
हदृशांवाचिण्वदिट्च॥दीङोयुडचिक्ङिति॥आतोलोपइटिच॥
ईघति॥घुमास्थागापाजहातिसांहलि॥एर्लिङि॥वान्यस्यसं
योगादेः॥नल्यपि॥मयतेरिदन्यतरस्यां॥लुङ्लङ्लृङ्क्ष्व
डुदात्तः॥आडजादीनां॥छंदस्यपिदृश्यते॥नमाङ्योगे॥बहु
लंछंदस्यमाङ्योगेपि॥इरयोरे॥अचिश्नुधातुभ्रुवांय्वोरि
यङुवङौ॥अभ्यासस्यासवर्णे॥स्त्रियाः॥वाम्शसोः॥ ४॥

७६

इणो यण॥ एरनेकाचोसंयोगपूर्वस्य॥ ओः सुपि॥ वर्षाभ्वश्च॥ नभू
३।४।६ सुधियोः॥ छंदस्युभयथा॥ कुश्नुवोः सार्वधातुके॥ भुवो वुग्लुङ्लिटोः॥
ऊदुपधाया गोहः॥ दोषोणौ॥ वा चित्तविरागे॥ मितां ह्रस्वः॥ चिण्णमु
लोर्दीर्घोन्यतरस्यां॥ खचि ह्रस्वः॥ ह्लादो निष्ठायां॥ छादेर्घे द्व्युपसर्गस्य
॥ इस्मन्त्रन्क्विषु च॥ गमहनजनखनघसां लोपः क्ङित्यनङि॥ तनिप
सो॰२ त्योश्छंदसि॥ घसिभसोर्हलि च॥ ५॥ हुझल्भ्यो हेर्धिः॥ श्रुशृणुपॄकृ
वृभ्यश्छंदसि॥ अङितश्च॥ चिणो लुक॥ अतो हेः॥ उतश्च प्रत्ययाद

संयोगपूर्वात्॥ लोपश्चास्यान्यतरस्याम्वोः॥ नित्यंकरोतेः॥ ये
च॥ अतउत्सार्वधातुके॥ श्नसोरल्लोपः॥ श्नाभ्यस्तयोरातः॥ ई
हल्यघोः॥ इद्दरिद्रस्य॥ भियोन्यतरस्यां॥ जहातेश्च॥ आचहौ॥
लोपोयि॥ घ्वसोरेद्धावभ्यासलोपश्च॥ अतएकहल्मध्येना
देशादेर्लिटि॥ द्॥ थलिचसेटि॥ तॄफलभजत्रपश्च॥ राधो
हिंसायां॥ वाजॄभ्रमुत्रसां॥ फणांचसप्तानां॥ नशसददवा
दिगुणानां॥ अर्वणस्त्रसावनञः॥ मघवाबहुलं॥ भस्य॥ पा

दः पत्॥ वसोः संप्रसारणं॥ वाह ऊठ्॥ श्वयुवमघोनामतद्धिते॥
अल्लोपोनः॥ षपूर्वहन्धृतराज्ञामणि॥ विभाषाङिश्योः॥ नसं
योगाद्वमंतात्॥ अचः॥ उदईत्॥ आतोधातोः॥ ७॥ मंत्रेष्वाङ्या
देरात्मनः॥ तिविंशतेर्डिति॥ टेः॥ नस्तद्धिते॥ अह्नष्टखोरेव॥ ओ
र्गुणः॥ ढेलोपोकद्र्वाः॥ यस्येति च॥ सूर्यतिष्यागस्त्यमत्स्या
नांय उपधायाः॥ हलस्तद्धितस्य॥ आपत्यस्य च तद्धितेनाति॥
क्यच्व्योश्च॥ बिल्वकादिभ्यश्छस्य लुक्॥ तुरिष्ठेमेयःसु॥ टेः॥

सू० ३०

७९ स्थूलदूरयुवह्रस्वक्षिप्रक्षुद्राणांयणादिपरंपूर्वस्यचगुणः॥प्रिय
स्थिरस्फिरोरुबहुलगुरुवृद्धतृप्रदीर्घवृंदारकाणांप्रस्थस्फव
र्बंहिगर्वर्षित्रद्राघिवृंदाः॥बहोर्लोपोभूचबहोः॥इष्ठस्ययिट्
च॥ज्यादादीयसः॥८॥रऋतोहलादेर्लघोः॥विभाषर्जोश्छं
दसि॥प्रकृत्यैकाच्॥इनण्यनपत्ये॥गाथिविदथिकेशिग
णिपणिनश्च॥संयोगादिश्च॥अन्॥येचाभावकर्मणोः॥आ ७९
त्माध्वानौखे॥नमपूर्वोपत्येवर्मणः॥ब्राह्मोजातौ॥कार्मस्ता

च्छील्ये॥ औक्षमनपत्ये॥ दांडिनायनहास्तिनायनाथर्वणिकजे
५२ ह्माशिनेयवाशिनांनिभ्रौणहत्यधैवत्यसारवेक्ष्वाकमेत्रेयहि
रण्मयानि॥ ऋत्व्यवास्त्व्यवास्त्वमाध्वीहिरण्मयानिछंदसि॥
॥९॥ अंगस्यराल्लोपोविड्वनोर्वाक्रोशेणोऊड्सल्भ्यस्छलिच
मंत्रेषुरस्ततःपंचदश॥ ॥इतिषष्ठाध्यायःसमाप्तः॥ ॥
युवोरनाको॥ आयनेयीनीयियःफढखछघांप्रत्ययादी
नां॥ झोंतः॥ अद्भ्यस्तात्॥ आत्मनेपदेष्वनतः॥ शीङोरुट्॥

सू॰पा॰॥
८०

वेत्तोर्विभाषा॥ बहुलंछंदसि॥ अतोभिसऐस्॥ बहुलंछंदसि॥
नेदमदसोरकोः॥ टाङ॰सिङ॰सामिनात्स्याः॥ ङ॰र्यः॥ सर्वनाम्नः
स्मै॥ ङ॰सिङ्योः स्मात्स्मिनौ॥ पूर्वादिभ्योनवभ्योवा॥ जसः शी
॥ औङ॰आपः॥ नपुंसकाच्च॥ जश्शासोश्शिः॥ १॥ अष्टाभ्यऔ
श॥ षड्भ्योलुक्॥ स्वमोर्नपुंसकात्॥ अतोम्॥ अ[illegible] ड्डतरा
दिभ्यः पंचभ्यः॥ नेतराच्छंदसि॥ युष्मदस्मद्भ्यांङ॰सोश॥ ङे
प्रथमयोरम्॥ शसोन॥ भ्यसोभ्यम्॥ पंचम्याअत्॥ एकवच

८०

से

नस्य च ॥ साम आकं ॥ आत औ णलः ॥ तुह्योस्तातङाशिष्यन्यतर
स्यां ॥ विदेः शतुर्वसुः ॥ समानञ्पूर्वे क्त्वो ल्यप् ॥ क्त्वापि छंदसि ॥
सुपांसुलुक्पूर्वसवर्णाछेयाडाड्यायाजालः ॥ अमो मश् ॥ २ ॥
लोपस्त आत्मनेपदेषु ॥ ध्वमो ध्वात् ॥ यजध्वैनमिति च ॥ त
स्यतात् ॥ तप्तनप्तनथनाश्च ॥ इदंतो मसि ॥ क्त्वो यक् ॥ इष्ट्वी
नमिति च ॥ स्नात्व्यादयश्च ॥ आज्जसेरसुक् ॥ अश्वक्षीर
वृषलवणानामात्मप्रीतौ क्यचि ॥ आमि सर्वनाम्नः सुट् ॥

सू०पा०
८१

त्रेस्त्रयः॥ह्रस्वनद्यापोनुट्॥षट्चतुर्भ्यश्च॥श्रीग्रामण्योश्छंदसि॥
गोःपादांते॥इदितोनुम्धातोः॥शेमुचादीनां॥मस्जिनशोर्झलि॥
॥३॥रधिजभोरचि॥नेट्यलिटिरधेः॥रभेरशब्लिटोः॥लभे
श्च॥आङोयि॥उपात्प्रशंसायां॥उपसर्गात्खल्घञोः॥नसु
दुर्भ्यांकेवलाभ्यां॥विभाषाचिण्णमुलोः॥उगिदचांसर्व
नामस्थानेधातोः॥युजेरसमासे॥नपुंसकस्यझलचः॥इ
कोचिविभक्तौ॥तृतीयादिषुभाषितपुंस्कंपुंवद्गालवस्य॥अ ८१

स्थिदधिसक्थ्यक्ष्णामनङुदात्तः ॥ छंदस्यपिदृश्यते ॥ ईच द्विवचने ॥ नाभ्यस्ताछतुः ॥ वा नपुंसकस्य ॥ आछीनद्योर्नुम् ॥ ४ ॥ शप्श्यनोर्नित्यं ॥ सावनडुहः ॥ दृक्स्ववस्स्वतवसां छंदसि ॥ दिव औत् ॥ पथिमथ्यृभुक्षामात् ॥ इतोत्सर्वनामस्थाने ॥ थोन्थः ॥ भस्य टेर्लोपः ॥ पुंसोसुङ् ॥ गोतोणित् ॥ णलुत्तमोवा ॥ सख्युरसंबुद्धौ ॥ अनङ्सौ ॥ ऋदुशनस्पुरुदंसोनेहसां च ॥ तृज्वत्क्रोष्टुः ॥ स्त्रियां च ॥ विभाषातृतीयादिष्वचि ॥ चतुरनडुहोरामुदात्तः ॥ अम्संबुद्धौ ॥ ॠत इ

८२ द्धातोः ॥ ५ ॥ उपधायाश्च ॥ उदोष्ठ्यपूर्वस्य ॥ बहुलंछंदसि ॥ ३ ॥
स्लो २ युवोरष्टाभ्योलोपौ त्तरधिशपूरश्यनोरूपधायाः स्त्रीणि ॥ ॥ इ
तिसप्तमाध्यायस्यप्रथमः पादः ॥ ॥ सिचिवृद्धिः परस्मैपदे
षु ॥ अतोल्रांतस्य ॥ वदव्रजहलंतस्याचः ॥ नेटि ॥ ह्म्यंतक्षणःश्व
सजागृणिश्व्येदितां ॥ ऊर्णोतेर्विभाषा ॥ अतोहलादेर्लघोः ॥ नेड्व
शिकृति ॥ तितुत्रतथसिसुसरकसेषुच ॥ एकाचउपदेशेनुदात्ता
त् ॥ श्र्युकःकिति ॥ सानिग्रहगुहोश्च ॥ कृसृभृवृस्तुद्रुस्रुश्रुवोलि ८२

टि॥ श्वीदितोनिष्ठायां॥ यस्यविभाषा॥ आदितश्च॥ विभाषाभावादि
कर्मणोः॥ क्षुब्धस्वांतध्वांतलग्नम्लिष्टविरिब्धफांटबाढानिमंथ
मनस्तमःसक्ताविस्पष्टःस्वरानायासभृशेषु॥ धृषिशसीवैया
त्ये॥ दृढःस्थूलबलयोः॥ १॥ प्रभौपरिवृढः॥ कृच्छ्रगहनयोःक
षः॥ घुषिरविशब्दने॥ अर्द्देःसन्निविभ्यः॥ अभेश्चाविदूर्ये॥
णेरध्ययनेवृत्तं॥ वादांतशांतपूर्णदस्तस्पष्टच्छन्नज्ञप्ताः॥
रुष्यमत्वरसंघुषास्वनां॥ हृषेर्लोमसु॥ अपचितश्च॥ ह्रुह्

२

सू० पा०

८३

रेश्छंदसि॥ अपरिह्वृताश्च॥ सोमे ह्वरितः॥ ग्रसितस्कभितस्त
भितोत्तभितचत्तविकस्ताविशस्तृशंस्तृशास्तृतरुतृतरूतृ
वरुतृवरूतृवरूत्रीरुज्वलितिक्षरितिक्षमितिवमित्यमिती
ति च॥ आर्द्धधातुकस्येड्वलादेः॥ स्नुक्रमोरनात्मनेपदनिमि
त्ते॥ ग्रहो लिटि दीर्घः॥ वृतो वा॥ न लिङि॥ सिचि च पर
स्मैपदेषु॥ र॥ इट् सनि वा॥ लिङ्सिचोरात्मनेपदेषु॥ सनतश्च
संयोगादेः॥ स्वरतिसूतिसूयतिधूञूदितो वा॥ रधादिभ्य

राम

८

श्च ॥ निरः कुषः ॥ इण्निष्ठायां ॥ तीषसहलुभरुषरिषः ॥ सनीवंतर्धभ्रस्जदंभुश्रिस्वृयू
र्णुभरज्ञपिसनां ॥ क्लिशः क्त्वानिष्ठयोः ॥ पूङश्च ॥ वसतिक्षुधोरिट् ॥ अं
चेः पूजायां ॥ लुभोविमोहने ॥ जॄव्रश्च्योः क्त्वि ॥ उदितोवा ॥ सेसिचिकृतचृत
छृदतृदनृतः ॥ गमेरिट्परस्मैपदेषु ॥ नवृ[illegible]द्भ्यश्चतुर्भ्यः ॥ तासिचक्लृपः ॥
॥ ३ ॥ अचस्तास्वत्थल्यनिटोनित्यं ॥ उपदेशेत्वतः ॥ ऋतोभारद्वाजस्य ॥ ब
भूथाततंथजगृभ्मववर्थेतिनिगमे ॥ विभाषासृजिदृशोः ॥ इडत्यर्तिव्यय
तीनां ॥ वस्वेकाजाद्घसां ॥ विभाषागमहनविदविशां ॥ सनिंससनिवांसं ॥
ऋद्धनोःस्ये ॥ अंजेःसिचि ॥ स्तुसुधूभ्यःपरस्मैपदेषु ॥ यमरमनमातांस
क्च ॥ स्मिपूङ्रंज्वशांसनि ॥ किरश्चपंचभ्यः ॥ रुदादिभ्यःसार्वधातुके ॥

सू॰पा॰
८४

ईशःसे ॥ ईडजनोर्ध्वे च ॥ लिङः सलोपोनंत्यस्य ॥ अतोयेयः ॥ ४ ॥ आतो
ङितः ॥ आनेमुक् ॥ ईदासः ॥ अष्टन आविभक्तौ ॥ रायोहलि ॥ युष्मदस्मदो
रनादेशे ॥ द्वितीयायां च ॥ प्रथमायाश्च द्विवचने भाषायां ॥ योचि ॥ शेषेलो
पः ॥ मपर्यंतस्य ॥ युवावौ द्विवचने ॥ यूयवयौ जसि ॥ त्वाहौ सौ ॥ तुभ्यमह्यौ
ङयि ॥ तवममौ ङसि ॥ त्वमावेकवचने ॥ प्रत्ययोत्तरपदयोश्च ॥ त्रिचतु
रोः स्त्रियां तिसृचतसृ ॥ अचि रऋतः ॥ ५ ॥ जराया जरसन्यतरस्यां ॥ त्य
दादीनामः ॥ किमः कः ॥ कुतिहोः ॥ क्वाति ॥ तदोः सः सावनंत्ययोः ॥ अ
दस औ सुलोपश्च ॥ इदमो मः ॥ दश्च ॥ यः सौ ॥ इदोय्पुंसि ॥ अनाप्यकः ॥ ह
लिलोपः ॥ मृजेर्वृद्धिः ॥ अचोञ्णिति ॥ अत उपधायाः ॥ तद्धितेष्वचामा

राम
८४

नकर्मव्यतिहारे॥स्वागतादीनांच॥श्वादेरिञि॥पदांतस्यान्यतरस्यां॥

देः॥क्तितिच॥६॥सिचिप्रभाविद्सन्यच आतोजरायाअष्टादश॥ ॥
सप्तमाध्यायस्यद्वितीयःपादः॥ ॥देविकाशिंशपादित्यवाड्दीर्घसत्रश्रे
यसामात्॥केकयमित्रयुप्रलयानांयादेरियः॥नय्वाभ्यांपदांताभ्यांपू
र्वौतुताभ्यामैच्॥द्वारादीनांच॥न्यग्रोधस्यचकेवलस्यैं॥उत्तरपदस्य
॥अवयवादृतोः॥सुसर्वार्द्धाज्जनपदस्य॥दिशोमद्राणां॥प्राचांग्राम
नगराणां॥संख्यायाःसंवत्सरसंख्यस्यच॥वर्षस्याभविष्यति॥परिमा
णांतस्यासंज्ञाशाणयोः॥जेप्रोष्ठपदानां॥हृद्भगसिंध्वंतेपूर्वपदस्य
च॥अनुशतिकादीनांच॥१॥देवताद्वंद्वेच॥नेंद्रस्यपरस्य॥दीर्घाच्च

स्य

सू॰पा॰
८५

वरूणस्य। प्राचांनगरांते। जंगलधेनुवलजांतस्यविभाषितमुत्तरं। अर्द्धात्परि
माणस्यपूर्वस्यतुवा। नातःपरस्य। प्रवाहणढे। तत्प्रत्ययस्यच। नञः शु
चीश्वरक्षेत्रज्ञकुशलनिपुणानां। यथातथयथापुरयोःपर्यायेण।
हनस्तोचिण्णलोः। आतोयुक्चिण्कृतोः। नोदात्तोपदेशस्यमांतस्या
नाचमेः। जनिवध्योश्च। अर्त्तिह्रीव्लीरीक्नूयीक्ष्माय्यातांपुङ्णौ। शा
छासाह्वाव्यावेपांयुक्। वोविधूननेजुक्। लीलोर्नुग्लुकावन्यतर
स्यांस्नेहविपातने। भियोहेतुभयेषुक्॥ र॥ स्फायोवः। शदेरगतौ

तः॥रुहःपोन्यतरस्यां॥प्रत्ययस्थात्कात्पूर्वस्यातइदाप्यसुपः॥नया
सयोः॥उदीचामातस्थानेयकपूर्वायाः॥भस्त्रैषाजाज्ञाद्वास्वानञ्पूर्वा
णामपि॥अभाषितपुंस्काच्च॥आदाचार्याणां॥ठस्येकः॥इसुसु
क्तांतात्कः॥चजोःकुघिण्यतोः॥न्यंक्वादीनांच॥होहंतेर्ञ्णिन्नेषु॥
अभ्यासाच्च॥हेरचङि॥सन्लिटोर्जेः॥विभाषाचेः॥नक्वादेः॥
अजिव्रज्योश्च॥२॥भुजन्युब्जौपाण्युपतापयोः॥प्रयाजानुयाजौ
यज्ञांगे॥वंचेर्गतौ॥ओकउचःके॥ण्यआवश्यके॥यजयाचरु
चप्रवचर्चश्च॥वचोशब्दसंज्ञायां॥प्रयोज्यनियोज्यौशक्यार्थे॥

सू॰पा॰
॥८६॥

मु

क

भोज्यंभक्ष्ये॥घोर्लोपोलेटिवा॥ओतःश्यनि॥सस्याचि॥लुग्वादु
हदिहलिहगुहामात्मनेपदेदंत्ये॥शमामष्टानांदीर्घश्यनि॥ष्ठि
वुक्लम्वाचमांशिति॥क्रमःपरस्मैपदेषु॥इषुगमियमांछः॥
पाघ्राध्मास्छाम्नादाण्दृश्यार्तिसार्तिशद [illegible] सदांपिबजिघ्र
धमतिष्ठमनयच्छपश्यर्छधौशीयसीदाः॥ज्ञाजनोर्जा॥प्वा
दीनांह्रस्वः॥४॥मीनातेर्निगमे॥मिदेर्गुणः॥जुसिच॥सार्व
धातुकार्द्धधातुकयोः॥जाग्रोविचिण्णल्ङित्सु॥पुगंतलघूप ॥८६॥
धस्यच॥नाभ्यस्तस्याचिपितिसार्वधातुके॥भूसुवोस्तिङि॥

उतोवृद्धिर्लुकिहलि ॥ ऊर्णोतेर्विभाषा ॥ गुणोपृक्ते ॥ तृणहइम् ॥ ब्रु
वईट् ॥ यङोवा ॥ तुरुस्तुशम्यमः सार्वधातुके ॥ अस्तिसिचोपृक्ते
॥ बहुलंछंदसि ॥ रुदश्चपंचभ्यः ॥ अड्गार्ग्यगालवयोः ॥ अदः
सर्वेषां ॥ ५ ॥ अतोदीर्घोयञि ॥ सुपिच ॥ बहुवचनेझल्येत् ॥
ओसिच ॥ आङि॰चापः ॥ संबुद्धौच ॥ अंबार्थनद्योर्ह्रस्वः ॥ ह्रस्व
स्यगुणः ॥ जसिच ॥ ऋतोङि॰सर्वनामस्थानयोः ॥ घेर्ङि॰ति ॥
आण्नद्याः ॥ याडापः ॥ सर्वनाम्नस्याड्ढ्रस्वश्च ॥ विभाषाद्वि
तीयातृतीयाभ्यां ॥ ङेराम्नद्याम्नीभ्यः ॥ इदुद्भ्यां ॥ औत् ॥

अच्च घेः ॥ आङो नास्त्रियां ॥ ६ ॥ देविकाद्विवतास्फायोभुजमीनाते
रतो दीर्घ विंशतिः ॥ ॥ इति सप्तमाध्यायस्य तृतीयः पादः ॥ ॥ दीर्घो
णौ चङ्युपधाया ह्रस्वः ॥ नाग्लोपिशास्वृदितां ॥ भ्राजभासँदीपजीव भाष
मीलपीडामन्यतरस्यां ॥ लोपः पिबतेरीच्चाभ्यासस्य ॥ तिष्ठतेरित् ॥ जि
घ्रतेर्वा ॥ उर्ऋत ॥ नित्यं छंदसि ॥ दयतेर्दिगि लिटि ॥ ऋतश्च संयोगादे
र्गुणः ॥ ऋछत्यॄतां ॥ शॄदॄप्रां ह्रस्वो वा ॥ केणः ॥ न कपि ॥ आपोन्यतरस्यां
॥ ऋदृशोङि गुणः ॥ अस्यतेस्थुक् ॥ श्वयतेरः ॥ पतः पुम् ॥ वच उम् ॥ १ ॥
शीङः सार्वधातुके गुणः ॥ अयङ् यि क्ङिति ॥ उपसर्गाध्रस्व ऊहतेः ॥
एतेर्लिङि ॥ अकृत्सार्वधातुकयोर्दीर्घः ॥ च्वौ च ॥ रीङ् ऋतः ॥ रिङ् शयग्लि

ङ्क्षु ॥ गुणोर्त्तिसंयोगाद्योः ॥ यङि च ॥ ई घ्राध्मोः ॥ अस्य च्वौ ॥ क्य
चि च ॥ अशनायोदन्यधनाया बुभुक्षापिपासागर्द्धेषु ॥ नच्छंदस्य
पुत्रस्य ॥ दुरस्युर्द्रविणस्युर्वृषण्यातिरिषण्यति ॥ अश्वाघस्यात् ॥
देवसुम्नयोर्यजुषिकाठके ॥ कव्यध्वरपतनस्यार्चिलोपः ॥ द्यतिस्य
तिमास्थामित्तिकिति ॥ २ ॥ शाच्छोरन्यतरस्यां ॥ दधातेर्हिः ॥ जहा
तेश्च क्त्वि ॥ विभाषा छंदसि ॥ सुधितवसुधितनेमधित धिष्वधिषी
य च ॥ दो दद्घोः ॥ अच उपसर्गात्तः ॥ अपो भि ॥ सस्यार्द्धधातुके ॥
तासस्त्योर्लोपः ॥ रि च ॥ ह एति ॥ यीवर्णयोर्दीधीवेव्योः ॥ सनि मी

माघुरभलभशकपतपदामचइस्॥आप्ज्ञप्यृधामीत्॥दंभइच्च॥
मुचोकर्मकस्यगुणोवा॥अत्रलोपोभ्यासस्य॥ह्रस्वः॥हलादिः
शेषः॥३॥शर्पूर्वाःखयः॥कुहोश्चुः॥नकवतेर्यङि॥कृषेश्छंद
सि॥दाधर्त्तिदर्धर्त्तिदर्धर्षिबोभूतुतेतिक्तेऽलर्ष्यापनीफणत्संस
निष्यदत्करिक्रत्कनिक्रदद्भरिभ्रद्दविध्वतोदविद्युतत्तरित्रतः
सरीसृपतंवरीवृजन्मर्मृज्यागनीगंतीतिच॥उरत्॥द्युतिस्वा
प्योःसंप्रसारणं॥व्यथोलिटि॥दीर्घइणःकिति॥अतआदेः॥त
स्मान्नुड्द्विहलः॥अश्नोतेश्च॥भवतेरः॥ससूवेतिनिगमे॥

निजांत्रयाणांगुणश्लौ ॥ भृञामित् ॥ अर्त्तिपिपर्त्योश्च ॥ बहुलंछंदसि
॥ सन्यतः ॥ ओः पुयण्ज्यपरे ॥ ७ ॥ स्रवतिशृणोतिद्रवतिप्रवति
प्लवतिच्यवतीनांवा ॥ गुणोयङ्लुकोः ॥ दीर्घोकितः ॥ नीग्वंचुस्रं
सुध्वंसुभ्रंसुकसपतपदस्कंदां ॥ नुगतोनुनासिकांतस्य ॥ जपजभ
दहदशभंजपशांच ॥ चरफलोश्च ॥ उत्परस्यातः ॥ तिच ॥ रीगृदुपध
स्यच ॥ रुग्रिकौचलुकि ॥ ऋतश्च ॥ सन्वल्लघुनिचङ्परेनग्लोपे ॥
दीर्घोलघोः ॥ अत्स्मृदृत्वरप्रथम्रदस्तृस्पशां ॥ विभाषावेष्टिचेष्ट्योः
॥ ईचगणः ॥ ५ ॥ णौचश्रीङः शाच्छोः शर्पूर्वाः स्रवतिसप्तदश ॥ ॥
ङ्

इति सप्तमाध्यायस्य चतुर्थः पा

सर्वस्य द्वे॥ तस्य परमाम्रेडितं॥ अनुदात्तं च॥ नित्यवीप्सयोः॥ परेर्वर्जने॥
प्रसमुपोदः पादपूरणे॥ उपर्यध्यधसः सामीप्ये॥ वाक्यादेरामंत्रितस्या
सूयासंमतिकोपकुत्सनभर्त्सनेषु॥ एकं बहुव्रीहिवत्॥ आबाधे च॥ क
र्मधारयवदुत्तरेषु॥ प्रकारे गुणवचनस्य॥ अकृच्छ्रे प्रियसुखयोरन्यतरस्यां॥ २
यथास्वे यथायथं॥ द्वंद्वं रहस्यमर्यादावचनव्युत्क्रमणयज्ञपात्रप्रयो
गाभिव्यक्तिषु॥ पदस्य॥ पदात्॥ अनुदात्तं सर्वमपादादौ॥ आमंत्रित
स्य च॥ युष्मदस्मदोः षष्ठीचतुर्थीद्वितीयास्थयोर्वांनावौ॥१॥ बहुवचन
स्य वस्नसौ॥ तेमयावेकवचनस्य॥ त्वामौ द्वितीयायाः॥ न चवाहाहैवयु
क्ते॥ पश्यार्थैश्चानालोचने॥ सपूर्वायाः प्रथमाया विभाषा॥ तिङो गो

त्रादीनिकुत्सनाभीक्ष्णययोः॥तिङ्ङतिङः॥नलुट्॥निपातैर्यद्यदिहंतकु
विन्नेच्चण्कच्चिद्यत्रयुक्तं॥नहप्रत्यारंभे॥सत्यंप्रश्ने॥अंगाप्राति
लोम्ये॥हिच॥छंदस्यनेकमपिसाकांक्षं॥यावद्यथाभ्यां॥पूजायांना
नंतरं॥उपसर्गव्यपेतंच॥तुपश्यपश्यताहैः पूजायां॥अहोच॥२॥
शेषेविभाषा॥पुराचपरीप्सायां॥नन्वित्यनुज्ञैषणायां॥किंक्रियाप्र
श्नेनुपसर्गमप्रतिषिद्धं॥लोपेविभाषा॥एहिमन्येप्रहासेलृट्॥
जात्वपूर्वं॥किंवृत्तंचचिदुत्तरं॥आहोउताहोचानंतरं॥शेषेविभाषा॥
गत्यर्थलोटालृण्नचेत्कारकंसर्वान्यत्॥लोट्च॥विभाषितंसोप
सर्गमनुत्तमं॥हंतच॥आमएकांतरमामंत्रितमनंतिके॥यद्धितु

परंछंदसि॥ चनचिदिवगोत्रादितद्धिताम्रेडितेष्वगतेः॥ चादिषु च॥ चवा
योगे प्रथमा॥ हेति क्षियायां॥ ३॥ अहेति विनियोगे च॥ चाहलोप एवेत्य
वधारणं॥ चादिलोपे विभाषा॥ वैवावेति च छंदसि॥ एकान्याभ्यां स
मर्थाभ्यां॥ यद्वृत्तान्नित्यं॥ पूजनात्पूजितमनुदात्तं काष्ठादिभ्यः॥ सग
तिरपि तिङ्॥ कुत्सने च सुप्यगोत्रादौ॥ गतिर्गतौ॥ तिङि चोदात्तव
ति॥ आमंत्रितं पूर्वमविद्यमानवत्॥ नामंत्रिते समानाधिकरणे
सामान्यवचनं॥ विभाषितं विशेषवचने बहुवचनं॥ ४॥ सर्व
स्य बहुवचनस्य शेषे हेति चतुर्दश॥ इत्यष्टमाध्यायस्य प्रथमः पादः॥

पूर्वत्रासिद्धं ॥ नलोपःसुप्स्वरसंज्ञातुग्विधिषुकृति ॥ नमुने ॥ उदात्तःस्वरित
योर्यणःस्वरितोनुदात्तस्य ॥ एकादेश उदात्तेनोदात्तः ॥ स्वरितोवानुदात्ते
पदादौ ॥ नलोपःप्रातिपदिकांतस्य ॥ नङिसंबुध्योः ॥ मादुपधायाश्चम
तोर्वोयवादिभ्यः ॥ झयः ॥ संज्ञायां ॥ आसंदीवदष्ठीवच्चक्रीवत्कक्षीव
द्रुमण्वच्चर्मण्वती ॥ उदन्वानुदधौच ॥ राजन्वान्सौराज्ये ॥ छंदसीरः ॥
अनोनुट् ॥ नाढ्यस्य ॥ कृपोरोलः ॥ उपसर्गस्यायतौ ॥ ग्रसोयङि ॥ १ ॥ अ
चिविभाषा ॥ परेश्चघांकयोः ॥ संयोगांतस्यलोपः ॥ रात्सस्य ॥ धिच ॥ झ
लोझलि ॥ ह्रस्वादंगात् ॥ इटईटि ॥ स्कोःसंयोगाद्योरंतेच ॥ चोःकुः ॥ होढः ॥
दादेर्धातोर्घः ॥ वाद्रुहमुहष्णुहष्णिहां ॥ नहोधः ॥ आहस्थः ॥ व्रश्चभ्रस्जसृ

जमृजयजराजभ्राजछशांषः॥एकाचोबशोभषझषंतस्यस्ध्वोः॥दधस्तथोश्च॥झलांजशोंते॥झषस्तथोर्धोधः॥२॥षढोःकःसि॥रदाभ्यांनिष्ठातोनःपूर्वस्यचदः॥संयोगादेरातोधातोर्यण्वतः॥ल्वादिभ्यः॥ओदितश्च॥क्षियोदीर्घात्॥श्योस्पर्शे॥अंचोनपादाने॥दिवोविजिगीषायां॥निर्वाणोवाते॥शुषःकः॥पचोवः॥क्षायोमः॥प्रस्त्योन्यतरस्यां॥अनुपसर्गात्फुल्लक्षीबकृशोल्लाघाः॥नुदविदोंदत्राघ्राह्रीभ्योन्यतरस्यां॥नध्याख्यापृमूर्छिमदां॥वित्तोभोगप्रत्यययोः॥भित्तंशकलं॥ऋणमाधमर्ण्ये॥

॥३॥नसत्तनिषत्तानुत्तप्रतूर्त्तसूर्त्तगूर्त्तानिछंदसि॥क्विन्प्रत्ययस्य

कुः॥नशेर्वा॥मोनोधातोः॥म्वोश्च॥ससजुषोरुः॥अवयाः श्वेतवाः पुरोडा
श्च॥अहन्॥रोसुपि॥अम्नरूधरवरित्युभयथाछंदसि॥भुवश्चमहाव्या
हृतेः॥वसुस्रंसुध्वंस्वनडुहांदः॥तिप्यनस्तेः॥सिपिधातोरुर्वा॥दश्च॥
र्वोरुपधायादीर्घइकः॥हलिच॥वाक्यस्यटेःप्लुतउदात्तः॥प्रत्यभिवादे
ऽशूद्रे॥दूराद्धूतेच॥× उपधायांच॥नभकुर्छुरां॥अदसोसेर्ददुदोमः॥
॥४॥एतईद्बहुवचने॥× हैहेप्रयोगेहैहयोः॥गुरोरनृतोनंत्यस्याप्येके
कस्यप्राचां॥ओमभ्यादाने॥येयज्ञकर्मणि॥प्रणवष्टेः॥याज्यांतः॥ब्रू
हिप्रेष्यश्रौषड्वौषडावहानामादेः॥अग्नीत्प्रेषणेपरस्यच॥विभाषापृ

ष्टप्रतिवचनेहेः।। निगृह्यानुयोगे च।। आम्रेडितं भर्त्सने।। अंगयुक्तं तिङाकां
क्षं।। विचार्यमाणानां।। पूर्वं तु भाषायां।। प्रतिश्रवणे च।। अनुदात्तं प्रश्नां
ताभिपूजितयोः।।५।। चिदिति चोपमार्थे प्रयुज्यमाने।। उपरिस्विदासी
दिति च।। स्वरितमाम्रेडितेसूयासंमतिकोपकुत्सनेषु।। क्षियाशीःप्रैषे
षु तिङाकांक्षं।। अनंत्यस्यापि प्रश्नाख्यानयोः।। प्लुतावैच इदुतौ।। एचो
प्रगृह्यस्यादूराद्धूते पूर्वस्यार्द्धस्यादुत्तरस्येदुतौ।। तयोर्य्वावचि संहि
तायां।।६।। पूर्वत्राचिषढोर्नसन्नेतुईश्रिदित्यष्टौ।। ।।इत्यष्टमाध्या
यस्य तृतीयः पादः।। ।।मतुवसोरुसंबुद्धौ छंदसि।। अत्रानुना

सिकःपूर्वस्यतुवा॥आतोटिनित्यं॥अनुनासिकात्परोनुस्वारः॥समःसुटि॥
पुमःखय्यमपरे॥नश्छव्यप्रशान्॥उभयथर्क्षु॥दीर्घादटिसमानपादे॥
नॄन्पे॥स्वतवान्पायो॥कानाम्रेडिते॥ढोढेलोपः॥रोरि॥खरवसानयो
र्विसर्जनीयः॥रोःसुपि॥भोभगोअघोअपूर्वस्ययोशि॥व्योर्लघुप्रय
त्नतरः शाकटायनस्य॥लोपःशाकल्यस्य॥ओतोगार्ग्यस्य॥१॥उञि
चपदे॥हलिसर्वेषां॥मोनुस्वारः॥नश्चापदान्तस्यझलि॥मोराजिसमः
क्वौ॥हेमपरेवा॥नपरेनः॥ङ्णोःकुक्टुक्शरि॥डःसिधुट्॥नश्च॥शितुक्॥
ङमोह्रस्वादचिङमुण्नित्यं॥मयउञोवोवा॥विसर्जनीयस्यसः॥शर्परेविस
र्जनीयः॥वाशरि॥कुप्वोःकःपौच॥सोपदादौ॥इणःषः॥नमस्पुरसोर्गत्योः॥२॥

ग्मोः

९२ इदुदुपधस्यचाप्रत्ययस्य॥तिरसोन्यतरस्यां॥द्विस्त्रिश्चतुरितिकृत्वोर्थे॥
इसुसोःसामर्थ्ये॥नित्यंसमासेनुत्तरपदस्थस्य॥अतःकृकमिकंसकुंभ
पात्रकुशाकर्णीष्वनव्ययस्य॥अधःशिरसीपदे॥कस्कादिषुच॥छंदसि
वाप्राम्रेडितयोः॥कः करत्करतिकृधिकृतेष्वनदितेः॥पंचम्याःपराव
ध्यर्थे॥पातौचबहुलं॥षष्ठ्याःपतिपुत्रपृष्ठपारपदपयस्पोषेषु॥इ
डायावा॥अपदांतस्यमूर्धन्यः॥सहेःसाडःसः॥इण्कोः॥नुम्विसर्जनी
यशर्व्यवायेपि॥आदेशप्रत्यययोः॥शासिवसिघसीनांच॥३॥स्तौ
तिण्योरेवषण्यभ्यासात्॥सस्विदिस्वदिसहीनांच॥प्राक्सितादड्
ये व्यवायेपि॥स्थादिष्वभ्यासेनचाभ्यासस्य॥उपसर्गात्सुनोतिसुवतिस्यति ९२

स्तौतिस्तोभतिस्थासेनयसेधसिचसंजस्वंजां॥ सदिरप्रतेः॥ स्तंभेः॥ अवाच्चालंबनाविदूर्ययोः॥ वेश्चस्वनोभोजने॥ परिनिविभ्यः सेवसितसयसिवुसहसुट्स्तुस्वंजां॥ सिवादीनांवाड्व्यवायेपि॥ अनुविपर्यभिनिभ्यःस्यंदतेरप्राणिषु॥ वेस्कंदेरनिष्ठायां॥ परेश्च॥ परिस्कंदः प्राच्यभरतेषु॥ स्फुरतिस्फुलत्योर्निर्निविभ्यः॥ वेस्कभ्नातेर्नित्यं॥ इणःषीध्वंलुङ्लिटांधोंगात्॥ विभाषेटः॥ समासेंगुलेः संगः॥ ४॥ भीरोस्थानं॥ अग्नेस्तुत्स्तोमसोमाः॥ ज्योतिरायुषस्तोमः॥ मातृपितृभ्यांस्वसा॥ मातुःपितुर्भ्यामन्यतरस्यां॥ अभिनिसस्तनः शब्दसंज्ञायां॥ उपसर्गप्रादुर्भ्यामस्तिर्यच्परः॥ सुविनिर्दुर्भ्यः सुपिसूतिसमाः॥ निनदीभ्यांस्नातेःकौश

सू॰पा॰ २।३।२ छंदोनाम्नि च ॥ गवियुधिभ्यां स्थिरः ॥
९४ ले ॥ सूत्रंप्रतिष्णातं ॥ कपिष्ठलोगोत्रे ॥ प्रष्ठोग्रगामिनि ॥ वृक्षासनयोर्विष्टरः ॥
विकुशमिपरिभ्यस्थलं ॥ अंबांबगोभूमिसव्यापद्वित्रिकुशेकुशंक्वंगुमंजि
पुंजिपरमेबर्हिर्दिव्यग्निभ्यस्थः ॥ सुषामादिषु च ॥ एति संज्ञायामगात् ॥
नक्षत्राद्वा ॥ ५ ॥ ह्रस्वात्तादौ तद्धिते ॥ निसस्तपतावनासेवने ॥ युष्मत्तत्त
तक्षुष्वंतःपादं ॥ यजुष्येकेषां ॥ स्तुतस्तोमयोश्छंदसि ॥ पूर्वपदात् ॥ सु
ञः ॥ सनोतेरनः ॥ सहेः पृतनर्ताभ्यां च ॥ नरपरसृपिसृजिस्पृशिस्पृहि
सवनादीनां ॥ सात्पदाद्योः ॥ सिचो यङि ॥ सेधतेर्गतौ ॥ प्रतिस्तब्धनिस्त
ब्धौ च ॥ सोढः ॥ स्तंभुसिवुसहां चङि ॥ सुनोतेः स्यसनोः ॥ सदिः स्वंज्योः पर
स्य लिटि ॥ निव्यभिभ्योड्व्यवाये वा छंदसि ॥ द्वा ॥ ॥ मतुवसोरुजिचेदुदु ९४

पधस्तोतिण्योभश्रोक्ष्रस्यादेकोनविंशतिः॥ ॥इतिअष्टमाध्यायस्यतृ
तीयःपादः॥ ॥रषाभ्यांनोणःसमानपदे॥अट्कुप्वाङ्नुम्व्यवायेपि॥पूर्व
पदात्संज्ञायामगः॥वनंपुरगामिश्रकासिँसारिकाकोटराग्रेभ्यः॥प्रनिरंतःश
रेक्षुप्लक्षाम्रकार्ष्यखदिरपीयूक्षाभ्योसंज्ञायामपि॥विभाषौषधिवनस्प
तिभ्यः॥अह्नोदंतात्॥वाहनमाहितात्॥पानंदेशे॥वाभावकरणयोः॥
प्रातिपदिकांतनुम्विभक्तिषुच॥एकाजुत्तरपदेणः॥कुमतिच॥उ
पसर्गादसमासेपिणोपदेशस्य॥हिनुमीना॥आनिलोट्॥नेर्गदनदपत
पदघुमास्यतिहंतियातिवातिद्रातिप्सातिवपतिवहतिशाम्यतिचिनो
तिदेग्धिषुच॥शेषेविभाषाकखादावषांतउपदेशे॥अनितेः॥अंतः॥३१॥

सू०पा०
९५

उभौसाभ्यासस्य॥हंतेरत्पूर्वस्य॥वमोर्वा॥अंतरदेशे॥अयनंच॥छंदस्यृदव
ग्रहात्॥नश्चधातुस्थोरुषुभ्यः॥उपसर्गाद्बहुलं॥कृत्यचः॥णेर्विभाषा॥
हलश्चेजुपधात्॥इजादेःसनुमः॥वानिंसनिक्षनिंदां॥नभाभूपूक
मिगमिप्यायीवेपां॥षात्पदांतात्॥नशेःषांतस्य॥पदांतस्य॥पद
व्यवायेपि॥क्षुभ्नादिषुच॥स्तोःश्चुनाश्चुः॥२॥ष्टुनाष्टुः॥नपदांता
ट्टोरनां॥तोःषि॥शात्॥यरोनुनासिकेनुनासिकोवा॥अचोरह
भ्यांद्वे॥अनचिच॥नादिन्याक्रोशेपुत्रस्य॥शरोचि॥त्रिप्रभृति
षुशाकटायनस्य॥सर्वत्रशाकल्यस्य॥दीर्घादाचार्याणां॥झलां ९५

सू॰पा॰

१६

र

जश्झशि ॥ अभ्यासे च चर् ॥ खरि च ॥ वावसाने ॥ अणोऽप्रगृह्यस्यानुनासिकः ॥
अनुस्वारस्य ययि परसवर्णः ॥ वा पदांतस्य ॥ तोर्लि ॥ २॥ उद स्थाः स्तंभोः पू
र्वस्य ॥ झयो होऽन्यतरस्यां ॥ शश्छोऽटि ॥ हलो यमां यमि लोपः ॥ झरो झरि
सवर्णे ॥ उदात्तादनुदात्तस्य स्वँतः ॥ नोदात्तः स्वरितोदयमगार्ग्यकाश्य
पगालवानां ॥ अ अ इति ॥ ८ ॥ रषाभ्यामुभौष्टुनोदःस्थाःष्टौ ॥
इति अष्टमाध्यायस्य चतुर्थपादः ॥ ॥ संवत् १८ ५६ वैशाख
शुद्ध ४ गुरुवासरे तद्दिने इदं पुस्तकं समाप्तं ॥ श्रीगजानना
र्पणमस्तु ॥ छ ॥ गजा ॥ नन ॥ छ ॥ गजा ॥ नन ॥ छ ॥

१६

राम

॥ इति अष्टाध्यायी समाप्ता ॥

॥अथपूर्वषट्कप्रारंभः

नि॰पू॰१
१

श्रीगणेशायनमः॥हरिः॥ॐ३॥समाम्नायःसमाम्नातःसव्याख्यातव्यस्तमिमंसमा
म्नायंनिघंटवइत्याचक्षतेनिघंटवःकस्मान्निगमाइमेभवंतिछंदोभ्यःसमाहृत्यस
माहृत्यसमाहृत्यसमाम्नातास्तेनिगंतवएवसंतोनिगमानान्निघंटवउच्यंतइत्यौपम
न्यवोऽपिवाहननादेवस्युःसमाहताभवंतियद्वासमाहृताभवंतितद्यान्येतानिचत्वा
रिपदजातानिनामाख्यातेचोपसर्गनिपाताश्चतानीमानिभवंतितत्रैतन्नामाख्यात
योर्लक्षणंप्रदिशंतिभावप्रधानमाख्यातंसत्वप्रधानानिनामानितद्यत्रोभेभावप्रधा
नेभवतःपूर्वापरीभूतंभावमाख्यातेनाचष्टेव्रजतिपचतीत्युपक्रमप्रभृत्यपवर्ग

राम॰
१

पर्यंतं मूर्तं सत्वभूतं सत्वनामभिर्व्रज्यापक्तिरित्यद इति [redacted] सत्वानामुपदेशो गौरश्वः
पुरुषो हस्तीति भवतीति भावस्यास्ते शेते व्रजति तिष्ठतीती द्रियनित्यं वचनमौदुंबरायणः॥
१॥ तत्र चतुष्ट्वं नोपपद्यते युगपदुत्पन्नानां वा शब्दानामितरेतरोपदेशः शास्त्रकृतो यो
गश्च व्याप्तिमत्वात्तु शब्दस्याणीयस्त्वाच्च शब्देन संज्ञाकरणं व्यवहारार्थं लोके तेषां मनुष्य
वद्देवताभिधानं पुरुषविद्यानित्यत्वात्कर्मसंपत्तिर्मंत्रो वेदे षड्भावविकारा भवंतीति वा
र्ष्यायणिर्जायतेस्ति विपरिणमते वर्धतेपक्षीयते विनश्यतीति जायत इति पूर्वभावस्या
दिमाचष्टे नापरभावमाचष्टे न प्रतिषेधत्यस्तीत्युत्पन्नस्य सत्वस्यावधारणं विपरिणाम

निपू०१ तद्दत्यप्रच्यवमानस्यंतत्साद्धिकारं वर्धत इति स्वांगाभ्युच्चयं सांयोगिनां वार्थानां व का १
२ र्धते विजयेनेति वा वर्धते शरीरेणेति वापक्षीयत इत्येतेनैव व्याख्यातः प्रतिलो
मं विनश्यतीत्यपरभावस्यादिमाचष्टे न पूर्वभावमाचष्टे न प्रतिषेधति ॥२॥ अतोन्ये
भावविकाराएतेषामेव विकारा भवंतीति ह स्माह ते यथावचनमभ्युहितव्यांननि
र्बद्धा उपसर्गा अर्थान्निराहुरिति शाकटायनो नामाख्यातयोस्तु कर्मोपसंयोग
द्योतका भवंत्युच्चावचाः पदार्था भवंतीति गार्ग्यस्तद्य एषु पदार्थः प्राहुरिमे तन्नामा राम०
ख्यातयोरर्थविकरणमाइत्यर्वागर्थे प्रपरेत्येतस्य प्रातिलोम्यमभीत्याभिमुख्यं प्रती २

१ भिपू स्येतस्यप्रातिलोम्यमतिसुइत्सौंजितार्थैनिर्दुरित्येतयोःप्रातिलोम्यंन्यवेतिविनिग्रहा
र्थीयौउदित्येतयोःप्रातिलोम्यंसमित्येकीभावंव्यपेत्येतस्यप्रातिलोम्यमन्वितिसादृश्या
परभावमपीतिसंसर्गमुपेत्युपजनंपरीतिसर्वतोभावमधीत्युपरिभावमैश्वर्यंवैवमु
च्चावचानर्थान्प्राहुस्तउपेक्षितव्याः ॥३॥ अथनिपाताउच्चावचेष्वर्थेषुनिपतंत्यप्युप
मार्थेपिकर्मोपसंग्रहार्थेपिपदपूरणास्तेषामेतेचत्वारउपमार्थेभवंतीवेतिभाषायां
२ नेति चान्वध्यायंचाग्निरिवेंद्रइवेतिप्रतिषेधार्थीयोभाषायामुभयमन्वध्यायंनेंद्रंदेवम
मंसतेतिप्रतिषेधार्थीयःपुरस्तादुपाचारस्तस्ययत्प्रतिषेधतिदुर्मदासोनसुरायामि

नि० पू० १
३

त्युपमार्थः येउपरिष्टादुपाचारस्तस्य येनोपमिमीते चिदित्येषोनेककर्माऽऽचार्यश्चिदिदं
ब्रूयादिति पूजायामाचार्यः कस्मादाचार्य आचारं ग्राहयत्याऽऽचिनोत्यर्थानाऽऽचिनोति बु
द्धिमिति वा दधि चिदित्युपमार्थे कुल्माषांश्चिदाहरेत्यवकुत्सिते कुल्माषाः कुलेषु सीदं
ति नु इत्येषोनेककर्मेदं नु करिष्यतीति हेत्वपदेशे कथं नु करिष्यतीत्यनुपृष्टे नन्वेतदका
र्षीदिति चाथाप्युपमार्थे भवति॥ वृक्षस्य नु ते पुरुहूत वयाः॥ वृक्षस्येव ते पुरुहूत शाखा
वयाः शाखा वेतेर्वातायना भवंति शाखाः खशयाः शक्नोतेर्वाथ यस्यागमादर्थपृथक्त्व
मह विज्ञायते न त्वौद्देशिकमिव विग्रहेण पृथक्त्वात्स कर्मोपसंग्रहश्चेति समुच्चयार्थ उभा

राम०
३

1

भ्यांसंप्रयुज्यतेहंचत्वंचवृत्रहन्नित्येतस्मिन्नेवार्थेदेवेभ्यश्चपितृभ्यएत्याकारोवेतिविचारणा
र्थेहंताहंपृथिवीमिमांनिदधानीहवेहवेत्यथापिसमुच्चयार्थेभवति॥४॥वायुर्वात्वाम
नुर्वात्वेति॥अहइतिचहइतिचैवविनिग्रहार्थीयौपूर्वेणासंप्रयुज्येतेअयमहेदंकरोत्वय
मिदमिदंहकरिष्यतीदंनकरिष्यतीत्यथाप्युकारएतस्मिन्नेवार्थेउत्तरेणमृषेमेवदंति
सत्यमुतेवदंतीत्यथापिपदपूरणांइदमुतदुहीत्येषोनेककर्मेदंहिकरिष्यतीतिहेत्वपदे
शेकथंहिकरिष्यतीत्यनुपृष्टेकथंहिव्याकरिष्यतीत्यसूयायांकिलेतिविद्याप्रकर्षेएवं
किलेत्यथापिननुइत्येताभ्यांसंप्रयुज्यतेनुपृष्टेनकिलैवंननुकिलैवंमेतिप्रतिषेधेमा

कार्षीर्माहार्षीरितिचखल्वितिचखलुकृत्वाखलुकृतमथापिपदपूरणःऽएवंखलुतद्ब
भूवेतिशश्वदितिविचिकित्सार्थीयोभाषायांशश्वदेवमित्यनुपृष्टेएवंशश्वदित्यस्वयं
पृष्टेनूनमितिविचिकित्सार्थीयोभाषायामुभयमन्वध्यायंविचिकित्सार्थीयश्चपदपू
रणश्चागस्त्यइंद्रायहविर्निरुप्यमरुद्भ्यःसंप्रदित्सांचकारसइंद्रएत्यपरिदेवयांचक्रे
प॥ननूनमस्तिनोश्वःकस्तद्वेदयदद्भुतं॥अन्यस्यचित्तमभिसंचरेण्यमुताधीतंविनश्य
ति॥ननूनमस्त्यद्यतनंनोएवश्वस्तनमद्यास्मिन्द्यविद्युरित्यह्नोनामधेयंद्योततइतिस
तःश्वउपाशंसनीयःकालोह्योहीनःकालः॥कस्तद्वेदयदद्भुतं॥कस्तद्वेदयदभूतमिदमपी

तरदद्भुतमभूतमिवान्यस्यचित्तमभिसंचरेण्यमभिसंचार्यमन्योनानेयश्वित्वंचेततेरु
ताधीतंविनश्यतीत्यप्याध्यातंविनश्यत्याध्यातमभिप्रेतमथापिपदपूरणाः॥६॥नूनं
सातेप्रतिवरंजरित्रेदुहीयदिंद्रदक्षिणामघोनी॥शिक्षास्तोतृभ्योमातिधग्भगोनोबृह
द्वदेमविदथेसुवीराः॥सातेप्रतिदुग्धांवरंजरित्रेवरोवरयितव्योभवतिजरितागरि
तादक्षिणामघोनीमघवतीमघमितिधननामधेयंमंहतेर्दानकर्मणोदक्षिणादक्षे
तेःसमर्धयतिकर्मणोव्यृद्धंसमर्धयतीत्यपिवाप्रदक्षिणागमनाद्दिशमभिप्रेत्यदिग्घ
स्तप्रकृतिर्दक्षिणोहस्तोदक्षतेरुत्साहकर्मणोदाशतेर्वास्याद्दानकर्मणोहस्तोहंतेःप्रा

नि०पू०१ मुर्हननैदहि स्तोतृभ्यः कामान्मास्मानन्निदं हीर्मास्मानतिहाय दाभगो नोस्तु बृहद्वदेमस्त्व
८ वेदने भगो भजतेर्बृहदिति महतो नामधेयं परिवृढं भवति वीरवंतः कल्याणवीरा वा
वीरो वीरयत्यमित्रान्वेतेर्वा स्याद्गतिकर्मणो वीरयतेर्वा सीमिति परिग्रहार्थीयो वा पद दा
पूरणो वा॥ प्रसीमादित्यो असृजत्॥ प्रासृजदिति वा प्रासृजत्सर्वत इति वा विसीमतः
सुरुचो वेन आवरितिर्व्यवृणोत्सर्वत आदित्यः सुरुच आदित्यरश्मयः सुरोचनादपि
वा सीमेत्येतदनर्थकमुपबंधमाददीतं पंचमीकर्माणं सीम्नः सीमतः सीमातो मर्यादा राम०
तः सीमा मर्यादा विषीव्यति देशाविति त्वइति विनिग्रहार्थीयं सर्वनामानुदात्तमर्धना ५

मेत्येके ॥७॥ ऋचां त्वः पोषमास्ते पुपुष्वान्गायत्रं त्वो गायति शाक्करीषु ॥ ब्रह्मा त्वो वदति
जातविद्यां यज्ञस्य मात्रां विमिमीत उ त्वः ॥ इत्यृत्विक्कर्मणां विनियोगमाचष्टे ऋचामे
कः पोषमास्ते पुपुष्वान्होतर्गर्चनी गायत्रमेको गायति शाक्करीषूद्गातायँत्रं गायतेः स्तु
तिकर्मणः शाक्कर्य ऋचः शक्नोतेस्तद्यदाभिर्वृत्रमशकद्धंतुं तच्छक्करीणां शाक्करीत्वमि
ति विज्ञायते ब्रह्मैको जातेजाते विद्यां वदति ब्रह्मा सर्वविद्यः सर्वं वेदितुमर्हति ब्र
ह्मा परिवृढः श्रुततो ब्रह्म परिवृढं सर्वतो यज्ञस्य मात्रां विमिमीत एकोऽध्वर्युरध्वर्युरध्व
रयुरध्वरं युनक्त्यध्वरस्य नेताध्वरं कामयत इति वाधीयाने युरुपबंधोऽध्वर इति यज्ञ

३

नि॰पू॰१ नामध्वरइतिहिंसाकर्मातत्प्रतिषेधोनिपातइत्येकेतत्कथमनुदात्तप्रकृतिनामस्याद्दृष्टव्य
६ यंतुभवत्युतत्वंसख्येस्थिरपीतमाहुरितिद्वितीयायामुतोत्वस्मैतन्वंविसस्रइतिचतुर्थ्या
मथापिप्रथमाबहुवचने॥८॥अक्षण्वंतःकर्णवंतःसखायोमनोजवेष्वसमाबभूवुः॥
आदघ्नासउपकक्षासउत्वेह्रदाइवस्नात्वाउत्वेददृश्रे॥अक्षिमंतःकर्णवंतःसखायोक्षि
चष्टेरनक्तेरित्याग्रायणस्तस्मादेतेव्यक्ततरेइवभवतइतिहविज्ञायतेकर्णःकृंतते
र्निकृत्तद्वारोभवत्यृच्छतेरित्याग्रायणऋच्छंतीवखेउदगंतामितिहविज्ञायतेमनसां राम॰
प्रजवेष्वसमाबभूवुरास्यदघ्नाअपरउपकक्षदघ्नाअपरआस्यमस्यतेरास्यंदतए ६

नदन्नमितिवा दम्नदघ्यतेः स्त्रवतिकर्मणो दस्यतेर्वा स्याद्धिदस्ततरं भवति म स्ते याद्कदाद्
वैकैमस्ते याद ददृशिरे स्नानार्हो ह्रदो ह्रादतेः शब्दकर्मणो ह्लादतेर्वा स्याच्छीती भावकर्म
णोऽथापि समुच्चयार्थे भवति पर्याया इव त्वदाश्विनमाश्विनं च पर्यायाश्चेत्यथ ये प्रवृत्ते
र्थेऽमिताक्षरेषु ग्रंथेषु वाक्यपूरणा आगच्छंति पदपूरणास्ते मिताक्षरेष्वनर्थकाः कमी
मिद्विति ॥ १ ॥ निष्टक्व्रासश्चिदिन्नरो भूरितोका वृकादिव ॥ बिभ्यस्यंतो ववाशिरे शिशिरं
जीवनायकं ॥ शिशिरं जीवनाय ॥ शिशिरं शृणातेः शम्नातेर्वा ॥ एमेनं सृजता सुते ॥
आसृजतैनं सुते ॥ तमिद्वर्धंतु नो गिरः ॥ तं वर्धयंतु नो गिरः स्तुतयो गिरो गृणातेः ॥ अ

यमुंते॒समतसि॥ अयंतेस्ममतसीवोपिदृश्यतेसुविदुरिवसुविज्ञायेतेइवाथापिनेत्येष
इदित्येतेनसंप्रयुज्यतेपरिभये॥१०॥ ह॒विर्भि॒रेके॒स्वरि॒तःसचंतेसु॒न्वंत॒एके॒सवनेषु॒सो
मान्॥ शची॒र्मदंतउ॒तदक्षिणाभि॒र्नेज्जिह्मायंत्योनरकंपतामेतिनरकंन्यरकंनीचैर्ग
मनंनास्मिन्रमणंस्थानमल्पमप्यस्तीतिवा॥ अथापिनचेत्येषइदित्येतेनसंप्रयुज्यतेनुपृ
ष्टेनचेत्सुरांपिबंतीतिसुरासुनोतेरेवमुच्चावचेष्वर्थेषुनिपतंतीतितउपेक्षितव्याः॥११॥
इतीमानिचत्वारिपदजातान्यनुक्रांतानिनामाख्यातेचोपसर्गनिपाताश्चतत्रनामान्या
ख्यातजानीतिशाकटायनोनैरुक्तसमयश्चनसर्वाणीतिगार्ग्योवैयाकरणानांचैकेत

यत्रस्वरसंस्कारौसमर्थौप्रादेशिकेनगुणेनान्वितौस्यातांसंविज्ञातानितानियथागौरश्वः
पुरुषोहस्तीत्यथचेत्सर्वाण्याख्यातजानिनामानिस्युर्यःकश्चतत्कर्मकुर्यात्सर्वंतत्स
त्वंतथाचक्षीरन्यःकश्चाध्वानमश्नुवीताश्वःसवचनीयःस्याद्यत्किंचित्तृंद्यात्तृणंतदथा
पिचेत्सर्वाण्याख्यातजानिनामानिस्युर्यावद्भिर्भावैःसंप्रयुज्येततावद्भ्योनामधेयप्र
तिलंभःस्यात्तत्रैवंस्थूणादरशयावासंजनीचस्यात् ॥ १२ ॥ अथापियएषांन्यायवान्का
र्मनामिकःसंस्कारोयथाचापिप्रतीतार्थानिस्युस्तथैनान्याचक्षीरन्पुरुषंपुरिशयइत्या
चक्षीरन्नष्टेत्यश्वंतर्दनमितितृणमथापिनिष्पन्नेभिव्याहारेभिविचारयंतिप्रथनात्पृ

नि०पू०१ थिवीत्याहुः कएनामप्रथयिष्यत्किमाधारश्चेत्यथानन्वितेर्थेप्रादेशिके विकारेपदेभ्यः पदे
८ तरार्धान्संचस्कार शाकटायनं एतेः कारितंच यकारादिंचांतकरणमस्तेः शुद्धंच सका
रादिंचाथापि सत्वपूर्वोभावइत्याहुरपरस्माद्भावात्पूर्वस्य प्रदेशोनोपपद्यतइतितदेतन्नो वा३
पपद्यते॥१३॥ यथोहिनुवाएतत्तद्यत्रस्वरसंस्कारौसमर्थौप्रादेशिकेनगुणेनान्वितौस्या १२।
तांसर्वंप्रादेशिकमित्येवंसत्यनुपालंभएषभवतियथोएतद्यःकश्चतत्कर्मकुर्यात्सर्वंत
त्सत्वंतथाचक्षीरन्नितिपश्यामःसमानकर्मणांनामधेयप्रतिलंभमेकेषांनैकेषांयथा राम०
तक्षापरिव्राजकोजीवनोभूमिजइत्येतेनैवोत्तरःप्रत्युक्तोयथोएतद्यथाचापिप्रतीता ८

थोनिस्युस्तथैनान्याचक्षीरन्निति संसल्पप्रयोगाः कृतोप्यैकपदिकाः यथाव्रततिर्दमूनाजा
त्यआट्णारोजागरूकोदर्विहोमीति यथो एतन्निष्पन्नेभिव्याहारेभिविचारयंतीति भवति
हि निष्पन्नेभिव्याहारे योगपरीष्टिः प्रथनात्पृथिवीत्याहुः क एनामप्रथयिष्यत्किमाधा
रश्चेत्यथवेदर्शनेनप्रथुरप्रथिताचेदंप्यन्यैरथाप्येवंसर्वएवदृष्टप्रवादाउपालभ्यंते
यथो एतत्पदेभ्यः पदेतरार्धान्संचस्कारेति योनन्वितेर्थे संचस्कार स तेन गर्ह्यः सैषा
पुरुषगर्हा न शास्त्रगर्हा इति यथो एतदपरस्माद्भावात्पूर्वस्य प्रदेशो नोपपद्यत इति प
श्यामः पूर्वोत्पन्नानां सत्वानामपरस्माद्भावान्नामधेयप्रतिलंभमेकेषां नैकेषां यथावि

निपू०१
९

त्वादोलंबच्चूउकइतिबिल्वंभरणाद्वाभेदनाद्वा॥१४॥ अथापीदमंतरेणमंत्रेष्वर्थप्रत्ययो
नविद्यतेर्थमप्रतियतोनात्यंतंस्वरसंस्कारोद्देशस्तदिदंविद्यास्थानंव्याकरणस्यकार्त्स्न्यं
स्वार्थसाधकंचयदिमंत्रार्थप्रत्ययायानर्थकंभवतीतिकौत्सोनर्थकाहिमंत्रास्तदेतेनोपे
क्षितव्यंनियतवाचोयुक्तयोनियतानुपूर्व्याभवंतथापिब्राह्मणेनरूपसंपंनाविधीयंतउ
रुप्रथस्वेतिप्रथयति [redacted] प्रोहाणीतिप्रोहत्यथाप्यनुपपन्नार्थाभवंत्योषधेत्राय
स्वैनंस्वधितेमैनंहिंसीरित्याहहिंसंनथापिविप्रतिषिद्धार्थाभवंति॥ एकंएवरुद्रोवतस्थे
नद्वितीयः॥ असंख्यातासहस्राणियेरुद्राअधिभूम्यां॥ अशत्रुरिंद्रजज्ञिषेशतंसेनाअज

राम०
९

यत्साकमिंद्र इत्यथापिजानंतंसंप्रेष्यत्यग्नयेसमिध्यमानायानुब्रूहीत्यथाप्याहादितिः सर्वमि
त्यदितिर्द्यौरदितिरंतरिक्षमितितदुपरिष्टाद्व्याख्यास्यामोथाप्यविस्पष्टार्था भवंत्यम्यग्या
दृश्मिञ्जारयायि काणुकेति॥१५॥ अर्थवंतः शब्दसामान्यादेतद्वैयज्ञस्य समृद्धंयद्रूपसमृ
द्धंयत्कर्मक्रियमाणमृग्यजुर्वाभिवदतीतिच ब्राह्मणंक्रीळंतौपुत्रैर्नप्तृभिरितियथोएत
१७५॥ न्नियतवाचोयुक्तयोनियतानुपूर्व्या भवंतीतिलौकिकेष्वप्येतद्यथेंद्राग्नी पितापुत्रावि
तियथोएतद्ब्राह्मणेनरूपसंपन्नाविधीयंतइत्युदितानुवादः सभवतियथोएतदनु
पपन्नार्था भवंतीत्याम्नायवचनादहिंसाप्रतीयेतयथोएतद्विप्रतिषिद्धार्थाभवंतीतिलो

नि०पू०१ किकेष्वप्येतद्यथासपत्नोयंब्राह्मणोनंमित्रोराजेतियथोएतज्जानंतंसंप्रेष्यतीतिजानंत
१० मभिवादयतेजानतेमधुपर्कंप्राहेतियथोएतददितिःसर्वमितिलौकिकेष्वप्येतद्य
थासर्वरसाअनुप्राप्ताःपानीयमितियथोएतद्विस्पष्टार्थाभवंतीतिनैषस्थाणोरप
राधोयदेनमंधोनपश्यतिपुरुषापराधःसभवतियथाजानपदीषुविद्यातःपुरुष
विशेषोभवतिपारोवर्यवित्सुतुखलुवेदितृषुभूयोविद्यःप्रशस्योभवति॥१६॥अ
थापीदमंतरेणपदविभागोनविद्यते॥अवसायपद्वतेरुद्रमृळेतिपद्वदवसंगावःप राम०
थ्यदनमवतेर्गत्यर्थस्यासोनामकरणस्तस्मान्नावगृह्णंत्यवसायाश्वानितिस्यतिरु १०

पसृष्टोविमोचनेनैतस्मादवगृह्णंतिदूतोनिर्ऋत्याइदमाजगामेतिपंचम्यर्थप्रेक्षावाषष्ठ्य
र्थप्रेक्षावाःकारांतंपरोनिर्ऋत्याआचक्ष्वेतिचतुर्थ्यर्थेप्रेक्षैकारांतंपरःसंनिकर्षःसंहि
तापदप्रकृतिःसंहितापदप्रकृतीनिसर्वचरणानांपार्षदान्यथापियाज्ञेदैवतेनबह
वःप्रदेशाभवंतितदेतेनोपेक्षितव्यंतेचेद्ब्रूयुर्लिंगज्ञाअत्रस्मइति।।इंद्रंनत्वाशवसा
देवतावायुंपृणंतीतिवायुलिंगंचेंद्रलिंगंचाग्नेयेमंत्रेऽग्निरिवमन्योत्विषितःसहस्वे
तितथाग्निर्मान्यवेमंत्रेत्विषितोज्वलितस्त्विषिरित्यप्यस्यदीप्तिनामभवत्यथापिज्ञा
नप्रशंसाभवत्यज्ञाननिंदाच।।१७।।स्थाणुरयंभारहारःकिलाभूदधीत्यवेदंनविजा

नि० पू० १ नातियोर्थं॥ योर्थज्ञइत्सकलंभद्रमश्नुतेनाकमेतिज्ञानविधूतपाप्मा॥ यद्गृहीतमवि
११ ज्ञातंनिगदेनैवशब्द्यते॥ अनग्नाविवशुष्कैधोनतज्ज्वलतिकर्हिचित्॥ स्थाणुस्ति
ष्ठतेरर्थोर्तेररणस्थोवा॥१८॥ उतत्वःपश्यन्नददर्शवाचमुतत्वःशृण्वन्नशृणोत्ये
नां॥ उतोत्वस्मैतन्वं१विसस्रेजायेवपत्यउशतीसुवासाः॥ अप्येकःपश्यन्नपश्यति
३म वाचँपिचशृण्वन्नशृणोत्येनामित्यविद्वांसमार्धमप्येकस्मैतन्वंविसस्रइतिस्वमा हा २
त्मानंविवृणुतेज्ञानंप्रकाशनमर्थस्याहानयावाचोपमोत्तमयाजायेवपत्येकामय राम०
मानासुवासाऋतुकालेषुसुवासाःकल्याणवासाःकामयमानाऋतुकालेषुयथा ११

२वाचो

सएनांपश्यतिसशृणोतीत्यर्थज्ञप्रशंसातस्योत्तराभूयसेनिर्वचनाय॥१९॥उतत्वंस
ख्येस्थिरपीतमाहुर्नैनंहिन्वंत्यपिवाजिनेषु॥अधेन्वाचरतिमाययैषवाचंशुश्रु
वाँःअफलामपुष्पां॥अप्येकंवाक्सख्येस्थिरपीतमाहूरममाणंविपीतार्थंदेव
सख्येरमणीयेस्थानइतिवाविज्ञातार्थंयन्नाप्नुवंतिवाग्ज्ञेयेषुबलवत्स्वप्यधेन्वा क.४
ह्येषचरतिमाययावाक्प्रतिरूपयानास्मैकामान्दुग्धेवाग्दोह्यान्देवमनुष्यस्थाने
षुयोवाचंश्रुतवान्भवत्यफलामपुष्पामित्यफलास्माअपुष्पावाग्भवतीतिवाकिं
चित्पुष्पफलेतिवार्थंवाचःपुष्पफलमाहयाज्ञदैवतेपुष्पफलेदेवताध्यात्मेवास्मा

नि॰पू॰१ क्षात्कृतधर्माण ऋषयोबभूवुस्तेवरेभ्योसाक्षात्कृतधर्मभ्य उपदेशेनमंत्रान्त्संप्रादु

१२ रुपदेशायग्लायंतोवरेबिल्मग्रहणायेमंग्रंथंसमाम्नासिषुर्वेदंच्चवेदांगानिचबि

ल्मंभिल्मंभासनमितिवैतावंतःसमानकर्माणोधातवोधातुर्दधातेरेतावंत्यस्य

सत्वस्यनामधेयान्येतावतामर्थानामिदमभिधानंनैघंटुकमिदंदेवतानामप्रा

दै धान्येनेदमितितद्यदन्यदैवतेमंत्रेनिपततिनैघंटुकंतत्॥ अश्वंनत्वावारवंतं॥

२ तं अश्वमिवत्वावालवँवालादंशवारणार्थाभवंतिदंशोदशतेः॥ मृगोनभीमःकुच राम॰

रोगिरिष्ठाः॥ मृगइवभीमःकुचरोगिरिष्ठांमृगोमार्ष्टेर्गतिकर्मणोभीमोबिभ्य १२

सस्माद्गीष्मोप्येतस्मादेवकुवरइतिचरतिकर्मकुत्सितमऽथचेद्देवताभिधानंक्वा
यन्न्वरतीतिगिरिष्ठागिरिस्थायीगिरिःपर्वतःसमुद्गीर्णोभवतिपर्ववान्पर्वतः
पर्वपुनःपृणातेःप्रीणातेर्वार्धमासपर्वदेवानस्मिन्प्रीणंतीतितत्प्रकृतीतरत्संधिसा
मान्यान्मेघस्थायीमेघोपिगिरिरेतस्मादेवतद्यानिनामानिप्राधान्यस्तुतीनांदेवता
नां[redacted]तद्दैवतमित्याचक्षतेतदुपरिष्टाद्व्याख्यास्यामोनैघंटुकानिनैगमानी
हेह॥२०॥इतिनिरुक्तेप्रथमोऽध्यायः॥सम्मम्नायस्तत्रंचतुष्ट्वमतोन्येऽर्थनिपाता
वायुर्वात्वानननूनंनूनंसातत्रकुचांत्वोक्षणंवतोनिष्ट्वक्त्रासोहविर्भिरितीमान्य[illegible]पि

यौयथोहिन्वयापीदमर्थवंतोथापीदंस्थाणुरयमुतत्वःपश्यन्नुतत्वंसख्येविंशतिः॥
॥ॐ॥अथनिर्वचनंतद्येषुपदेषुस्वरसंस्कारौसमर्थौप्रादेशिकेनगुणेनान्वितौस्यातांत
थातानिनिर्ब्रूयादथानन्वितेर्थेप्रादेशिकेविकारेर्थनित्यःपरीक्षेतकेनचिद्वृत्तिसामा
न्येनाविद्यमानेसामान्येप्यक्षरवर्णसामान्यान्निर्ब्रूयान्नत्वेवननिर्ब्रूयान्नसंस्कार
माद्रियेतविशयवत्योहिवृत्तयोभवंतियथार्थंविभक्तीःसंनमयेत्प्रत्तमवत्तमिति
मपार्जितं भवति तेन ऋजीषी सोमोऽथाप्यैंद्रो निगमो भवत्यृजीषी वज्रीति हर्योरस्य स भा
गो धानाश्चेति धाना भ्राष्ट्रे हिता भवंति फले हिता भवंतीति वा बब्धां ते हरी धाना उप
ऋजीषं जिघ्रतामित्यपि निगमो भवत्यादिनाभ्यासेनोपहितेनोपधामादत्ते बभस्ति
रत्तिकर्मा सोमः सर्वाण्यतसानि वनानि नार्वागिंद्र प्रतिमानानि दभ्नुवंति यैरेनं प्रतिमि
मते नैनं तानि दभ्नुवंत्यर्वागेवैनमप्राप्य विनश्यंतीतींद्रप्रधानेत्येके नैघंटुकं सोम

कर्मोप्यप्रधानेस्यपरं श्मशाश्मुअश्नुतइतिवाश्माश्नुतइतिवा॥ अंवश्मशारुधद्धाः॥
अवारुधक्ष्मशंवारिति॥१२॥ उर्वश्यप्सराउर्वभ्यश्नुतेऊरुभ्यामश्नुतेऊरुर्वावशोस्या॥
अप्सराअप्सारिण्यपिवाप्सइतिरूपनामाप्सातेरप्सानीयंभवत्यादर्शनीयंव्यापनी॥
यंवास्पष्टंदर्शनायेतिशाकपूणिर्यदप्सइत्यभक्षस्याप्सोनामेतिव्यापिनस्तद्वाभव
तिरूपवतीतदनयात्तमितिवातदस्येदत्तमितिवातस्यादर्शनान्मित्रावरुणयोरेत
श्चस्कंदतदभिवादिन्येषर्ग्भवति॥१३॥ उतासिमैत्रावरुणोवसिष्ठोर्वश्याब्रह्म
न्मनसोधिजातः॥ द्रप्संस्कंनंब्रह्मणादैव्येनविश्वेदेवाःपुष्करेत्वाददंत॥ अ

प्यासिमैत्रावरुणोवसिष्ठोर्वश्या ब्रह्मन्मनसोधिजातोद्रप्संस्कंनंब्रह्मणादैव्येनद्र
प्सः संभृतप्सानीयोभवतिसर्वेदेवाःपुष्करेत्वाधारयंतपुष्करमंतरिक्षंपोषतिभूता
न्युदकंपुष्करंपूजाकरंपूजयितव्यंवेदमपीतरत्पुष्करमेतस्मादेवपुष्करंवपुष्करं
वापुष्पंपुष्यतेर्वयुनंवेतेःकांतिर्वाप्रज्ञावा॥१४॥सद्भूतमोवयुनंततुन्वत्सूर्येणवयु
नवच्चकार॥सत्तमोप्रज्ञानंततन्वत्सततंसूर्येणप्रज्ञानवच्चकारवाजपस्त्यंवाजप
तनं॥सनेमवाजपस्त्यमित्यपिनिगमोभवतिवाजगंध्यंगध्यत्युत्तरपदं॥अश्याम
वाजगंध्यमित्यपिनिगमोभवतिगध्यंगृह्णातेः॥ऋज्रावाजंनगध्यंयुयूषन्नित्यपि

नि०पू०५
६२

निगमोभवति गध्यतिर्मिश्रीभावकर्मा ॥ आगधितापरिगधितेत्यपिनिगमोभवति
कौरयाणःकृतयानः ॥ पाकस्थामाकौरयाणइत्यपिनिगमोभवतितौरयाँस्तूर्णया ५२
नः ॥ सतौरयाणउपयाहियज्ञं ॥ मरुद्भिरिंद्रसखिभिःसजोषाइत्यपिनिगमोभवत्य
ह्रयाणोह्रीतयानः ॥ अनुष्टुयाकृणुह्यह्रयाणइत्यपिनिगमोभवतिहरयाणोहर
माणयानः ॥ रजतंहरयाणइत्यपिनिगमोभवति ॥ यआरितःकर्मणिकर्मणिस्थिरः ॥
प्रसृतंस्तोमान्व्रंदीव्रंदतेर्मृदूभावकर्मणः ॥ १५ ॥ नियद्वृणक्षिश्वसनस्यमूर्धनिशुष्ण राम०
स्यचिद्व्रंदिनोरोरुवद्वना ॥ निवृणक्षियच्छ्वसनस्यमूर्धनिशब्दकारिणःशुष्णस्यादि ६२

स्मस्यचशोषयितूरोह्यमाणोवनानीतिवावधेनेतिवा॥ अभ्रदंतबीळितेस्यापिनि
गमोभवतिवीळयतिश्च [redacted] व्रीउयतिश्चसंस्तंभकर्मणोपूर्वेणसंप्रयुज्ये
तेनिष्षपीस्त्रीकामोभवतिविनिर्गतपसाःपसःसपतेःस्पृशतिकर्मणः॥ मानोमघे
वनिःषपीपरादाः॥ सयथाधनानिविनाशयतिमानस्त्वंतथापरादास्तूर्णाशमुद
कंभवतितूर्णमश्नुते॥ तूर्णाशंनगिरेरधीस्यनिगमोभवतिक्षुंपमहिच्छत्रकंभव पि ३
तियत्क्षुभ्यते॥१६॥ कदामर्तमराधसंपदाक्षुंपमिवस्फुरत्॥ कदानःशुश्रव
द्गिरइंद्रोअंग॥ कदामर्तमनाराधयंतंपादेनक्षुंपमिवावस्फुरिष्यतिकदानःश्रोष्य

नि॰पू॰५ तिचगिरइंद्रोअंगांगेतिक्षिप्रनामांचितमेवांकितंभवतिनिचुंपुणः सोमोनिचांतपृ
६३ णोनिचमनेनप्रीणाति॥ १७॥ पत्नीवंतः सुताइमउशंतोयंतिवीतये॥ अपांजग्मि
दु३ र्निचुंपुणः॥ पत्नीवंतः सुतौ[illegible]मेद्भिः सोमाः कामयमानायंतिवीतयेपानायापांगंता
निचुंपुणः समुद्रोपिनिचुंपुणउच्यतेनिचमनेनपूर्यतेवभृथोपिनिचुंपुणउच्यते
नीचैरस्मिन्क्वणंतिनीचैर्दधतीतिवा॥ अवभृथानिचुंपुणेत्यपिनिगमोभवतिनिचुंपुण
निचुंकुणेतिचपदिर्गंतुर्भवतियत्पद्यते॥ १८॥ सुगुरसत्सुहिरण्यः स्वश्वोबृहद राम०
स्मैवयइंद्रोदधाति॥ यस्त्वायंतंवसुनाप्रातरित्वोमुक्षीजयेवपदिमुत्सिनाति॥ सुगु ६३

र्भवति स्क हिरण्यः स्वश्वो महत्वास्मै वयरंद्रो दधाति यस्त्वायंतमन्नेन प्रातरागामिन्न
तिथे ॥ मुक्षीजयेव पदिमुत्सिनाति ॥ कुमारो मुक्षीजा मोचनाच्च सयनाच्च ततनाच्च
पादुः पद्यतेः ॥ आविः स्वेः कृणुते गूहते बुसं स पादुरस्य निर्णिजो न मुच्यते ॥ आविः
कुरुते भासमादित्यो गूहते बुसं बुसमित्युदकनाम ब्रवीतेः शब्दकर्मणो भ्रंसतेर्वा य
द्वर्षन्पातयत्युदकं रश्मिभिस्तत्प्रत्यादत्ते ॥१९॥ वृकश्चंद्रमा भवति विवृतज्योति
ष्को वा विकृतज्योतिष्को वा विक्रांतज्योतिष्को वा ॥२०॥ अरुणो मा सकृद्वृकः पथा
यंतं ददर्श हि ॥ उज्जिहीते निचाय्यातष्टेव पृष्ट्यामयी वित्तं मे अस्य रोदसी ॥ अरुण

नि॰पू॰५
६४

आरोचनौमासकृन्मासानांचार्धमासानांचकर्ताभवतिचंद्रमावृकःपथायंतंद
दर्शनक्षत्रगणमभिजिहीतेनिचाय्ययेनयेनयोक्ष्यमाणोभवतिचंद्रमास्तक्ष्णुव
न्निवपृष्ठरोगीजानीतंमेस्यद्यावापृथिव्याविस्यादित्योपिवृकउच्यतेयदावृंक्ते॥
अजोहवीदश्विनावर्तिकावामास्नोयत्सीममुंचतंवृकस्य॥आह्वयदुषाअश्विना
वादित्येनाभिग्रस्तातामश्विनौप्रमुमुचतुरित्याख्यानंश्वापिवृकउच्यतेविकर्तना
त्॥वृकश्चिदस्यवारणउरामथिः॥उरणमथिः॥उरणाऊर्णावान्भवत्यूर्णापु
नर्वृणोतेरूर्णोतेर्वावृकवाशिन्यापिवृक्युच्यते॥शतंमेषान्वृक्येचक्षदानम्

राम॰
६४

ज्राश्वंतंपितांधंचकारेत्यपिनिगमोभवतिजोषवाकमित्यविज्ञातनामधेयंजो
षयितव्यंभवति॥२१॥ यइंद्राग्नीसुतेषुवांस्तवत्तेष्वृतावृधा॥ जोषवाकंवदतः
पज्रहोषिणानदेवाभसथश्चन॥ यइंद्राग्नीसुतेषुवांसोमेषुस्तौतितस्याश्नी
थोथयोयंजोषवाकंवदतिविजंजपःप्रार्जितहोषिणौनदेवौतस्याश्नीथःकृ
त्तिःकृंततेर्यशोवान्नंवा॥ महीवकृत्तिःशरणातइंद्र॥ सुमहत्तइंद्रशरणमंतरि
क्षेकृत्तिरिवेतीयमपीतराकृत्तिरेतस्मादेवसूत्रमप्युपमार्थेवा:॥ कृत्तिंवसान
आचरपिनाकंबिभ्रदागहीत्यपिनिगमोभवतिश्वघ्नीकितवोभवतिस्वंहंतिस्वं

पुनराश्रितंभवति।। कृतंनश्वघ्नीविचिनोतिदेवने।। कृतमिवश्वघ्नीविचिनोति
देवनेकितवः।किंतवास्तीतिशब्दानुकृतिःवान्वाशीर्नामकः।सममितिपरिग्रहा
थर्यंसर्वनामानुदात्तं।।२२।। मानःसमस्यदूढ्यःपरिद्वेषसोअंहतिः।।ऊर्मि
र्नानावमावधीत्।।मानःसर्वस्यदुर्धियःपापधियःसर्वतोद्वेषसोंहतिरूर्मिरि
वनावमावधीदूर्मिरूर्णोतिर्नौःप्रणोत्तव्याभवतिनमतेर्वातत्कथमनुदात्त
प्रकृतिनामस्याद्दृष्टव्ययंतुभवसुतोसमस्मिन्नाशिशीहिनोवसोइतिसप्तम्यां
शिशीतिर्दानकर्मा।। उरुष्याणोअघायतःसमस्मादितिपंचम्यामुरुष्यतीर

क्षाकर्माथापिप्रयमाबकुवचनैनभंतामन्युकेसमे॥२३॥हविषाजारोअपांपिप
र्तिपपुरिर्नरा॥पिताकुटस्यचर्षणिः॥हविषापंजरयितापिपर्तिपपुरिरितिपृ
णातिनिगमोवाप्रीणातिनिगमोवापिताकृतस्यकर्मणश्चायितादिसःशंबरइतिवज्र
नामशमयतेर्वाशातयतेर्वा॥उग्रोयःशंबरःपुरुहूततेनेत्यपिनिगमोभवतिकेपयः
कपूयाभवंतिकपूयमितिपुनातिकर्मकुत्सितंदुष्पूयंभवति॥२४॥पृथुकस्राय
न्प्रथमादेवहूतयोकृण्वतश्रवस्यानिदुष्टरा॥नयेशेकुर्यज्ञियांनावमारुहमीर्मै
वतेन्यविशंतकेपयः॥पृथकस्रायन्पृथकप्रथतेःप्रथमादेवहूतयोयेदेवानाह्वयं

ताकुर्वत श्र वपायानियशांसिदुरनुकराण्यन्यैर्येशक्नुवन्नूयज्ञियांनावमारोढुम
थयेनाशक्नुवन्नूयज्ञियांनावमारोढुमीर्मैवतेन्यविशंतेहैवतेन्यविशंतऋणेहैवते
न्यविशंतास्मिन्नेवलोक इतिवैर्मइतिर्बहुनामसमीरिततरोभवति॥ एताविश्वा
सवनातूतुमाकृषेस्वयंसूनोसहसोयानिदधिषे॥ एतानिसर्वाणिस्थानानितूर्ण
मुपाकुरुषेस्वयंबलस्यपुत्रयानिधत्सेंसत्रमंहसस्त्राणंधनुर्वाकवचंवाकवचंकुअं
चितंभवतिकांचितंभवतिकायेंचितंभवतीतिवा॥२५॥ प्रीणीताश्वान्हितंजया
थस्वस्तिवाहंरथमित्कृणुध्वं॥ द्रोणाहावमवतमश्मचक्रमंसत्रकोशंसिंचतानृपा

णं॥प्रीणीताम्वान्त्स्कहितंजययज्जयनंवोहितमस्त्कंस्वस्तिवाहनंरथंकुरुध्वंद्रोणा
हावंद्रोणंद्रुममयंभवसोहाव्यआह्वानादावहआवहनादेवतोवातितोमहान्भवस
श्मन्वक्रमश्मानन्वक्रमसनन्वक्रमितिर्वासत्रकोशमंसत्राणिवःकोशस्थानीयानि
संतुकोशःकुस्मातेर्विक्रुषितोभवसेयमपीतरःकोशएतस्मादेवसंचयआचितमा
त्रोमहान्भवतिसिंचतनृपाणंनरपाणंकूपकर्मणास्तंग्राममुपमिमीतेकाकुदंता
ल्वित्याचक्षतेजिह्वाकोकुवासास्मिन्धीयतेजिह्वाकोकुवाकोकूयमानावर्णान्नुदती
तिवाकोकूयतेर्वास्याच्छब्दकर्मणोजिह्वाजोहुवातालुतरतेस्तीर्णतममंगंलतते

निपू॰ ५
६०

र्वा स्याद्विपरीताद्वा यातलं लते स विपर्ययः ॥ २६ ॥ सुदेवो असि वरुण यस्य ते सप्त
सिंधवः ॥ अनुक्षरंति काकुदं सूर्म्यं सुषिरामिव ॥ सुदेवस्त्वं कल्याणदेवः कमनीय
देवो वा भवसि वरुण यस्य ते सप्त सिंधवः सिंधुः स्रवणाद्यस्य ते सप्त स्रोतांसि ता
नि ते काकुदमनुक्षरंति सूर्मिं कल्याणोर्मिं स्रोतः सुषिरमनु यथा बीरिटं तैटीकिरं
तरिक्षमेवमाह पूर्वं वयतेरुत्तरमिरतेर्वयांसीरंत्यस्मिन्भांसि वा तदेतस्यामृच्युदा
हरणमपि निगमो भवति ॥ २७ ॥ प्र वावृजे सुप्रया बर्हिरेषामा विश्पतीव बीरिट इया
ते ॥ विशामक्तोरुषसः पूर्वहूतौ वायुः पूषा स्वस्तये नियुत्वान् ॥ प्रवृज्यते सुप्रायणं

राम॰
६०

बर्हिरिषामेयातेसर्वस्यपातारोवापालयितारोवाबीरिटमंतरिक्षंभियोवासोवात
तिरपिवोपमार्थेस्यात्सर्वपतीइवराजानौबीरिटेगणोमनुष्याणांरात्र्याविवासेपू
र्वस्यामभिहूतौवायुश्चनियुत्वान्पूषाचस्वस्त्ययनायनियुत्वान्नियुतोस्याश्वानियु
तोनियमनाद्वानियोजनाद्वाच्छाभेराप्तुमितिशाकपूणिःपरीसीमितिव्याख्या
ताएनमेनामस्याअस्येसेतेनव्याख्यातंसृणिरंकुशोभवतिसरणादंकुशोंचते
राकुंचितोभवतीतिवानेदीयइत्यण्यःपक्वमेयादित्यपिनिगमोभवंतिकतममं
कुशादायात्पक्वमोषधमागच्छतित्यागच्छतीति॥२८॥सप्तिमसश्चंतीनयस्य

भा ३

वराहोगायंतित्वापवित्रंपुरुत्वाकिमित्तेंप्रतत्तेग्निंनरएकूयापींतमन्युंरूर्वीश्यप्स
रांउत्नासिसद्भून्नियत्क्रदामर्तंपत्नीवंतःस्क्रगुरसद्धकेश्चंद्रमाव्यरुणोमायदूं
द्राग्नामानःसमस्यहविषाजारःपृथक्प्रायन्प्राणीतोश्वा स्कदेवःप्रवाहृजेष्ठा
विंशतिः॥ इतिनिरुक्तेपूर्वषट्केपंचमोऽध्यायः॥ ॐ त्वमग्नेद्युभिस्त्वमाशुशुक्ष
णिस्त्वमद्भ्यस्त्वमश्मनस्परि॥ त्वंवनेभ्यस्त्वमोषधीभ्यस्त्वंनृणांनृपतेजायसेशुचिः॥
त्वमग्नेद्युभिरहोभिस्त्वमाशुशुक्षणिराशुइतिचशुइतिचक्षिप्रनामनीभवतः
क्षणिरुत्तरःक्षणोतेराशुशुचाक्षणोतीतिवासनोतीतिवाशुक्शोचतेःपंचम्यर्थे

वाप्रथमांतथाह्विवाक्यसंयोगआइत्याकारउपसर्गः पुरस्ताच्चिकीर्षितजउत्तरआ
शुशोचयिषुरितिशुचिः शोचतेर्ज्वलतिकर्मणोयमपीतरः शुचिरेतस्मादेव निःषि
क्तमस्मात्पापकमितिनैरुक्ताः॥ इंद्रआशाभ्यस्परिसर्वाभ्योअभयंकरत्॥ आशा
दिशोभवंत्यासदनादाशाउपदिशोभवंत्यभ्यशनात्काशिर्मुष्टिः प्रकाशनान्मुष्टिर्मोच
नाद्वामोषणाद्वामोहनाद्वा॥ इमेचिदिंद्ररोदसीअपारेयत्संगृभ्णामघवन्काशिरि
त्ते॥ इमेचिदिंद्ररोदसीरोधसीद्यावापृथिव्योविरोधनाद्रोधः कूलंनिरुणद्धिस्रोतः
कूलंरुजतेर्विपरीताल्लोष्टोविपर्ययेणापारेदूरपारेयत्संगृभ्णासिमघवन्काशिस्ते

महान्॥ अहस्तमिंद्र संपिणक्कुणारुं॥ अहस्तमिंद्र कृत्वा संपिंड्ढि परिक्वणनं मेघं॥१॥ ठि १
अलातृणो वल इंद्र व्रजो गोः पुरा हंतोर्भयमानो व्यार॥ सुगान्पथो अकृणोन्निरजे गाः
प्रावन्वाणीः पुरुहूतं धमंतीः॥ अलातृणोलमातर्दनो मेघो वलो वृणोतेर्व्रजो व्रजत्यं
तरिक्षे गोरेतस्या माध्यमिकाया वाचः पुराहननाद्भयमानो व्यार॥ सुगान्पथो अकृ
णोन्निरजे गाः॥ सुगमनान्पथो करोन्निर्गमनाय गवां॥ प्रावन्वाणीः पुरुहूतं धमंतीः॥
आपो वा वहनाद्वाचो वा वदनाद्बहुभिराहूतमुदकं भवति धमतिर्गतिकर्मा॥२॥ उ
द्वृह रक्षः सहमूलमिंद्र वृश्चा मध्यं प्रत्यग्रं शृणीहि॥ आ कीवतः सललूकं चकर्थ ब्रह्म

द्विषेत पुषिंहेतिमस्य ॥ उद्धर रक्षः सह मूलमिंद्र मूलं मोचनाद्वा मोषणाद्वा मोहना
द्वा वृक्षस्य मध्यं प्रतिशृणीह्यग्रमग्रमागतं भवत्याक्रियतो देशात्सललूकं सलुब्धं भव
ति पापकमिति नैरुक्ताः सररूकं वा स्यात्सर्तेरभ्यस्तात्तृपुषिस्तृपतेर्हेतिर्हंतेः ॥ संवि
द्रित्याकृत्स्यं शयानं ॥ स्कवपयसंस्कवमस्यपयः ॥ विस्रुह आपो भवंति विस्रवणात् ॥
वयाइव रुरुहुः सम्प्रविस्रुह इत्यपि निगमो भवति वीरुध ओषधयो भवंति विरोहणा
त् ॥ वीरुधः पारयिष्णव इत्यपि निगमो भवति नक्षद्दाभमश्नुवानं दाभमभ्यशानेन द
भ्नोतीति ॥ नक्षद्दाभं ततुरिं पर्वतेष्ठामित्यपि निगमो भवत्यस्कृधोयुरकृध्वायुः कृध्विति

ह्रस्वनाम मनिकृत्तं भवति।। योऽस्मृधोयुरजरःस्वर्वानित्यपि निगमो भवति निशृंभा
निश्रथ्यहारिणः।।३।।आजासः पूषणंरथे निशृंभास्तेजनश्रियं।। देवं वहंतु बिभ्र
तः।।आवहंत्वजाः पूषणंरथे निश्रथ्याहारिणस्तेजनश्रियं जातश्रियं।।बृबदुक्थोम
हदुक्थोवक्तव्यमस्माउक्थमिति बृबदुक्थोवा।। बृबदुक्थं हवामहे इत्यपि निगमोभ
वत्यृदूदरः सोमो मृदूदरो मृदुरुदरेष्विति वा।। ऋदूदरेण सख्या सचेयेत्यपि निगमोभ
वत्यृदूपे इत्युपरिष्टाद्व्याख्यास्यामः।। पुलुकामः पुरुकामः।। पुलुकामो हि मर्त्य [illegible] इत्य
पि निगमो भवत्यसिन्वती असंखादंत्यौ।।असिन्वती बप्सती भूर्यत्त इत्यपि निगमो

भवतिकपनाःकंपनाःक्रिमयोभवंति॥मोषथावृक्षंकपनेववेधसइत्यपिनिगमोभ
वतिभाऋजीकःप्रसिद्धभाः॥धूमकेतुःसमिधाभाऋजीकइत्यपिनिगमोभवतिरुजा
नानद्योभवंतिरुजंतिकूलानि॥संरुजानाःपिपिषइंद्रशत्रुरित्यपिनिगमोभवति
जूर्णिर्जवतेर्वाद्रवतेर्वादूनोतेर्वा॥ क्षिप्राजूर्णिर्नवक्षतीत्यपिनिगमोभवति॥
परिघ्रंसमोमनावांवयोगात्॥पर्यगाद्घ्रंसमहरवनायान्नं॥४॥उपलप्रक्षिण्यु
पलेषुप्रक्षिणात्युपलप्रक्षेपिणीवेंद्रऋषीन्यप्रच्छदुर्भिक्षेकेनजीवतीतितेषामेकः
प्रत्युवाचँशकटःशाकिनीगावोजालमस्यंदनंवनमुदधिःपर्वतोराजादुर्भिक्षेनववृ

त्तय इतिसा निगदव्याख्याता॥ ५॥ कारुरहं ततोभिषगुपलप्रक्षिणी नना॥ नाना
धियोवसूयवोनुगाइवतस्थिमेंद्रायेंदोपरिस्रव॥ कारुरहमस्मिकर्तास्तोमानांत
तोभिषक्तत इतिसंतानननामपितुर्वापुत्रस्यवोपलप्रक्षिणी सक्तुकारिकाकानननानम
तेर्मातावादुहितावानानाधियोनानाकर्माणोवसूयवोवसुकामाअन्वास्थिता
स्मोगावइवलोकमिंद्रायेंदोपरिस्रवेत्यध्येषणा॥ आसीनऊर्ध्वामुपसिक्षिणात्यु
पस्थेप्रकलविद्वणिग्भवतिकलाश्चवेदप्रकलाश्च॥ दुर्मित्रासःप्रकलविन्मिमा
नाइत्यपिनिगमोभवत्यभ्यर्धयज्वाभ्यर्धयन्यजति॥ सिषक्तिपूषाअभ्यर्धे

यज्वेत्यपिनिगमो भवतीईक्षेईशिषे ॥ ईक्षेहिवस्वउभयस्यराजन्नित्यपिनिगमो भव
तिक्षोणस्यक्षयणस्य ॥ महःक्षोणस्याश्विनाकण्वा येत्यपिनिगमो भवति ॥ ६ ॥ अ
स्मे ते बंधुः ॥ वयमित्यर्थः ॥ अस्मे यातंनासत्यासजोषाः ॥ अस्मानित्यर्थः ॥ अस्मेस
मानेभिर्वृषभपौंस्येभिः ॥ अस्माभिरित्यर्थः ॥ अस्मेप्रयंधिमघवन्नृजीषिन् ॥ अ
स्मभ्यमित्यर्थः ॥ अस्मे आराच्चिद्द्वेषः सनुतर्युयोतु ॥ अस्मदित्यर्थः ॥ ऊर्वइवपप्रथे
कामो अस्मे ॥ अस्माकमित्यर्थः ॥ अस्मे धत्तवसवोवसूनि ॥ अस्मास्वित्यर्थः ॥ पाथो
न्तरिक्षंपथाव्याख्यातं ॥ श्येनोनदीयन्नन्वेतिपाथइत्यपिनिगमो भवत्युदकमपि पा

नि॰पू॰६ यउच्यतेपानात्॥ आचष्टआसांपाथोनदीनामित्यपिनिगमोभवत्यन्नमपिपा
७२ २३ थउच्यतेपानादेव॥ देवानांपाथउपवक्षिविद्वानित्यपिनिगमोभवतिसवीम
निप्रसवे॥ देवस्यवयंसवितुःसवीमनीत्यपिनिगमोभवतिसप्रथाःसर्वतःपृ
थुः॥ त्वमग्नेसप्रथाअसीत्यपिनिगमोभवतिविदथानिवेदनानि॥ विदथानि
प्रचोदयन्नित्यपिनिगमोभवति॥७॥ आयंतइवसूर्यंविश्वेदिंद्रस्यभक्षत॥ वसू
निजातेजनमानओजसाप्रतिभागंनदीधिम॥ समाश्रिताःसूर्यमुपतिष्ठंतेपि राम॰
१४ वोपमार्थेस्यात्सूर्यमिवेंद्रमुपतिष्ठंतइतिसर्वाणींद्रस्यधनानिविभक्ष्यमाणाःस ७२

ज॰१ यथाधनानिविभजतिजातेचैवनिष्पमाणेचतंवयंभागमनुध्यायामौजसाबलेनौज
ओजतेर्वौब्जतेर्वाशीराश्रयणाद्वाश्रपणाद्वाथेयमितराशीराशास्तेः॥इंद्रायगावआ
शिरमित्यपिनिगमोभवतिसामेसत्याशीर्देवेष्वितिच॥यदातेमर्त्तोअनुभोगमा
नळादिद्ग्रसिष्ठओषधीरजीगः॥यदातेमर्त्तोभोगमन्वापदथग्रसितृतमओ
षधीरगारीर्जिगर्तिगिरतिकर्मावागृणातिकर्मावागृह्णातिकर्मावा॥मूराअमू
रनवयंचिकित्वोमहित्वमग्नेत्वमंगवित्से॥मूढावयंस्मोमूढस्त्वमसिनवयंविद्मो
महत्वमग्नेत्वंतुवेत्थशशमानःशंसमानः॥योवांयज्ञैःशशमानोहदाशतीत्य

नि.पू.६ पिनिगमोभवतिदेवोदेवाच्याकृपा॥देवोदेवानस्य कृयाकृपाकृपृकृपतेर्वाकल्पतेर्वा॥ ८॥

७२ अश्रवंहिभूरिदावत्तरावांविजामातुरुतवाघास्यालात्॥ अथासोमस्यप्रयतीयुवभ्या

मिंद्राग्नीस्तोमंजनयामिनव्यं॥ अश्रौषंहिबहुदातृतरौवांविजामातुरसुसमाप्ता

४मा ज्जामातुर्विजाँतितिशश्वद्दाक्षिणाजाः क्रीतापतिमाचक्षतेऽसुसमाप्तइववरो

रोभिप्रेतोजामाताजा अपत्यंतंनिर्मातोतवाघास्यालादपिचस्यालात्स्या

लआसन्नः संयोगेनेतिनैदानाः स्याल्लाजानावपतीतिवालाजा [redacted] राम

[redacted] लाजाजतेः स्यंशूर्पंस्यतेःशूर्पमशनपवनंशृणातेर्वाथसोमस्य ७२

प्रदानेनयुवाभ्यामिंद्राग्नीस्तोमंजनयामिनव्यं॥ नवतरमोमासऽसुपरिष्टाद्वा
ख्यास्यामः॥९॥ सोमानंस्वरणंकृणुहिब्रह्मणस्पते॥ कक्षीवंतंयऔशिजः॥ सोमा
नंसोतारंप्रकाशनवंतंकुरुब्रह्मणस्पतेकक्षीवंतमिवयऔशिजः कक्षीवान्कक्ष्या
वानौशिजउशिजःपुत्रउशिग्वष्टेःकांतिकर्मणोपित्वयंमनुष्यकक्षएवाभिप्रेतः
स्यात्तंसोमानंसोतारंमाप्रकाशनवंतंकुरुब्रह्मणस्पते॥१०॥इंद्रासोमासमघशं
समभ्यघंतपुर्ययस्तुचरुरग्निवाँऽइव॥ ब्रह्मद्विषेक्रव्यादेघोरचक्षसेद्वेषोधत्त
मनवायंकिमीदिने॥इंद्रासोमावघस्यशंसितारमघंहंतेर्निर्ह्रसितोपसर्गआ

नि॰पू॰६
७४

हंतीति तपुस्तपतेश्चरुर्मृच्चयो भवति चरतेर्वा समुच्चरंत्यस्मादापो ब्रह्मद्विषे ब्रा
ह्मणद्वेष्ट्रे क्रव्यादे क्रव्यमदते घोरचक्षसे घोरख्यानाय क्रव्यं विकृत्ताज्जायत इति नै
रुक्तो द्वेषो धत्तमनवायमनवयवं यदन्येन व्यवेयुरद्वेषस इति वा किमीदिने किमि
दानीमिति चरते किमिदं किमिदमिति वा पिशुनाय चरते पिशुनः पिंशतेर्विपिंशती
ति॥११॥ कृणुष्व पाजः प्रसितिं न पृथ्वीं याहि राजेवामवाँऽइभेन॥ तृष्वीमनु प्रसितिं
द्रूणानोस्तासि विध्य रक्षसस्तपिष्ठैः॥ कुरुष्व पाजः पाजः पालनात्प्रसितिमिव पृथ्वीं
प्रसितिः प्रसयनात्तंतुर्वा जालं वा याहि राजेवामात्यवानभ्यमनवान्स्ववान्वेराभृती

राम॰
७४

गणेनगतभयेनहस्तिनेतिवान् ष्वानुप्रसितिसाद्रूणानस्तृष्वीतिक्षिप्रनामतरतेर्वात्वर
तेर्वा॥अस्तासिविध्यरक्षसस्तपिष्ठैस्तप्ततमैस्तृप्रतमैःप्रपिष्टतमैरितिवा॥यस्तेगर्भममीवादु
र्णामायोनिमाशये॥अमीवाभ्यमनेनव्याख्यातोदुर्णामाक्रिमिर्भवतिपापनामाक्रिमिःक्रव्येमेद्य
तिक्रमतेर्वास्यात्सरणकर्मणःक्रामतेर्वा॥अतिक्रामंतोदुरितानिविश्वा॥अतिक्रममाणादुर्ग
तिगमनानिसर्वाण्यपश्चायदेनयाविद्धोपवीयतेव्याधिर्वाभयंवा॥अप्वेपरेहीत्यपिनिगमोभ
वत्यमतिरमामयीमतिरात्ममयी॥ऊर्ध्वायस्यामतिर्भाअदिद्युतत्सवीमनीत्यपिनिगमोभ
वतिश्रुष्टीतिक्षिप्रनामाश्रुअष्टीति॥१२॥ताँअध्वरउशतोयक्ष्यग्नेश्रुष्टीभगंनासत्यापुरंधिं॥

नि·पू·६ तानध्वरेयज्ञउशतःकामयमानान्यजाग्नेत्वष्टीभगंनासत्यौचाश्विनौसत्यावेवनासत्यावि
७५ त्यौर्णवाभःसत्यस्यप्रणेतारावित्याग्रायणोनासिकाप्रभवौबभूवतुरितिवापुरंधिर्बहुधीस्तत्कः
पुरंधिर्भगःपुरस्तात्तस्यान्वादेशइत्येकमिंद्रइत्यपरंसबहुकर्मतमःपुरांचदारयितृतमोवरुण
इत्यपरंतंप्रज्ञयास्तौति॥इमामूनुकवितमस्यमायामित्यपिनिगमोभवतिरुशदिति[illegible]व
र्णनामरोचतेर्ज्वलतिकर्मणः॥समिद्धस्यरुशददर्शिपाजइत्यपिनिगमोभवति॥१३॥अस्तिहिवःसजा
सिनै त्यंरिशादसोदेवासोअस्त्याप्यं॥अस्तिहिवःसमानजातितारिशायदारिणोदेवाअस्त्याप्यमाप्यमाप्नो राम·
तेःसुदत्रःकल्याणदानः॥त्वष्टासुदत्रोविदधातुरायइत्यपिनिगमोभवतिसुविदत्रःकल्याणविद्यः॥ ७५

आग्नेयाहि स्कविदत्रेभिरर्वाङित्यपि निगमो भवत्यानुषगिति नामानुपूर्वस्यानुषक्तं भवति॥ स्तृणंति बर्हिरानुषगित्यपि निगमो भवति तुर्वणिस्तूर्णवनिः॥ स तुर्वणिर्महाँऽ अरेणुपौंस्यइत्यपि निगमो भवति गिर्वणा देवो भवति गीर्भिरेनं वमयंति॥ जुष्टं गिर्वणासे बृहदित्यपि निगमो भवति॥१४॥ अस्कृत्तैसूत्तैरजंमिनि षत्ते ये भूतानि समकृण्वन्निमानि॥ अस्कसमीरिताः स्कसमीरितेवातसमीरिता माध्यमका देवगणा ये रसेन पृथिवीं तर्पयंतो भूतानि च कुर्वंतीति आयजंतेत्यतिक्रांतं प्रतिवचनं॥ अभ्यक्तसातइंद्र ऋष्टिः॥ अमाक्तेतिवाभ्यक्तेतिवा॥ यादृश्मिन्धायितमपस्ययाविदत्॥ यादृशेधायित

मपस्यया विदत्॥ [redacted] उस्रः पितेव जारयायि यज्ञैः॥ उस्र
इव गोपिता जारयायि यज्ञैः॥१५॥ प्रवो छाजुजुषाणासो अस्थुरभूत विश्वे अग्रियोत वा
जाः॥ प्रास्थुर्वो जोषयमाणा अभवत सर्वेग्रगमनेनेति वाग्रगरणेनेति वाऽग्र्यसंपा
दिन इति वाऽपि वाग्रमित्येतदनर्थकमुपबंधमाददीत॥ अछा दिद्र प्रस्थिते माहवींषि
चनोदधिष्व पचतोत सोमं॥ अछा द्र प्रस्थितानीमानि हवींषि चनो दधिष्व चन इत्यन्न
नाम पचतिर्नामीभूतस्तंमेदस्तः प्रतिपचताग्रभीष्टामित्यपि निगमो भवत्यपि वामे
दसश्च पशोश्च सात्वं द्विवचनं स्याद्यत्र ह्येकवचनार्थः प्रसिद्धं तद्भवति॥ पुरोळा अग्ने

पर्वतइतिययाशुरुधःआपोभवंतिशुचंसंरुंधंति॥ ऋतस्यहिशुरुधःसंतिपूर्वीरित्य
पिनिगमोभवत्यमिनोमितमात्रोमहान्भवत्यभ्यमितीवा॥ अमिनःसहोभिरित्यपिनिगमोभ
वतिजज्झतीरापोभवंतिशब्दकारिण्यः॥ मरुतोजज्झतीरिवेत्यपिनिगमोभवत्यप्रतिष्कु
तोप्रतिष्कृतोप्रति स्खलितोवा॥ अस्मभ्यमप्रतिष्कुतइत्यपिनिगमोभवतिशाशदानः
[redacted] शाशाद्यमानः॥ प्रस्वांमतिमतिरच्छा शाशदानइत्यपिनिगमोभवति॥१६॥ सृप्रः
सर्पणादिदमपीतरत्सृप्रमेतस्मादेवसर्पिस्तैलंवा॥ सृप्रकरस्नमूतयइत्यपिनिगमोभ
वतिकरस्नौबाहूकर्मणांप्रस्नातारौसुशिप्रमेतेनव्याख्यातं॥ वाजेसुशिप्रगोमतीत्यपिनि

वी२

नि॰ पू॰ ६
७७

ह्रु १

गमोभवतिशिप्रेहनूनासिकेवाँहूँतेर्नासिकानसतेः॥ विष्यस्वशिप्रेविसृजस्वधेनेइत्यपि
निगमोभवतिधेनादधातेरंसुरमणात्॥ सचित्रेणचिकितेरंसुभासेत्यपिगमोभवति
द्विबर्हाद्वयोःस्थानयोःपरिवृढोमध्यमेचस्थानउत्तमेच॥ उतद्विबर्हाअमिनःसहोभि
रित्यपिनिगमोभवत्यक्रआक्रमणात्॥ अक्रोनबभ्रिःसमिथेमहीनामित्यपिनिगमोभ
वत्युराणउरुकुर्वाणः॥ दूतईयसेप्रदिवउराणइत्यपिनिगमोभवतिस्तियाआपोभ
वंतिस्त्यायनात्॥ वृषासिंधूनांवृषभस्तियानामित्यपिनिगमोभवतिस्तिपास्तियापा
लनउपस्थितान्पालयतीतिवा॥ सनःस्तिपाउतभवातनूपाइत्यपिनिगमोभवतिज

राम॰
७७

बारुजवमानरोहिजरमाणरोहिगरमाणरोहीतिवा ॥ अग्रेरूपआरूपितंजवार्वित्यपि
निगमोभवतिजरूथंगरूथंगृणाते: ॥ जरूथंहन्यक्षिरायेपुरंधिमित्यपिनिगमोभ
वतिकुलिशइतिवज्रनामकूलशातनोभवति ॥ स्कंधांसीवकुलिशेनाविवृक्णाहि:श
यतउपपृक्पृथिव्या: ॥ स्कंधोवृक्षस्यसमास्कंनोभवत्ययमपीतर:स्कंधएतस्मादे
वास्कन्नंकायेहि:शयतउपपर्चन:पृथिव्या: ॥ तुंजस्तुंजतेर्दानकर्मण: ॥ १७ ॥ तुंजेतुं
जेयउत्तरेस्तोमाइंद्रस्यवज्रिण: ॥ नविंधेअस्यसुष्टुतिं ॥ दानेदानेयउत्तरेस्तोमा
इंद्रस्यवज्रिणोनास्यतैर्विंदामिसमाप्तिंस्तुतेर्बर्हणापरिबर्हणा ॥ बृहच्छ्रवाअस्य

रोबर्हणाकृतइत्यपिनिगमोभवति॥१८।योअस्मैघ्रंसउतवायऊधनिसोमंसुनोतिभव
तिद्युमाँऽअह॥अपापशक्रस्ततनुष्टिमूहतितनूशुभ्रंमघवायःकवासखः॥घ्रंसइ
त्यहर्नामग्रस्यंतेस्मिन्रसागोरूधउद्धततरंभवत्युपोन्नद्धमितिवास्नेहानुप्रदानसा
मान्याद्रात्रिरप्यूधउच्यतेसयोस्माअहन्यपिवारात्रौसोमंसुनोतिभवत्यहद्योतन
वानपोहत्यपोहतिशक्रस्ततनिष्टुंधर्मसंतानादपेतमलंकरिष्णुमयज्वानंतनूशुभ्रंतनू
शोभयितारंमघवायःकवासखोयस्यकपूयाःसखायः॥न्याविध्यदिलीबिशस्यदृह्ळा
विशृंगिणमभिनच्छुष्णमिंद्रः॥निरविध्यदिलाबिलशयस्यदृह्ळानिव्यभिनच्छृंगि

पंशुल्लमिंद्रः॥१९॥ अस्माइदुप्रभरातूतुजानो वृत्रायवज्रमीशानः कियेधाः॥ गोर्नपर्ववि
रदातिरश्चेष्यन्नर्णांस्यपांचरध्यै॥ अस्मैप्रहरतूर्णं त्वरमाणो वृत्रायवज्रमीशानः कि
येधाः कियद्धाइतिवाक्रममाणधाइतिवा गोरिवपर्वाणिविरद मेघस्येष्यन्नर्णांस्यपांच
रणायभूमिर्भ्रोम्यतेः॥ भूमिरस्यृषिकृन्मर्त्यानामित्यपि निगमो भवति विष्पितो विप्रा
प्तः॥ पारं नो अस्य विष्पितस्य पर्षन्नित्यपि निगमो भवति॥२०॥ तन्नस्तुरीपमद्भुतं पु
रुक्षु वारं पुरुत्मना॥ त्वष्टापोषायविष्यतु रायेनाभानो अस्मयुः॥ तन्नस्तूर्णापिमहत्सं
भृतमात्मनात्वष्टाधनस्यपोषायविष्यत्वित्यस्मयुरस्मान्कामयमानोरास्पिनोरास्पी

नि॰पू॰६ रपत्नेर्वारसतेर्वा॥ रास्पिनस्यायो रित्यपि निगमो भवत्यृंजतिः प्रसाधनकर्मा॥ आ
७१ वऋंजसऊर्जां व्युष्टिष्वित्यपि निगमो भवत्यृजुरित्यप्यस्य भवति॥ ऋजुनीती नो वरु
णइत्यपि निगमो भवति प्रतद्वसू प्राप्तवसू॥ हरी इंद्र प्रतद्वसू अभिस्वरेत्यपि निग
अ४ मो भवति॥ २१॥ हिनोता नोऽध्वरं देवयज्या हिनोत ब्रह्म सनये धनानां॥ ऋतस्य
योगे विष्यध्वमूधः श्रुष्टीवरीर्भूतनास्मभ्यमापः॥ प्रहिणुत नोऽध्वरं देवयज्यायै प्र
हिणुत ब्रह्म धनस्य सननाय ऋतस्य योगे यज्ञस्य योगे यज्ञे शकट इति वा शकटं राम॰
शकृदितं भवति शनकैस्तकतीति वा शब्देन तकतीति वा॥ श्रुष्टीवरीर्भूतनास्मभ्य ७१

मापः॥सुखवस्योभवतास्मभ्यमापः॥चोष्कूयमाणइंद्रभूरिवामं॥दददिंद्रबहुवननी
यं॥एधमानद्विळुभयस्यराजाचोष्कूयतेविशइंद्रोमनुष्यान्॥व्युदस्यत्येधमानान
हर्द्वैष्यसुन्वतःसुन्वतोभ्याददात्युभयस्यराजादिव्यस्यचपार्थिवस्यचचोष्कूयमा
णइतिचोष्कूयतेश्चर्करीतवृत्तंसुमत्स्वयमित्यर्थः॥उपप्रागात्सुमन्मेधायिमन्म॥
उपप्रैतुमांस्वयंयन्मेमनोध्यायियज्ञेनेत्याश्वमेधिकोमंत्रोदिविष्टिषुदिवएषणे
षु॥स्थूरंराधःशताश्वंकुरुंगस्यदिविष्टिषु॥स्थूरःसमाश्रितमात्रोमहान्भवत्यणु
रनुस्थवीयांसमुपसर्गोलुप्तनामकरणोयथासंप्रतिकुरुंगोराजाबभूवकुरुगम

२:२

नाढ्याकुलगमनाढ्याकुरुः कृंततेः क्रूरमित्यप्यस्यभवति कुलंकुष्णातेर्विकुषितंभवति
दूतोव्याख्यातोजिन्वतिःप्रीतिकर्मा॥भूमिंपर्जन्याजिन्वंतिदिवंजिन्वंत्यग्नयइत्यपि
निगमोभवति॥२२॥अमत्रोमात्रोमहान्भवत्यभ्यमितोवा॥महाँअमत्रोवृजनेवि
रप्शीत्यपिनिगमोभवति॥स्तवेवृचीषमः॥स्तूयतेवऋचासमोनर्शरातिमन
श्लीलदानमश्लीलंपापकमश्रिमद्विषमं॥अनर्शरातिंवसुदामुपस्तुहीत्यपिनिग
मोभवत्यनर्वाप्रत्यृतोन्यस्मिन्॥अनर्वाणंवृषभंमंद्रजिह्वंबृहस्पतिंवर्धयानव्यमर्कैः॥
अनर्वमप्रत्यृतमन्यस्मिन्वृषभंमंद्रजिह्वंमंदनजिह्वंमोदनजिह्वमितिवा॥बृहस्प

तिंवर्धयनभ्यमर्कैरर्चनीयैःस्तोमैरसामिसामिप्रतिषिद्धंसामिस्यतेः॥असाम्योजो
बिभृथासुदानवः॥असमाप्तंबलंबिभृथकल्याणदानाः॥२३॥मात्वासोमस्यग
ल्दयासदायाचन्नहंगिरा॥भूर्णिंमृगंनसवनेषुचुक्रुधंकईशानंनयाचिषत्॥मा
चुक्रुधंत्वासोमस्यगालनेनसदायाचंनहंगिरागीत्यास्तुत्याभूर्णिमिवमृगंनसवने
षुचुक्रुधंकईशानंनयाचिष्यतइतिगल्दाधमनयोभवंतिगलनमासुधीयते॥आ
त्वाविशंत्विंदवआगल्दाधमनीनां॥नानाविभक्तीत्येतेभवतआगलनाधमनीनाभि
स्त्रार्थः॥२४॥नपापासोमनामहेनारायासोनजल्हवः॥नपापामन्यामहेनाधनान

नि.पू.६
८१

ज्वलनेनह्रीना अस्त्मस्मास्कब्रल चर्यमध्ययनंतपोदानकर्मेत्यृषिरवोचद्बकुरोभास्करो
भयंकरोभासमानोद्रवतीतिवा॥२५॥यवंवृकेणाश्विनावपंतेषंदुहंतामनुषायदस्रा॥
अभिदस्युंबकुरेणाधमंतोरुज्योतिश्चक्रथुरार्याय॥यवमिववृकेणाश्विनौनिवपंतौ
वृकोलांगलंभवतिविकर्तनाल्लांगलंलगतेर्लांगूलवद्वालांगूलंलगतेर्लंगतेर्लंब
तेर्वान्नंदुहंतौमनुष्यायदर्शनीयावभिधमंतौदस्युंबकुरेणज्योतिषावोदकेनवार्ये
ईश्वरःपुत्रोबेकनाटाःखलुकुसीदिनोभवंतिद्विगुणकारिणोवाद्विगुणदायिनोवाद्वि राम०
गुणंकामयंतइतिवा॥इंद्रोविश्वान्बेकनाटाँऽअहर्दृशउतक्रत्वापणींरभिः॥इंद्रोयः ८१

सर्वान्चेकनाशानर्हद्दृशः सूर्यदृशो यदृमान्यहानि पश्यंतिनपराणीतिवाभिभवति
कर्मणापपणीश्ववणिजः॥२६॥जीवान्नोअभिधेतनादित्यासःपुराहथात्॥कद्ध
स्थहवनश्रुतः॥जीवतोनोभिधावतादित्याःपुराहननात्क्वनुस्थह्वानश्रुतइतिम
त्स्यानांजालमापन्नानामेतदार्षंवेदयंतेमत्स्यामधाउदकेस्यंदंतेमाद्यंतेन्योन्यंभक्ष
णायेतिवाजालंजलचरंभवतिजलेभवंवाजलेशयंवांहुरांहस्वानंहूरणमित्यप्य
स्यभवति॥कृएवन्नंहूरणादुर्वित्यपिनिगमोभवति॥सप्तमर्यादाःकवयस्ततक्षुस्ता
सामेकामिदभ्यंहुरोगात्॥संप्तैवमर्यादाःकवयश्चक्रुस्तासामेकामप्यभिगच्छन्नं

घ

णं

नि॰ पू॰ ६
८२

यंत

हस्वान्भवति स्तेयमतल्पारोहणं ब्रह्महत्यां भ्रूणहत्यां सुरापानं दुष्कृतस्य कर्मणः
पुनःपुनःसेवां पातकेनृतोद्यमिति बत इति निपातः खेदानुकंपयोः ॥ २४ ॥ बतो बतासि
यम नैव ते मनो हृदयं चाविदाम ॥ अन्या किल त्वां कक्ष्येव युक्तं परिष्वजाते लिबुजेव वृ
क्षं ॥ बतो बलादतीतो भवति दुर्बलो बतासि यम नैव ते मनो हृदयं च विजानीमोन्या
किल त्वां परिष्वंक्ष्यते कक्ष्येव युक्तं लिबुजेव वृक्षं लिबुजा व्रततिर्भवति लीयते विभजं
तीति व्रततिर्वरणाच्च सयनाच्च ततनाच्च वाताप्यमुदकं भवति वात एतदाप्याययति
ति ॥ पुनानो वाताप्यं विश्वश्चंद्रमित्यपि निगमो भवति ॥ वनेन वायो न्यधायि चाकन् ॥

राम॰
८२

वनइववायोवेःपुत्रश्चायन्नितिवाकामयमानइतिवावेतिन्चयइतिन्चैकारशाकल्य
उदात्तंत्वेवमाख्यातमभविष्यदसुसमाप्तश्चार्थोरयर्यतीतिसिद्धस्तत्प्रेप्सूरयंकामय
तइतिवा॥ एषदेवोरयर्यतीत्यपिनिगमोभवति॥२८॥ धेनुंनइषंपिन्वतमसक्रां॥
असंक्रमणीं॥ आधवआधवनात्॥ मतीनांन्वसाधनंविप्राणांचाधवमित्यपिनिग
मोभवत्यनवब्रवोनवक्षिप्तवचनः॥ विजेषकृदिंद्रइवानवब्रवइत्यपिनिगमोभवति
॥२९॥ अरायिकाणेविकटेगिरिंगच्छसदान्वे॥ शिरिंबिठस्यसत्वभिस्तेभिष्ट्वाचातयाम
सि॥ अदायिनिकाणेविकटेकाणोविक्रांतदर्शनइत्यौपमन्यवःकणतेर्वास्यादणुभाव

नि॰पू॰६ कर्मणः कृपातिःशब्दाणूभावेभाष्यतेनुकृपातीतिमात्रापणूभावात्काणोदर्शनापणूभा
८३ वात्काणोविकटोविक्रांतगतिरित्यौपमन्यवःकुटतेर्वास्याद्विपरीतस्यविकुटितोभव
तिगिरिंगच्छसदानोनुवेशाब्दकारिके॥शिरिंबिठस्यसत्वभिः॥शिरिंबिठोमेघःशीर्य
तेबिठेबिठमंतरिक्षंबिठंबीरिटेनव्याख्यातंतस्यसत्वैरुदकैरितिस्यात्तैक्ष्णाचातयामो
पिवाशिरिंबिठोभारद्वाजःकालकर्णोपेतोलक्ष्मीनिर्नाशयांचकारतस्यसत्वैःकर्मभि
रितिस्यात्तैक्ष्णाचातयामश्चातयतिर्नाशनेपराशरःपसशीर्णस्यवसिष्ठस्यस्थविरस्य राम॰
जज्ञे॥पराशरःशतयातुर्वसिष्ठइत्यपिनिगमोभवतींद्रोपिपराशरउच्यतेपराशात ८३

यितायातूनां॥इंद्रोयातूनामभवत्पराशरइत्यपिनिगमोभवतिक्रिविर्दतीविकर्तनदंती॥
यत्रावोदिद्युद्रदतिक्रिविर्दतीत्यपिनिगमोभवतिकरूळतीकृत्तदती॥अपिवादेवंकंचित्कृ
त्तदंतंदृष्ट्वैवमवक्ष्यत्॥३०॥वामंवामंतआदुरेदेवोददात्वर्यमा॥वामंपूषावामंभगोवामं
देवःकरूळती॥वामंवननीयंभवत्यादुरिरादरणात्तत्कःकरूळतीभगःपुरस्तात्तस्मान्वादे
शइत्येकंपूषेत्यपरंसोदंतकोदंतकःपूषेतिचब्राह्मणं॥दनोविशइंद्रमृध्रवाचः॥दानमन
सोनोमनुष्यानिंद्रमृदुवाचःकुरु॥अवीरामिवमामयंशरारुरभिमन्यतेअबलामिवमाम
यंबालोभिमन्यतेसंशिशारिषुरिदंखुरिदंकामयमानोथापितइर्थेभाष्यतेवसत्युरिंद्रोवस

नि·पू·६ मानित्यत्रार्थः अश्वयुर्गव्यूरथयुर्वसूयुरिंद्र इत्यपि निगमो भवति॥३१॥ किंते कृण्वंति कीक
८४ टेषु गावो नाशिरं दुह्रे न तपंति घर्मं॥ आ नो भर प्रमगंदस्य वेदो नैचाशाखं मघवन्रंधया नः॥
टी किं ते कुर्वंति कीकटेषु गावः कीकटा नाम देशो नार्यनिवासः कीकटाः किंकृताः किंक्रियाभिरि
ति प्रेप्सा वा नैव चाशिरं दुह्रे न तपंति घर्मं हर्म्यमाहर नः प्रमगंदस्य धनानि मगंदः कुसीदी मां
गदो मामागमिष्यतीति च ददाति तदपत्यं प्रमगंदो त्यंतकुसीदिकुलीनः प्रमदको वा यो य
मेवास्ति लोको न पर इति प्रेप्सुः पंडको वा पंडकः पंडगः प्रार्दको वा प्रार्दयत्यांडौ वांडावाणी राम·
इव व्रीडयति तत् नैचाशाखं नीचाशाखो नीचैः शाखाः शक्नोतेराणिररणात् ८४
शाखः

नोमघवन्त्रंधयेतिरश्च्यातिर्वेशगामनेबुंदइषुर्भवतिबुंदोवाभिंदोवाभयदोवाभासमा
नोद्रवतीतिवा॥३२॥तुविक्षंतेसुकृतंसूमयंधनुःसाधुर्बुंदोहिरण्ययः॥उभातेबाहू
रण्यासुसंस्कृतऋदूपेचिदृदूवृधा॥तुविक्षंबहुविक्षेपंमहाविक्षेपंवातेसुकृतंसुम
यंसुमुखंधनुःसाधयितातेबुंदोहिरण्ययउभौतेबाहूरण्योरमणीयौसंग्राम्यौवर्दूप
अर्दनपातिनौमनपातिनौशब्दपातिनौदूरपातिनौवामर्मण्यर्दनवेधिनौगमनवे
धिनौशब्दवेधिनौदूरवेधिनौवा॥३३॥निराविध्यद्गिरिभ्यआधारयत्पक्कमोदनं॥इं
द्रोबुंदंस्वाततं॥निरविध्यद्गिरिभ्यआधारयत्पक्कमोदनमुदकदानंमेघं॥इंद्रोबुंदं

नि॰पू॰६
८५

स्वाततं॥ हृंदं बुंदेन भ्या ख्यातं हृंदारकश्च॥३४॥ अयंयो होता किरु स यमस्य कमप्यू
हे यत्समंञ्जंति देवाः॥ अहरहर्जायते मासिमास्यथा देवा दधिरे हव्यवाहं॥ अयंयो
होता कर्ता स यमस्य कमप्यूहेन्नमभिवहति यत्समश्नुवंति देवा अहरहर्जायते मा
से मासेर्द्धमासेर्द्धमासे वाथ देवा निदधिरे हव्यवाहमुल्बमूर्णोतेर्वृणोतेर्वा॥ मह
त्तदुल्बं स्थविरं तदासीदित्यपि निगमो भवत्यृबीसमपगतभासमपहृतभासमनं
तर्हितभासं गतभासं वा॥३५॥ हिमेनाग्निं घ्रंसमवारयेथां पितुमतीमूर्जमस्मा अ राम॰
धत्तं॥ ऋबीसे अत्रिमश्विनावनीतमुन्निन्यथुः सर्वगणं स्वस्ति॥ हिमेनोदकेन ग्री ८५

ष्मांतेग्निंघ्रंसमहरद्वारयेथामन्नवतीश्चास्माऊर्जमधत्तमग्नयेयोयमृबीसेपृथि
व्यामग्निरंतरौषधिवनस्पतिष्वप्स्वतमुन्निन्यथुः सर्वगणंसर्वनामानंगणोग
णानाद्रुपाश्रयदृष्टओषधयउद्यंतिप्राणिनश्चपृथिव्यांतदश्विनोरूपंतेनेनौस्तौ
तिस्तौति॥३६॥इतिनिरुक्तेपूर्वषट्केषष्ठोऽध्यायः॥संपूर्णंसमाप्तं॥शुभमस्तु

वमंग्नेलतणाउद्धंहाजासंतंपलप्रासिणीवारुद्रईमसे ३३
तेश्रायंतइवाश्रंवंहिसोमानस्चरणिमिंद्रंसोमावरुणुस्वपा
चस्तोअध्वरेस्तिहिवोसूतैंसतैंप्रवोवृसद्प्रस्तुजेतुंजेयोअ

॥ इति पूंर्व षट्क समासः ॥

नि॰उ॰१
१

श्रीगणेशाय नमः ॥ अथ निरुक्त उत्तरषट्कप्रारंभ ॥ ॐ अथातो दैवतं तद्यानि नामा
नि प्राधान्यस्तुतीनां देवतानां तद्दैवतमित्याचक्षते सैषा देवतोपपरीक्षा यत्कामः
ऋषिर्यस्यां देवतायामार्थपत्यमिच्छन्स्तुतिं प्रयुंक्ते तद्दैवतः स मंत्रो भवति तास्त्रिविधाः
ऋचः परोक्षकृताः प्रत्यक्षकृताऽआध्यात्मिक्यश्च तत्र परोक्षकृताः सर्वाभिर्नामविभ
क्तिभिर्युज्यंते प्रथमपुरुषैश्चाख्यातस्य ॥ १ ॥ इंद्रो दिवः इंद्रः ईशे पृथिव्याः इंद्रमिद्गाथि
नो बृहदिंद्रेणैते तृत्सवो वेविषाणाः इंद्राय साम गायत नेंद्रादृते पवते धाम किंचनें
द्रस्य नु वीर्याणि प्रवोचमिंद्रे कामाः अयंसतेत्यथ प्रत्यक्षकृता मध्यमपुरुषयोगास्त्व

राम॰
१

मितिचैतेनसर्वनाम्नात्वमिंद्रबलादधिविनःइंद्रमृधोजहीत्यथापिप्रत्यक्षकृताः
स्तोतारोभवंतिपरोक्षकृतानिस्तोतव्यानिमाचिदन्यद्विशंसतकण्वाऽअभिप्रगायतो
पप्रेतकुशिकाश्चेतयध्वमित्यथाध्यात्मिक्यऽउत्तमपुरुषयोगाऽअहमितिचैतेनस
र्वनाम्नायथैतदिंद्रोवैकुंठोलवसूक्तंवागांभृणीयमिति॥२॥परोक्षकृताःप्रत्यक्षकृ
ध्या३ ताश्चमंत्राभूयिष्ठाऽअल्पशऽआत्मिकाऽअथापिस्तुतिरेवभवतिनाशीर्वादऽइंद्रस्यनु
वीर्याणिप्रवोचमितियथैतस्मिन्सूक्तेअथाप्याशीरेवनस्तुतिःसुचक्षाऽअहमक्षीभ्यां
भूयासंसुवर्चामुखेनसुश्रुत्कर्णाभ्यांभूयासमितितदेतद्बहुलमाध्वर्यवेयाज्ञेषुच

मंत्रेष्वथापिशपथाभिशापौ॥अद्यामुरीययदियातुधानोऽअस्मि॥अधासवीरैर्दश
भिर्वियूयाःइत्यथापिकस्यचिद्भावस्याचिख्यासा॥नमृत्युरासीदमृतंनतर्हि॥तमःआ
सीत्तमसागूळ्हमग्रे॥अथापिपरिदेवनाकस्माच्चिद्भावात्॥सुदेवोऽअद्यप्रपतेदना
वृत्॥नविजानामियदिवेदमस्मीत्यथापिनिंदाप्रशंसे॥केवलाघोभवतिकेवलादी॥
भोजस्येदंपुष्करिणीववेश्मेत्येवमक्षसूक्तेद्यूतनिंदाचकृषिप्रशंसाचैवमुच्चावचै
रभिप्रायैर्ऋषीणांमंत्रदृष्टयोभवंति॥३॥तद्येनादिष्टदेवतामंत्रास्तेषुदेवतोपप
रीक्षायद्देवतःसयज्ञोवायज्ञांगंवातद्देवताभवंत्यथान्यत्रयज्ञात्प्राजापत्याइतिया

ज्ञिकानाराशंसाः इति नैरुक्ताः अपि वा सा कामदेवता स्यात्प्रायोदेवता वास्ति ह्याचारो
बहुलं लोके देवदेवत्यमतिथिदेवत्यं पितृदेवत्यं याज्ञदैवतो मंत्रः इत्यपि ह्यदेवता दे
वतावत्स्तूयंते यथाश्वप्रभृतीन्योषधिपर्यंतान्यथाप्यष्टौ द्वंद्वानि स न मन्येतागंतूनि
वार्थांदेवतानां प्रत्यक्षदृश्यमेतद्भवति माहाभाग्याद्देवतायाः एकः आत्मा बहुधा स्तू
यते एकस्यात्मनोन्ये देवाः प्रत्यंगानि भवं पि च सत्त्वानां प्रकृतिभूमभिर्ऋषयः स्तु त्य ३
वंतीत्याहुः प्रकृतिसार्वनाम्न्याच्चेतरेतरजन्मानो भवंतीतरेतरप्रकृतयः कर्मजन्मा
नः आत्मजन्मानः आत्मैवैषां रथो भवत्यात्माश्वाः आत्मायुधमात्मेषवः आत्मा

सर्वं देवस्य देवस्य॥ ४॥ तिस्रः एव देवताः इति नैरुक्ताः अग्निः पृथिवीस्थानो वायुर्वेंद्रो
वांतरिक्षस्थानः सूर्यो द्युस्थानस्तासां माहाभाग्यादेकैकस्याः अपि बहूनि नामधेया
नि भवंत्यपि वा कर्मपृथक्त्वाद्यथा होताध्वर्युर्ब्रह्मोद्गातेत्यप्येकस्य सतोपि वा पृथगे
व स्युः पृथग्घि स्तुतयो भवंति तथाभिधानानि यथोऽ एतत्कर्मपृथक्त्वादिति बहवोपि
विभज्य कर्माणि कुर्युस्तत्र संस्थानैकत्वं संभोगैकत्वं चोपेक्षितव्यं यथा पृथिव्यां मनु
ष्याः पशवो देवा इति स्थानैकत्वं संभोगैकत्वं च दृश्यते यथा पृथिव्याः पर्जन्येन च वा
य्वादित्याभ्यां च संभोगोग्निना चेतरस्य लोकस्य तत्रैतं नरराष्ट्रमिव॥ ५॥ अथाकार

चिंतनंदेवतानांपुरुषविधाःस्युरित्येकंचेतनावद्वद्धिस्तुतयोभवंतितथाभिधानान्यथापिपौरु
षविधिकैरंगैःसंस्तूयंते॥ऋष्वातइंद्रस्थविरस्यबाहूयत्संगृभ्णामघवन्काशिरित्ते॥अथापिपौ
रुषविधिकैर्द्रव्यसंयोगैः॥आद्वाभ्यांहरिभ्यामिंद्रयाहि॥कल्याणीर्जायासुरणंगृहेते॥अथापिपौ
रुषविधिकैःकर्मभिः॥अद्धींद्रपिबचप्रस्थितस्याश्रुत्कर्णश्रुधीहवं॥अपुरुषविधाःस्युरित्यप
रमपितुयदृश्यते॥६॥अपुरुषविधंतद्यथाग्निर्वायुरादित्यःपृथिवीचंद्रमाऽइतियथोऽएत
च्चेतनावद्वद्धिस्तुतयोभवंतीत्यचेतनान्यप्येवंस्तूयंतेयथाक्षप्रभृतीन्योषधिपर्यंतानियथोः
एतत्पौरुषविधिकैरंगैःसंस्तूयंतइत्यचेतनेष्वप्येतद्भवत्यभिक्रंदंतिहरितेभिरासभिरिति

नि॰उ॰१ ग्रावस्तुतिर्ययोएतस्योरुषविधिकैर्द्रव्यसंयोगेरित्येतदपितादृशमेवसुखंरथंयुयुजेसिं
४ धुरश्विनमितिनदीस्तुतिर्यथोऽएतस्योरुषविधिकैः कर्मभिरित्येतदपितादृशमेवहोतुश्चि
त्पूर्वेहविरद्यमाशतेतिग्रावस्तुतिरेवापिवोभयविधाः स्युरपिवापुरुषविधानामेवसतांक
र्मात्मानःऽएतेस्युर्यथायज्ञोयजमानस्यैषचाख्यानसमयः॥७॥तिस्रऽएवदेवताःऽइत्युक्तंपुर
स्तात्तासांभक्तिसाहचर्यंव्याख्यास्यामोथैतान्यग्निभक्तीन्ययंलोकः प्रातःसवनंवसंतोगाय
त्रीत्रिवृत्स्तोमोरथंतरंसामयेचदेवगणाःसमाम्नाताःप्रथमेस्थानेग्नायीपृथिवीळेतिस्त्रि राम॰
योथास्यकर्मवहनंचहविषामावाहनंचदेवतानांयच्चकिंचिद्दार्ष्टिविषयिकम ४

ग्निकर्मैवंतद्यथास्यसंस्तविकादेवा[illegible]ः इंद्रः सोमोवरुणः पर्जन्य ऋतवः आग्नावैष्ण
वंहविर्नत्वृक्संस्तविकीदशतयीषुविद्यतेथाप्याग्नापौष्णंहविर्नतुसंस्तवस्तत्रैतां
विभक्तिस्तुतिमृचमुदाहरंति॥ ८॥ पूषात्वेतश्च्यावयतुप्रविद्वाननष्टपशुर्भुवनस्य
४ सि गोपाः॥ सत्वैतेभ्यःपरिदद[illegible]तृभ्योग्निर्देवेभ्यःसुविदत्रियेभ्यः॥ पूषात्वेतःप्रच्यावय
तुविद्वाननष्टपशुर्भुवनस्यगोपाः इत्येषहिसर्वेषांभूतानांगोपायितादित्यःसत्वैते
भ्यःपरिददत्पितृभ्यः इतिसांशयिकस्तृतीयःपादःपूषापुरस्तात्तस्यान्वादेशः इत्ये
कमग्निरुपरिष्टात्तस्यप्रकीर्तनेनेत्यपरं॥अग्निर्देवेभ्यःसुविदत्रियेभ्यः॥सुविदत्रंध

नि॰उ॰१
५

नंभवतिविंदतेर्वैकोपसर्गाद्दातोर्वास्याह्युपसर्गात्॥९॥ अथैतानींद्रभक्तीन्यंतरिक्ष
लोकोमाध्यंदिनंसवनंग्रीष्मस्त्रिष्टुप्पंचदशस्तोमोबृहत्सामयेचदेवगणाःसमा
म्नातामध्यमेस्थानेयाश्चस्त्रियोथास्यकर्मरसानुप्रदानंवृत्रवधोयाचकाचबल
कृतिरिंद्रकर्मैवतदथास्यसंस्तविकादेवागणाः अग्निःसोमोवरुणःपूषाबृहस्पति
र्ब्रह्मणस्पतिःपर्वतःकुत्सोविष्णुर्वायुरथापिमित्रोवरुणेनसंस्तूयतेपूष्णारुद्रेणच
सोमोऽग्निनाचपूषावातेनचपर्जन्यः॥१०॥ अथैतान्यादित्यभक्तीन्यसौलोकस्तृतीय
सवनंवर्षाजगतीसप्तदशस्तोमोवैरूपंसामयेचदेवगणाःसमाम्नाताऽउत्तमेस्थाने

राम॰
५

याश्च स्त्रियोथास्य कर्म रसादानं रश्मिभिश्च रसाधारणं यच्च किंचित्प्रवल्हितं मादित्य
कर्मैव तच्चंद्रमसा वायुनासंवत्सरेणेति संस्तवः ऽ एतेष्वेव स्थानव्यूहेष्वृतुछंदस्तोमपृ
ष्ठस्य भक्तिशेषमनुकल्पयीत शरदनुष्टुबेकविंशस्तोमो वैराजं सामेति पृथिव्यायत
नानिहेमंतः पंक्तिस्त्रिणवस्तोमः शाक्वरं सामेत्यंतरिक्षायतनानि शिशिरोतिछंदा
स्त्रयस्त्रिंशस्तोमो रैवतं सामेति द्युभक्तीनि ॥ १२ ॥ मंत्रा मननाछंदांसि छादनात्स्तोम
स्तवनाद्यजुर्यजतेः साम संमितमृचास्यतेर्वर्चोसमं मेन ऽ इति नैदानां गायत्री गाय
तेः स्तुतिकर्मणस्त्रिगमना वा विपरीतां गायतो मुखादुदपतदिति च ब्राह्मणमुष्णि

गुत्स्नाताभवतिस्निह्यतेर्वास्यात्कांतिकर्मणःउष्णीषिणीवेत्यौपमिकमुष्णीषंस्नाय
तेःककुप्ककुभिनीभवतिककुप्चकुब्जश्चकुजतेर्वोब्जतेर्वानुष्टुबनुष्टोभनाद्गा
यत्रीमेवत्रिपदांसतींचतुर्थेनपादेनानुष्टोभतीतिचब्राह्मणंबृहतीपरिबर्हणात्पं
क्तिःपंचपदात्रिष्टुप्स्तोभत्युत्तरपदाकातुत्रितास्यात्तीर्णतमंछंदस्त्रिवृद्वज्रस्तस्य
स्तोभतीतिवायत्त्रिरस्तोभत्तत्त्रिष्टुभस्त्रिष्टुप्त्वमितिविज्ञायते॥१२॥जगतीगततमं
छंदोजलचरगतिर्वाजल्गल्यमानोसृजदितिचब्राह्मणंविराड्विराजनाद्वाविराधनाद्वा
विप्रापणाद्वाविराजनात्संपूर्णाक्षराविराधनौक्षराविप्रापणादधिकाक्षरापिपीलि

दूना१ रा२

कमध्येस्तोपमिकंपिपीलिकापेलतेगतिकर्मणःइतीमादेवताःअनुक्रांताःसूक्तभा
जोहविर्भाजऋग्भाँश्चभूयिष्ठाःकाश्चिन्निपातभाजोथोताभिधानैःसंयुज्यहविश्चो
दयतींद्रायवृत्रघ्नःइंद्रायवृत्रतुरःइंद्रायांहोमुचःइतितान्यप्येकेसमामनंतिभूयां
सितुसमाम्नानाद्यत्तुसंविज्ञानभूतंस्यात्प्राधान्यस्तुतितत्समामनेथोतकर्मभिर्ऋ
षिर्देवताःस्तौतिवृत्रहापुरंदरःइतितान्यप्येकेसमामनंतिभूयांसितुसमाम्नानाद्व्यंज
नमात्रंतुतत्तस्याभिधानस्यभवतियथाब्राह्मणायबुभुक्षितायोदनंदेहिस्नाताया
नुलेपनंपिपासतेपानीयमिति।।१३।।अथातोनुक्रमिष्यामोग्निःपृथिवीस्थानस्तं

नि०उ०१ प्रथमं व्याख्यास्यामोग्निः कस्मादग्रणीर्भवत्यग्रं यज्ञेषु प्रणीयतेंगं नयति सन्नम
७ मानोक्नोपनो भवतीति स्थौलाष्ठीविर्नक्नोपयति न स्नेहयति त्रिभ्यः आख्यातेभ्यो जा
यतः इति शाकपूणिरितादक्ताद्दग्धाद्वानीतात्स खल्वेतेरकारमादत्ते गकारमनक्ते
र्वा दहतेर्वा नीः परस्तस्यैषा भवति ॥१८॥ अग्निमीळे पुरोहितं यज्ञस्य देवमृत्विजं ॥
होतारं रत्नधातमं ॥ अग्निमीळेग्निं याचामीळिरध्येषणाकर्मा पूजाकर्मा वा पुरोहि
तो व्याख्यातो यज्ञश्च देवो दानाद्वा दीपनाद्वा द्योतनाद्वा द्युस्थानो भवतीति वा यो देवः राम०
सा देवता होतारं ह्वातारं जुहोतेर्होतेत्यौर्णवाभो रत्नधातमं रमणीयानां धनानां दा ७

तृतमंतस्यैषापराभवति॥१५॥अग्निःपूर्वेभिर्ऋषिभिरीड्योनूतनेरुत॥सदेवाँऽए
हवक्षति॥अग्निर्यःपूर्वैर्ऋषिभिरीळितव्योवंदितव्योस्माभिश्चनवतरैःसदेवानि
हावहत्वितिसनमन्येतायमेवाग्निरित्यप्येतेउत्तरेज्योतिषीऽअग्नीऽउच्येतेततोनुम
ध्यमः॥१६॥अभिप्रवंतसमनेवयोषाःकल्याण्यः१स्मयमानासोअग्निं॥घृतस्यधा
राःसमिधोनसंतताज्जुषाणोहर्यतिजातवेदाः॥अभिनवंतसमनसःऽइवयोषाः
समनंसमननाद्वासंमाननाद्वाकल्याण्यःस्मयमानासोऽअग्निमित्योपमिकंघृतस्य
धाराउदकस्यधाराःसमिधोनसंततनसतिराप्नोतिकर्मावानमतिकर्मावा॥ताज्जुषा

योहर्यतिजातवेदाः॥ हर्यतिःप्रेप्साकर्मा विहर्यतीति समुद्रादूर्मिर्मधुमांऽउदारदित्यादित्य
मुक्तंमन्यंते समुद्राद्ध्येषोद्भ्यःउदेतीति च ब्राह्मणमथापि ब्राह्मणंभवत्यग्निःसर्वादेवता
इति तस्योत्तराभूयसे निर्वचनाय॥१७॥ इंद्रंमित्रंवरुणमग्निमाहुरथोदिव्यःससुपर्णोग
रुत्मान्॥ एकंसद्विप्राबहुधावदंत्यग्निंयमंमातरिश्वानमाहुः॥ इममेवाग्निंमहांतमा
त्मानमेकमात्मानंबहुधामेधाविनोवदंतींद्रंमित्रंवरुणमग्निंदिव्यंचगरुत्मंतंदिव्योदि
विजोगरुत्मानीरणवान्गुर्वात्मामहात्मेतिवायस्तुसूक्तंभजतेयस्मैहविर्निरुप्यतेय
मेवसोग्निर्निपातमेवैतेउत्तरेज्योतिषीऽएतेननामधेयेनभजेते॥१८॥ जातवेदाःकस्मा

[redacted]

ज्ञातानि वेदज्ञाता तानि वैनं विदुर्ज्ञाते जाते विद्यतः इति वा जातवित्तो वा जातंविद्यो वा जात
प्रज्ञानौ यत्तज्जातः पशून विंदतेति तज्जातवेदसो जातवेदस्त्वमिति ब्राह्मणं तस्मात्सर्वानृतू
न्पशवोग्निमभिसर्पंतीति च तस्यैषा भवति॥१९॥ प्रनूनंजातवेदसमश्वंहिनोतवाजिनं॥
इदंनोबर्हिरासदे॥ प्रहिणुतजातवेदसंकर्मभिः समश्नुवानमपिवोपमार्थेस्यादश्वमिव
जातवेदसमितीदंनोबर्हिरासीदत्विति तदेतदेकमेवजातवेदसंगायत्रंतृचंदशतीषु
विद्यते यत्तु किंचिदाग्नेयं तज्जातवेदसानांस्थाने युज्यते॥२०॥ सनमन्येतायमेवाग्नि
रित्यप्येते उत्तरेज्योतिषी जातवेदसी उच्येते ततोनुमध्यमः॥ अभिप्रवंतसमनेव

यी३

नि·उ·१
९
४ नैः

योषाऽइतितत्पुरस्ताद्व्याख्यातमथासावादित्यः उदुत्यंजातवेदसमितितदुपरिष्टाद्व्याख्यास्या
मोयस्तुसूक्तंभजतेयस्मैहविर्निरुप्यतेयमेवसोऽग्निर्जातवेदा। निपातमेवैतेऽउत्तरेज्योति
षीऽएतेननामधेयेनभजेते॥२०॥ वैश्वानरःकस्माद्विश्वान्नरान्नयतिविश्वऽएनंनरानयं
तीतिवापिवाविश्वानरऽएवस्यात्प्रत्यृतः सर्वाणिभूतानितस्यवैश्वानरस्तस्यैषाभवति॥२१॥
वैश्वानरस्यसुमतौस्यामराजाहिकंभुवनानामभिश्रीः॥ इतोजातोविश्वमिदंविचष्टेवैश्वा
नरोयततेसूर्येण॥ इतोजातःसर्वमिदमभिविपश्यतिवैश्वानरःसंयततेसूर्येणराजा
यःसर्वेषांभूतानामभिश्रयणीयस्तस्यवयंवैश्वानरस्यकल्याण्यांमतौस्यामेतितत्को

राम·
९

वैश्वानरो मध्यमऽ इत्याचार्यो वर्षकर्मणा ह्येनं स्तौति ॥ २२ ॥ प्रनू महित्वं वृषभस्य वोचं
यं पूरवो वृत्रहणं सचंते ॥ वैश्वानरो दस्युमग्निर्जघन्वाँऽ अधूनोत्काष्ठा अव शंबरं भेत् ॥
प्रब्रवीमि तन्महत्वं माहाभाग्यं वृषभस्य वर्षितुरपां यं पूरवः पूरयितव्या मनुष्या वृत्र
हणं मेघहनं सचंते सेवंते वर्षकामां दस्युर्दस्यतेः क्षयार्थादुपदस्यंत्यस्मिन्रसाऽ उपदा
सयति कर्माणि तमग्निर्वैश्वानरो घ्नंनवा धूनोदपः काष्ठाऽ अभिनच्छंबरं मेघमथासा
वादित्यऽ इति पूर्वे याज्ञिकाऽ एषां लोकानां रोहेण सवनानां रोहऽ आम्नातो रोहात्प्रत्यव
रोहश्चिकीर्षितस्तामनुकृतिं होताग्निमारुते शस्त्रे वैश्वानरीयेण सूक्तेन प्रतिपद्यते सो

ग्निनस्तोत्रियमाद्रियेताग्नेयोहिभवतिततऽआगच्छतिमध्यस्थानादेवतारुद्रश्चमरुतश्चत
तोग्निमिहस्थानमत्रैवस्तोत्रियंशंसंत्यथापिवैश्वानरीयोद्वादशकपालोभवत्येतस्यहिद्वा
दशविधंकर्माथापिब्राह्मणंभवत्यसौवाऽआदित्योग्निर्वैश्वानरऽइत्यथापिनिवित्सौर्य
वैश्वानरीभवत्यायोद्यांभात्यापृथिवीमित्येषहिद्यावापृथिव्यावाभासयत्यथापिछांदोमि
कंसूक्तंसौर्यवैश्वानरंभवतिदिविपृष्टोऽअरोचतेत्येषहिदिविपृष्टोऽअरोचतेत्यथापि
हविष्पांतीयंसूक्तंसौर्यवैश्वानरंभवत्ययमेवाग्निर्वैश्वानरऽइतिशाकपूणिर्विश्वानरा
वित्यप्येतेऽउत्तरेज्योतिषीवैश्वानरोयंयत्ताभ्यांजायतेकथन्वयमेताभ्यांजायतऽइति

यत्रैवैद्युतःशरणमभिहृंतियावदनुपान्नोभवतिमध्यमधर्मैवतावद्भवत्युदकं घनःशरी
रोपशमनःउपादीयमानःएवायंसंपद्यतेःउदकोपशमनःशरीरदीप्तिर थादित्यादुदीवि
प्रथमसमावृत्तःआदित्सेकँसंवामणिंवापरिमृज्य प्रतिस्वरेयत्रशुष्कगो मयमसंस्प
र्शयंधारयतितत्मदीप्यतेसोयमेवसंपद्यतेथाप्याहवैश्वानरोयततेसूर्येणोतिनचपुन
रात्मनात्मानंसंयततेन्येनैवान्यःसंयततेःइतःइममादधात्यमुतोमुष्परश्मयःप्रादुर्भवं
तीतोस्यार्चिषस्तयोर्भासोःसंसंगंदृष्ट्वैवमवक्ष्यदथयान्येतान्यौत्तमिकानिसूक्तानिभा
गानिवासावित्राणिवासौर्याणिवापोष्मानिवाविप्लवानिवावैश्वदेव्यानिवातेषुवैश्वान

नि॰उ॰१ रीयाःप्रवादाःऽअभविष्यन्नादित्यकर्मणाचै नमस्तोष्यन्नित्युदेषीत्यस्तमेषीतिविपर्येषी
११ त्याग्नेयेष्वेवहिसूक्तेषुवैश्वानरीयाःप्रवादाभवंत्यग्निकर्मणाचैनंस्तोतीतिवहसीतिपचसी
तिदहसीतियथोऽएतद्वर्षकर्मणाह्येनंस्तोतीत्यस्मिन्नप्येतदुपपद्यते॥ समानमेतदुदक
मुच्चैत्यवचाहभिः॥भूमिंपर्जन्याजिन्वंतिदिवंजिन्वंत्यग्नयः॥ इतिसानिगदव्याख्याता॥२३॥
कृष्णंनियानंहरयःसुपर्णाःऽअपोवसानादिवमुत्पतंति॥तऽआववृत्रन्त्सदनादृतस्या
दिद्घृतेनपृथिवीव्युद्यते॥कृष्णंनिरयणंरात्रिरादित्यस्यहरयःसुपर्णाहरणाःऽआदित्य राम॰
रश्मयस्तेयदामुतोर्वाञ्चःपर्यावर्ततेसहस्थानादुदकस्यादित्यादथघृतेनोदकेनपृथिवीव्यु ११

घृतेघृतमित्युदकनाम जिघर्तेः सिंचतिकर्मणोयापि ब्राह्मणं भवत्यग्निर्वा ऽ इतोवृष्टिं स
मीरयति धाम छादिव खलु वै भूत्वा वर्षति मरुतः सृष्टां वृष्टिं नयंति यदा खलु वा ऽ असावा
दित्योन्यङ् रश्मिभिः पर्यावर्ततेथ वर्षतीति यथो ऽ एतद्द्रोहात्मस्यवरोहश्चिकीर्षितः ऽ इत्या
म्नायवचनादेतद्भवति यथो ऽ एतद्वैश्वानरीयो द्वादशकपालो भवतीत्यनिर्वचनं कपाला
नि भवंत्यस्तिहि सौर्ये ऽ एककपालः पंचकपालश्चयथो ऽ एतद्ब्राह्मणं भवतीति बहुभक्ति
वादीनि हि ब्राह्मणानि भवंति पृथिवी वैश्वानरः संवत्सरो वैश्वानरो ब्राह्मणो वैश्वा
नरः ऽ इति यथो ऽ एतन्निवित्सौर्ये वैश्वानरी भवतीसस्यैव सा भवति यो विद्वो मानुषी

नि॰३॰१ भ्योदीदेदित्येषहिविद्वान्मानुषीभ्योदीप्यतेयथोऽएतच्छांदोमिकंसूक्तंसोर्यवैश्वानरंभ
१२ वतीत्यस्यैवतद्भवतिजमदग्निभिराहुतः इतिजमदग्नयःप्रजमिताग्नयोवाप्रज्वलिता
ग्नयोवातैरभिहुतोभवतियथोऽएतद्धविष्पांतीयंसूक्तंसोर्यवैश्वानरंभैतीत्यस्यै व३
त४ वैद्भवति॥२४॥ हविष्पांतमजरंस्वर्विदिदिविस्पृश्याहुतंजुष्टमग्नौ॥तस्यभर्मणेभुव
नायदेवाधर्मणेकंस्वधयापप्रथंत॥ हविर्यत्पानीयमजरंसूर्यविदिदिविस्पृश्यमभिहु दि३
तंजुष्टमग्नौतस्यभरणायचभावनायचधारणायचैतेभ्यःसर्वेभ्यःकर्मभ्योदेवाऽइ राम॰
ममग्निमन्नेनापप्रथंतायाप्याह॥२५॥ अपामुपस्थेमहिषाऽअगृभ्णतविशोराजा १२

नमुपतस्थुर्ऋग्मियं ॥ आदूतोऽअग्निमभरद्विवस्वतो वैश्वानरंमातरिश्वा परावतः ॥
अपामुपस्थऽउपस्थानेमहत्यंतरिक्षलोकऽआसीनामहांतऽइतिवागृह्यतमाध्यमि
कादेवगणाविशऽइवराजानमुपतस्थुर्ऋग्मियमृग्मंतमितिवार्च्चनीयमितिवापूज
नीयमितिवाहरद्यंदूतोदेवानांविवस्वतऽआदित्याद्विवस्वान्विवासनवान्मेरितवतः
परागताद्धोपिवास्याग्नेर्वैश्वानरस्यमातरिश्वानमाहर्तारमाहमातरिश्वावायुर्मा
तर्यंतरिक्षेश्वसितिमातर्योश्वनितीतिवाथेनमेताभ्यांसर्वाणिस्थानान्यभ्यापादंस्तौति ॥
२६ ॥ मूर्द्धाभुवोभवतिनक्तमग्निस्ततःसूर्योजायतेप्रातरुद्यन् ॥ मायामूतुयज्ञियाना

नि॰उ॰१
१३

मेतामपोयच्चूर्णीश्चरतिप्रजानन्॥मूर्धामूर्तमस्मिन्धीयतेमूर्धायःसर्वेषांभूतानांभ
वतिनक्तमग्निःस्ततःसूर्योजायतेप्रातरुद्यन्त्सऽएवप्रज्ञांत्वेतांमन्यंतेयज्ञियानांदेवानांय
ज्ञसंपादिनामपोयत्कर्मचरतिप्रजानन्त्सर्वाणिस्थानान्यनुसंचरतित्वरमाणस्तस्योत्त
राभूयसेनिर्वचनाय॥२७॥स्तोमेनहिदिविदेवासोऽअग्निमजीजनञ्छक्तिभीरोदसिप्रां॥
तमूऽअकृण्वंत्रेधाभुवेकंसऽओषधीःपचतिविश्वरूपाः॥स्तोमेनयंहिदिविदेवासोऽ
अग्निमजनयंछक्तिभिःकर्मभिर्द्यावापृथिव्योरापूरणंतमकुर्वंस्त्रेधाभावायपृथि
व्यामंतरिक्षेदिवीतिशाकपूणिर्यदस्यदिवितृतीयंतदसावादित्यःऽइतिहिब्राह्मणंत

राम॰
१३

दग्नीकृत्यस्तौत्यथैनमेतयादित्यीकृत्यस्तौति ॥२८॥ यदेदेनमदधुर्यज्ञियासो दिवि देवाः
सूर्यमादितेयं ॥ यदाचरिष्णू मिथुनावभूतामादित्प्रापश्यन्भुवनानि विश्वा ॥ यदैनमदधु
र्यज्ञियाः सर्वे दिवि देवाः सूर्यमादितेयमदितेः पुत्रं यदाचरिष्णू मिथुनौ प्रादुरभूतां सर्वदा
सहचारिणावुषाश्चादित्यश्च मिथुनौ कस्मान्मिनोतिश्रयतिकर्मा थुः इति नामकरणः थ
कारो वा नयतिः परो वनिर्वा समाश्रितावन्योन्यं नयतो वनुतो वा मनुष्यमिथुनाव
प्येतस्मादेव मेथंतावन्योन्यं वनुतः इति वाथैनमेतयाग्नीकृत्यस्तौति ॥२९॥ यत्राव
दते अवरः परश्च यज्ञन्योः कतरो नौ विवेद ॥ आशेकुरित्सधमादं सखायो नक्षंत

नि॰उ॰१ यज्ञंकइदंविवोचत्॥यत्रविवदेतेदैव्योहोतारावयंचाग्निरसौचमध्यमःकतरोनौयज्ञे
१७ भूयोवेदेत्याशङ्कुवंतितत्सहमदनंसमानाख्यानाऽऋत्विजस्तेषांयज्ञंसमश्नुवानानांको
नःइदंविवक्ष्यतीतितस्योत्तराभूयसेनिर्वचनाय॥३०॥यावन्मात्रमुषसोनप्रतीकंसु
४ त पर्ण्यो३वसतेमाँरिश्वः॥तावद्दधात्युपयज्ञमायन्ब्राह्मणोहोतुरवरोनिषीदन्॥याव
न्मात्रमुषसःप्रत्यक्तंभवतिप्रतिदर्शनमितिवास्त्युपमानस्यसंप्रत्यर्थेप्रयोगइहेवनिधेही
तियथासुपर्ण्यःसुपतनाःएतारात्र्योवसतेमातरिश्वंज्योतिर्वर्णस्य[redacted]तावदु राम॰
पदधातियज्ञमागछन्ब्राह्मणोहोतास्याग्नेर्होतुरवरोनिषीदन्होतृजपस्त्वनग्निर्वैश्वा १४

४ येति

नरीयोभवतिदेवसवितरेतंत्वावृणतेग्निंहोत्रायसहपित्रावैश्वानरेणेतीममेवाग्निंसवि
तारमाहसर्वस्यप्रसवितारंमध्यमंवोत्तमंवापितरंयस्तुसूक्तंभजतेयस्मैहविर्निरुप्यते
यमेवसोग्निर्वैश्वानरोनिपातमेवैतेः उत्तरेज्योतिषीः एतेननामधेयेनभजेतेभजेते॥
३१॥अथातोदैवतमिंद्रोदिवः परोक्षकृतास्तौल्लोयाकारचिंतनमपुरुषविधंतत्तिस्रः एव
देवताः इत्युक्तंपूषात्वाथैतानींद्रभक्तीन्यथैतान्यादित्यभक्तीनिमंत्रामननाज्जगतीगतत
ममथातोनुक्रमिष्यामोग्निमीळेग्निःपूर्वेभिरभिप्रवंतेंद्रंमित्रंजातवेदाःकस्मात्प्रनूनं
जातवेदसंवैश्वानरःकस्माद्वैश्वानरस्यप्रनूमहित्वंवृषंनियानंहविष्यांतमपामुपस्थे

मूर्धाभुवस्तोमेनहियद्देदेनैंयत्रावदेतेयावन्मात्रमेकत्रिंशात्॥३२॥इतिनिरुक्तेउत्तरष
ट्केप्रथमोऽध्यायः॥१॥ॐद्रविणोदाःकस्माद्धनंद्रविणमुच्यतेयदेनदभिद्रवंतिबलंवा
द्रविणंयदेनेनाभिद्रवंतितस्यदानाद्द्रविणोदास्तस्यैषाभवति॥१॥द्रविणोदाद्रविणसोग्रा
वहस्तासोऽअध्वरे॥यज्ञेषुदेवमीळते॥द्रविणोदायस्त्वंद्रविणसइतिद्रविणसादिनइ
तिवाद्रविणसानिनःइतिवाद्रविणसस्तस्मात्पिबत्वितिवा॥यज्ञेषुदेवमीळते॥याचं
तिस्तुवंतिवर्द्धयंतिपूजयंतीतिवातत्कोद्रविणोदाःइंद्रःइतिक्रौष्टुकिःसबलधनयोर्दा
तृतमस्तस्यचसर्वाबलकृतिरोजसोजातमुतमन्यःएनमितिचाहाथाप्यग्निंद्रविणोद

समाहैषपुनरेतस्माज्जायते॥ योऽश्मनोरंतरग्निंजजानेत्यपिनिगमोभवत्यथाप्यृ
तुयाजेषुद्राविणोदसाःप्रवादाभवंतितेषांपुनःपात्रस्यैंद्रपानमितिभवत्यथाप्येनं
सोमपानेनस्तौत्यथाप्याहद्रविणोदाःपिबतुद्राविणोदसऽइत्ययमेवाग्निर्द्रविणोदाः
इतिशाकपूणिराग्नेयेष्वेवहिसूक्तेषुद्राविणोदसाःप्रवादाभवंति॥ देवाऽअग्निंधारयंद्र
विणोदामित्यपिनिगमोभवतिययोऽएतत्सबलधनयोर्दातृतमऽइतिसर्वासुदेवतास्वै
श्वर्यंविद्यतेयथोऽएतदोजसोजातमुतमन्यऽएनमितिचाहेत्ययमप्यग्निरोजसाबले
नमथ्यमानोजायतेतस्मादेनमाहसहसस्पुत्रंसहसःसूनुंसहसोयहुंयथोऽएतदग्निंद्रा

नि॰उ॰१ विणोदसमाहेत्यृत्विजोत्रद्रविणोदसःऽउच्यंतेहविषोदातारस्तेचैनंजनयंति॥ऋषीणां
१६ पुत्रोऽअधिराजऽएषऽइत्यपिनिगमोभवतियथोऽएतत्तेषांपुनःपात्रस्येंद्रपानमिति
भवतीतिभक्तिमात्रंतद्भवतियथावायव्यानीतिसर्वेषांसोमपात्राणांयथोऽएतत्सोम
पानेनैनंस्तौतीत्यस्मिन्नप्येतदुपपद्यते॥सोमंपिबमंदसानोगणश्रिभिरित्यपिनिगमो
भवतियथोऽएतद्द्रविणोदाःपिबतुद्राविणोदसःइत्यस्यैवतद्भवति॥२॥मेद्यंतुतेवह्न
ण्य२ योयेभिरीयसेरिष न्वीळयस्वावनस्पते॥आयूयाधृष्णोऽअभिगूर्यात्वंनेष्ट्रात्सोमं राम॰
द्रविणोदःपिबऽऋतुभिः॥मेद्यंतुतेवह्नयोवोढारोयेयास्यन्त्यृष्यंदृढीभवायूयधृष्णोऽ १६

अभिगूर्यत्वंनेष्ट्रीयाद्धिष्ण्याद्धिष्ण्योधिषण्योधिषणाभवोधिषणावाग्धिषेर्दधात्य
र्थेधीसादिनीवाधीसानिनीतिवा वनस्पतःइत्येनमाहैषहिवनानांपातावापालयिता
वावनंवनोतेःपिपर्तुभिःकालैः॥३॥अथातःआप्रियःआप्रियःकस्मादाप्नोतेःप्रीणा
तेर्वाप्रीभिराप्रीणा तीतिचब्राह्मणंतासामिध्मःप्रथमागामीभवतीध्मःसमिंधना
त्तस्यैषाभवति॥४॥समिद्धोःअद्यमनुषोदुरोणेदेवोदेवान्यजसिजातवेदः॥आच
वहमित्रमहश्चिकित्वांत्वंदूतःकविरसिप्रचेताः॥समिद्धोद्यमनुष्यस्यमनुष्यस्यगृ
हेदेवोदेवान्यजसिजातवेदःआचवहमित्रमहश्चिकित्वांश्चेतनावांत्वंदूतःकविर

नि.उ.२
१७

सिप्रचेताः प्रवृद्धचेतायज्ञे ध्मः इतिकात्थक्यो ग्निरि तिशाकपूणिस्तनूनपादाज्यंभव
तिनपादित्यननंतरायाः प्रजायानामधेयंनिर्णततमाभवति गोरत्रतनूरुच्यतेतत
ताः अस्यांभोगास्तस्याः पयोजायतेपयसः आज्यंजायतेग्निरि तिशाकपूणिरापोत्रत
न्वः उच्यंतेतताः अंतरिक्षेताभ्यः ओषधिवनस्पतयोजायंतेः ओषधिवनस्पतिभ्यः
एषजायतेतस्यैषाभवति॥५॥ तनूनपात्पथः ऋतस्ययानान्मध्वासमंजन्त्स्वदयासु
जिह्व॥ मन्मानि धीभिरुतयज्ञमृंधन्देवत्राचकृणुह्यध्वरंनः॥ तनूनपात्पथऋतस्य राम०
यानान्यज्ञस्ययानान्मधुनासमंजन्त्स्वदयकल्याणजिह्वमननानिचनोधीभिर्यज्ञंच १७

स्नमर्धयदेवान्नोयज्ञंगमयन्नराशंसोयज्ञऽइतिकात्थक्योनराऽअस्मिन्नासी नाःशं
संत्यग्निरितिशाकपूणिर्नरैःप्रशस्योभवतितस्यैषाभवति॥६॥न राशंसस्यमहिमा
नमेषामुपस्तोषामयजतस्ययज्ञैः॥येसुक्रतवःशुचयोधियंधाःस्वदंतिदेवाऽउभ
यानिहव्या॥नराशंसस्यमहिमानमेषामुपस्तुमोयज्ञियस्ययज्ञैर्येसुकर्माणःशुचयो
धियंधारयितारःस्वदयंतुदेवाऽउभयानिहवींषिसोमंचेतराणिचेतिवातांत्राणिचा
वापिकानिचेतिवेळऽईट्टेःस्तुतिकर्मणऽइंधतेर्वातस्यैषाभवति॥७॥आजुह्वानऽ
ईड्योवंद्यश्चायाह्यग्नेवसुभिःसजोषाः॥त्वंदेवानामसियह्वहोतासऽएनान्यक्षीषि

नि॰ उ॰ २ तोयजीयान्॥ आहूयमानः ईळितश्चावंदितश्च आयाया ह्यग्ने वसुभिः सहजोषणस्त्वं देवा
१८ नामसि यह्व होता यह्वः इति महतो नामधेयं यातश्च हूतश्च भवति॥ सः एनान्यक्षी षि
तोयजीयान्॥ इषितः प्रेषितः इति वा धीष्टः इति वायजीयान्यष्टृतरो बर्हिःणात्तस्यैषा परिबर्ह २
भवति॥ ८॥ प्राचीनं बर्हिः प्रदिशा पृथिव्या वस्तोरस्या वृज्यते अग्रेः अह्नां॥ व्युप्रथते
वितरं वरीयो देवेभ्यो अदितये स्योनं॥ प्राचीनं बर्हिः प्रदिशा पृथिव्या वसनायास्याः प्र
वृज्यतेऽग्रेऽह्नां बर्हिः पूर्वाह्णे तद्विप्रथते वितरं वितीर्णतरमिति वा विस्तीर्णतरमिति वा राम॰
वरीयो वरतरमुरुतरं वा देवेभ्यश्चादितये च स्योनं स्योनमिति सुखनाम स्यतेरवस्यं १८

त्येतत्सीवितव्यंभवतीतिवाद्वारोजवतेर्वाद्रवतेर्वावारयतेर्वातासामेषाभौंति॥९॥व्य व१
चस्वतीरुर्वियाविश्रयंतांपतिभ्योनजनयःशुंभमानाः॥देवीर्द्वारोबृहतीर्विश्वमिन्वादेवे
भ्योभवतसुप्रायणाः॥व्यंचनवत्यःऽउरुत्वेनविश्रयंतांपतिभ्यःइवजायाःऽऊरूमैथु
नेधर्मेशुशोभिषमाणावरतममंगमूरूदेव्योद्वारोबृहत्योमैंश्वमिन्वाविश्वमाभिरेति हसौवि४
यज्ञेगृहद्वारःऽइतिकात्थक्योऽग्निरितिशाकपूणिरुषासानक्तोषाश्चनक्ताचौषाव्याख्या
तोनक्तेतिरात्रिनामौंनक्तिभूतान्यवश्यायेनापिवानक्ताव्यक्तवर्णातैंषाभवति॥१०॥ योरे२
आसुष्वयंतीयजतेऽउपाकेऽउषासानक्तासदतांनियोनौ॥दिव्येयोषणेबृहतीसु

नि॰ उ॰ रुक्मेः अधिश्रियंशुक्रपिशंदधाने॥ सेष्मीयमाणेः इतिवासुप्सापयंत्याविति वासीद
१९ तामितिवान्यासीदतामितिवायज्ञियेः उपक्रांतेदिव्येयोषणेबृहत्यौमहत्यौसुरुक्मे
सुरोचनेः अधिदधानेशुक्रपेशसंश्रियंशुक्रंशोचतेर्ज्वलतिकर्मणः पेशः इतिरू
पनामपिंशतेर्विपिंशितंभवतिदैव्याहोतारादैव्यौहोतारौवयंचाग्निरसौचमध्य
मस्तयोरेषाभवति॥११॥ दैव्याहोताराप्रथमासुवाचामिमानायज्ञंमनुषोयज
ध्यै॥ प्रचोदयंताविदथेषुकारूप्राचीनंज्योतिःप्रदिशादिशंता॥ दैव्यौहोतारौप्रथमौ राम॰
सुवाचौनिर्मिमानौयज्ञंमनुष्यस्यमनुष्यस्ययजनायप्रचोदयमानौयज्ञेषुकर्तौ १९

रौपूर्वस्यां दिशि श्रियष्ट्यभिमितिप्रदिशंतौ तिसृतो देवी स्तिस्रो देव्यस्तासामेषा भवन्ति ॥ १२ ॥ आ
नो यज्ञं भारती तूयमेत्विळा मनुष्वदिह चेतयंती ॥ तिस्रो देवीर्बर्हिरेदं स्योनं सरस्वती
स्वपसः सदंतु ॥ ऐतु नो यज्ञं भारती क्षिप्रं भरत । आदित्यस्तस्य भा इडा च मनुष्यवदि
ह चेतयमाना तिस्रो देव्यो बर्हिरिदं सुखं सरस्वती च सुकर्माणः आसीदंतु त्वष्टा तूर्ण
मश्नुत इति नैरुक्तास्त्विषेर्वा स्याद्दीप्तिकर्मणस्त्वक्षतेर्वा स्यात्करोतिकर्मणस्तस्यै
षा भवन्ति ॥ १३ ॥ य इमे द्यावापृथिवी जनित्री रूपैरपिंशद्भुवनानि विश्वा ॥ तमद्य हो
तरिषितो यजीयां देवं त्वष्टारमिह यक्षि विद्वान् ॥ य इमे द्यावापृथिव्यौ जनयित्र्यौ

नि०उ०२
२०

रूपेरकरोद्भूतान्निवसर्वाणितमद्यहोतरिषितोयजीयान्देवंत्वष्टारमिहयजविद्वान्म
ध्यमिकस्त्वष्टेत्याहुर्मध्यमेचस्थानेसमाम्नातौग्निरितिशाकपूणिस्तस्यैषापराभव
ति॥१४॥आविष्ट्यौवर्धतेचारुरासुजिह्मानामूर्ध्वःस्वयशाःउपस्थे॥उभेत्वष्टुर्बि
भ्यतुर्जायमानात्प्रतीचीसिंहंप्रतिजोषयेते॥आविरावेदनात्तस्यौवर्धतेचारुरासु
चारुचरतेर्जिह्मंजिहीतेरूर्ध्वःउच्छ्रितोभवतिस्वयशाःआत्मयशाःउपस्थउपस्था
नेः उभेत्वष्टुर्बिभ्यतुर्जायमानात्प्रतीचीसिंहंप्रतिजोषयेते॥द्यावापृथिव्यावितिवा
होरात्रेःइतिवारणीःइतिवाप्रत्यक्तेसिंहंसहनंप्रत्यासेवेते॥१५॥वनस्पतिर्व्याख्या

राम०
२०

तस्तस्यैषाभवति॥१६॥ उपावसृजत्मन्यासमंजन्देवानां पाथऽऋतुथाहवींषि॥ वनस्प
तिः शमितादेवोऽअग्निः स्वदंतुहव्यं मधुनाघृतेन॥ उपावसृजात्मनात्मानं समंजन्दे
२ काले वानामन्नमृतावृतौ हवींषिकाले वनस्पतिः शमितादेवोऽअग्निरित्येतेत्रयः स्वदयंतुह
व्यं मधुना च घृतेन चेतत्को वनस्पतिर्यूपऽइतिकात्यक्योऽग्निरिति शाकपूणिस्तस्यैषा
पराभवति॥१७॥ अंजंतित्वामध्वरेदेवयंतो वनस्पतेमधुनादैव्येन॥ यदूर्ध्वस्तिष्ठाद्रवि
णेह धत्ताद्यद्वाक्षयोमातुरस्याऽउपस्थे॥ अंजंतित्वामध्वरेदेवान्कामयमानावनस्पते
मधुनादैव्येन च घृतेनचेयदूर्ध्वःस्थास्यसिद्रविणानि च नोदास्यसियद्वातेकृतःक्षयो

नि॰उ॰२ मातुरस्याः उपस्थ ः उपस्थानेग्निरितिशाकपूणिस्तस्यैषापराभवति॥१७॥ देवेभ्योव
२१ नस्पतेहवींषिहिरण्यपर्णप्रदिवस्तेः अर्थंप्रदक्षिणिद्रशनयानियूयः ऋतस्यवक्षि
पथिभीरजिष्ठैः॥ देवेभ्योवनस्पतेहवींषिहिरण्यपर्णः ऋतपर्णोपिवोपमार्थेस्याद्धि
रण्यवर्णपर्णेतिप्रदिवस्तेः अर्थंपुराणस्तेसोर्थ्यंतेप्रक्रमोयज्ञस्यवहपथिभीर
जिष्ठैर्ऋजुतमैरजस्वलतमैस्तप्रपिष्ठतमैरितिवातस्यैषापराभवति॥१८॥ वनस्प
तेरशनयानियूयपिष्टतमयावयुनानिविद्वान्॥ वहदेवत्रादिधिषोहवींषिप्रचदा राम॰
तारममृतेषुवोचः॥ वनस्पतेरशनयानियूयसुरूपतमयावयुनानिविद्वान्प्रज्ञाना २१

निप्रजानन्वहदेवान्यज्ञेदातुरीहवीं।षिप्रब्रूहिचदातारममृतेषुदेवेषुस्वाहाकृतयः स्वाहेत्ये
तत्स्कःऽआहेतिवास्वावागाहेतिवास्वंप्राहेतिवास्वाकृतंहविर्जुहोतीतिवातासामेषाभ
वति॥२०॥ सद्योजातोव्यमिमीतयज्ञमग्निर्देवानामभवत्पुरोगाः॥ अस्यहोतुःप्रदिश्य
तस्यवाचिस्वाहाकृतंहविरदंतुदेवाः॥ सद्योजायमानोनिरमिमीतयज्ञमग्निर्देवाना
भवत्पुरोगाअस्यहोतुःप्रदिश्यृतस्यवाच्यास्यैस्वाहाकृतंहविरदंतुदेवाऽइतियजंती
तीमाऽआप्रीदेवताऽअनुक्रांताऽअथकिंदेवताःप्रयाजानुयाजाऽआग्नेयाऽइत्येके॥२१
प्रयाजान्मेऽअनुयाजांश्चकेवलानूर्जस्वंतंहविषोदत्तभागं॥घृतंचापंपुरुषंचौषधी

नि.उ.२
२२

नामग्नेश्च दीर्घमायुरस्तु देवाः॥ तव प्रयाजाऽअनुयाजाश्च केवल ऊर्जस्वंतो हविषः
संतु भागाः॥ तवाग्ने यज्ञोऽयमस्तु सर्वस्तुभ्यं नमंतां प्रदिशश्चतस्रः॥ आग्नेया वै प्र
याजाऽआग्नेयाऽअनुयाजाःइति च ब्राह्मणं छंदो देवताऽइत्यपरं छंदांसि वै प्रया जो
श्छंदांस्यनुयाजाःइति च ब्राह्मणमृतुदेवताःइत्युपरमृतवो वै प्रयाजाःऋतवोनुया
जाःइति च ब्राह्मणं पशुदेवताःइत्यपरं पशवो वै प्रयाजाः पशवोनुयाजाःइति च
ब्राह्मणं प्राणदेवताःइत्यपरं प्राणा वै प्रयाजाः प्राणा वाऽअनुयाजाःइति च ब्राह्म
णमात्मदेवताइत्यपरमात्मा वै प्रयाजाऽआत्मा वाऽअनुयाजाइति च ब्राह्मणमा

राम.
२२

ग्नेयाः इतितु स्थितिर्भक्तिमात्रमितरत्किमर्थंपुनरिदमुच्यते यस्यैदेवतायैहविर्गृहीतं
स्यात्तांमनसाध्यायेद्वषट्करिष्यंनितिहविज्ञायतेतान्येतान्येकादशाप्रीसूक्तानितेषांवा
सिष्ठमात्रेयंवाध्र्यश्वंगार्त्समदमितिनाराशंसवंतिमेधातिथंदैर्घतमसंप्रैषिकमित्यु
भयवंत्यतोन्यानितनूनपात्वंतितनूनपात्वंति॥२२॥ इतिनिरुक्ते उत्तरषट्के द्वितीयोऽध्या ती ४
यः॥२॥ ॐ द्रविणोदाः कस्माद्द्रविणोदाद्द्रविणसोमेधं तुतेयातऽआप्रियः समिद्धोऽअ
द्यतनूनपान्नराशंसस्याजुह्वानःप्राचीनंव्यचस्वतीरासुष्वयंतीदैव्याहोतारानोयज्ञं
यऽइमेऽआविष्ट्योवनस्पतिरुपावसृजांजंतिदेवेभ्योवनस्पतेवनस्पतेरशनयासद्यो

नि॰उ॰२
२३

जातःप्रयाजान्मेद्वाविंशतिः॥ ॐ अथयानिपृथिव्यायतनानिसत्वानिस्तुतिंलभंतेता
न्यतोनुक्रमिष्यामस्तेषामश्वःप्रथमागामीभवत्यश्वोव्याख्यातस्तस्येषाभवति॥१॥अ
श्वोवोळ्हासुखंरथंहसनामुपमंत्रिणः॥शेपोरोमण्वंतोभेदोवारिंमंडूकइछंतींद्रा
येंदोपरिस्रव॥ अश्वोवोळ्हासुखंवोळ्हारथंवोळ्हासुखमितिकल्याणनामकल्याणंपु
ण्यंसुहितंभवतिसुहितंगम्यतीतिवाहसेतावापातावापालयितावाशेपमृछतीतिवा
रिवारयतिमानोव्याख्यातस्तस्येषाभवति॥२॥मानोमित्रोवरुणोऽअर्यमायुरिंद्र
ऋभुक्षामरुतःपरिख्यन्॥यद्वाजिनोदेवजातस्यसप्तेःप्रवक्ष्यामोविदथेवीर्याणि॥

राम॰
२३

यद्वाजिनो देवैर्जातस्य सप्तेः सरणस्य प्रवक्ष्यामो यज्ञे विदथे वीर्याणि मानस्त्वं मित्रश्च वरु
णश्चार्यमा चायुश्च वायुरयनः इंद्रश्चोरुक्षयण ऋभूणां राजेति वा मरुतश्च परिख्य
न्छैं निःशक्नोस्तुन्लेतुमात्मानं शक्नोति नदितुमिति वा शक्नोति तकितुमिति वा सर्वतः शंक
रोह्लिति वा शक्नोतेर्वा तस्यैषा भवति ॥३॥ कनिक्रदज्जनुषं प्रब्रुवाण इयर्ति वाचम
रितेव नावं ॥ सुमंगलश्च शकुने भवासि मा त्वा काचिदभिभा विश्व्या विदत् ॥ न्यक्रंदी
ज्जन्म प्रब्रुवाणो यथास्य शब्दस्तथा नामेरयन्ति वाचमीरयितेव नावं सुमंगलश्च श
कुने भव कल्याणमंगलो मंगलं गिरतेर्गृणात्यर्थे गिरत्यनर्थानिति वांगलमंगवन्म

नि॰उ॰२
२४

जयतिपापकमितिनैरुक्तांमागछत्वितिवामात्वत्ताका चिदभिभूतिःसर्वतोविदङ्गृत्समद
मर्थमभ्युत्थितंकपिंजलोभिववाशोतदभिवादिन्येषगर्भवति॥४॥भद्रंवददक्षिणतोभ
द्रमुत्तरतोवद॥भद्रंपुरस्तान्नोवदभद्रंपश्चात्कपिंजल॥इतिसानिगदव्याख्यातागृत्सम
दोगृत्समदनोगृत्सइतिमेधाविनामगृणातेःस्तुतिकर्मणोमंडूकामज्जूकामज्जनान्मद
तेर्वामोदतिकर्मणोमंदतेर्वातृप्तिकर्मणोमंडयतेरितिवैयाकरणांमंडऽएषामोकऽइति
वामंडोमदेर्वामुदेर्वातेषामेषाभवति॥५॥संवत्सरंशशयानाब्राह्मणाव्रतचारिणः॥
वाचंपर्जन्यजिन्वितांप्रमंडूकाऽअवादिषुः॥संवत्सरंशिश्यानांब्राह्मणाव्रतचारिणो

राम॰
२५

४ विं

ब्रुवाणा अपिवोपमार्थेस्याद्ब्राह्मणाइवव्रतचारिणाइतिवाचंपर्जन्यप्रीतांप्रावादिषुर्मं
डूकावसिष्ठोवर्षकामःपर्जन्यंतुष्टावतंमंडूकाःअन्वमोदंतसमंडूकाननुमोदमानान्दृष्ट्वा
तुष्टावतदभिवादिन्येषर्ग्भवति॥६॥उपप्लवदमंडूकिवर्षमावदतादुरि॥मध्येह्रदस्यप्ल
वस्वनिगृह्यचतुरःपदः॥इतिसानिगदव्याख्याताक्षाअश्नुवतःएनानितिवाभ्यश्नुव
तःएभिरितिवातेषामेषाभवति॥७॥प्रावेपामाबृहतोमादयंतिप्रवातेजाःइरिणेव
र्वृतानाः॥सोमस्येवमौजवतस्यभक्षोविभीदकोजागृविर्मह्यमच्छान्॥प्रावेपिणोमामम
हतोविभीदकस्यफलानिमादयंतिप्रवातेजाःप्रवणेजाःइरिणेवर्त्तमानाइरिणंनिर्ऋ

नि॰उ॰३
२५

र्णाम्रणातेरपार्णाभवत्यपरताअस्मादोषधयःइतिवा॥सोमस्येवमौजवतस्यभक्षः॥मौ
जवतोमूजवतिजातोमूजवान्पर्वतोमुंजवान्मुंजोविमुच्यतइषीकयेषीकेषतेर्गतिक
र्मणःइयमपीतरेषीकैतस्मादेवविभीदकोविभेदनाज्जागृविर्जागरणान्मह्यमच्छ
दत्स्यशंसत्येनान्प्रथमयानिंदत्युत्तराभिर्ऋषेरक्षपरिद्यूनस्यैतदार्षंवेदयंतेग्रावाणो
हंतेर्वागृणातेर्वागृह्णातेर्वातेषामेषाभवति॥८॥प्रैतेवदंतुप्रवयंवदामग्रावभ्यो
वाचंवदतावदद्भ्यः॥यदद्रयःपर्वताःसाकमाशवःश्लोकंघोषंभरथेंद्रायसोमिनः॥प्र
वदंत्वेतेप्रवदामवयंग्रावभ्योवाचं वदतवदद्भ्योयदद्रयःपर्वताअदरणीयाःसह

राम॰
२५

सोममाश्रवः क्षिप्रकारिणः श्लोकः शृणोते घोषो घुष्यते सोमिनो यूयं स्थेति वा सो
मिनो गृहेष्विति वा येन नराः प्रशस्यंते स नाराशंसो मंत्रस्तस्यैषा भवति ॥ १ ॥ अमंदा
न्स्तोमान्प्रभरे मनीषा सिंधावधिक्षियतो भाव्यस्य ॥ यो मे सहस्रममिमीत सवान
तूर्तो राजा श्रव ऽ इच्छमानः ॥ अमंदान्स्तोमानबालिशाननल्पान्वा बालो बलवर्ती भर्तव्यो
भवत्यबास्मा अलं भवतीति वा बा स्मै बलं भवतीति वा बलो वा प्रतिषेधव्यवहितः प्रभ
रे मनीषया मनस ऽ ईषया स्तुत्या प्रज्ञया वा सिंधावधिनिवसतो भावयव्यस्य राज्ञो यो
मे सहस्रं निरमिमीत सवानतूर्तो राजा तूर्ण ऽ इति वा त्वरमाण ऽ इति वा प्रशंसामिच्छमा

नः॥१०॥ यज्ञसंयोगाद्राजास्तुतिंलभेतराजसंयोगाद्युद्धोपकरणानितेषांरथःप्रथ
मागामीभवतिरथोरंहतेर्गतिकर्मणःस्थिरतेर्वास्याद्विपरीतस्यरममाणोस्मिंस्तिष्ठती
तिवारपतेर्वारसतेर्वातस्यैषाभवति॥११॥ वनस्पतेवीड्वंगोहिभूयाऽअस्मत्सखा
प्रतरणःसुवीरः॥ गोभिःसंनद्धोअसिवीळयस्वास्थातातेजयतुजेत्वानि॥ वनस्पतेदृ
ढांगोहिभवास्मत्सखाप्रतरणःसुवीरःकल्याणवीरोगोभिःसंनद्धोऽसिवीळयस्व
तिसंस्तंभस्वास्थातातेजयतुजेतव्यानिदुंदुभिरितिशब्दानुकरणंद्रुमोभिन्नःइतिवा
दुंदुभ्यतेर्वास्याच्छब्दकर्मणस्तस्यैषाभवति॥१२॥ उपश्वासयपृथिवीमुतद्यांपुरुत्रा

तेमनुतांविष्ठितंजगत्॥सदुंदुभेसजूरिंद्रेणदेवैर्दूराद्दवीयोअपसेधशत्रून्॥उप
श्वासयपृथिवींचदिवंचबहुधातेघोषंमन्यतांविषितंस्थावरंजंगमंचयत्सदुंदुभेस
हजोषणइंद्रेणचदेवैश्चदूराद्दूरतरमपसेधशत्रून्निषुधिरिषूणांनिधानंतस्येषाभ
वति॥१३॥बह्वीनांपिताबहुरस्यपुत्रश्चिश्चाकृणोतिसमनावगत्य॥इषुधिःसंकाःपृ
तनाश्चसर्वाःपृष्ठेनिनद्धोजयतिप्रसूतः॥बहूनांपिताबहुरस्यपुत्रःइतीषूनभिप्रेत्य
प्रस्मयतइवापाव्रियमाणःशब्दानुकरणंवासंकाःसच्यतेः[illegible]संपूर्वाद्वाकिरतेःपृष्ठे
निनद्धोजयतिप्रसूतइतिव्याख्यातंहस्तघ्नोहस्तेहन्यतेतस्यैषाभवति॥१४॥अहि

नि॰उ॰२
२०

रिवभोगैःपर्येतिबाहुंज्यायाहेतिंपरिबाधमानः॥हस्तघ्नोविश्वावयुनानिविद्वान्पुमान्पु
मांसंपरिपातुविश्वतः॥अहिरिवभोगैःपरिवेष्टयतिबाहुंज्यायावधात्परित्रायमाणो।
हस्तघ्नःसर्वाणिप्रज्ञानानिप्रजानन्पुमान्पुरुमनाभवतिपुंसतेर्वाभीशवोव्याख्यातास्ते
षामेषाभवति॥१५॥रथेतिष्ठन्नयतिवाजिनःपुरोयत्रयत्रकामयतेसुषारथिः॥अ
भीशूनांमहिमानंपनायतमनःपश्चादनुयच्छंतिरश्मयः॥रथेतिष्ठन्नयतिवाजिनःपुर
स्तात्सतोयत्रयत्रकामयतेसुषारथिःकल्याणसारथिरभीशूनांमहिमानंपूजयामि
मनःपश्चात्संतोनुयच्छंतिरश्मयोधनुर्धन्वतेर्गतिकर्मणोवधकर्मणोवाधन्वंत्य

राम॰
२०

स्मादिषवस्तस्यैषाभवति॥१६॥ धन्वनागाधन्वनाजिंजयेम धन्वनातीव्राःसमदोज
येम॥ धनुःशत्रोरपकामंकृणोति धन्वनासर्वाःप्रदिशोजयेम॥ इतिसानिगदव्याख्या
तासमदःसमदोवात्तेःसंमदोवामदतेऽर्जियतेर्वाजिनातेर्वाप्रजावयतीषूनितिवा
तस्याःएषाभवति॥१७॥ वक्ष्यंतीवेदागनीगंतिकर्णंप्रियंसखायंपरिषस्वजाना॥ यो
षेवशिंक्ते विततााधिधन्वंज्याइयंसमनेपारयंती॥ वक्ष्यंतीवागच्छतिकर्णंप्रियमिव
सखायमिषुंपरिष्वजमानायोषेवशिंक्तेशब्दंकरोतिवितताधिधनुषिज्येयंसमने
संग्रामेपारयंतीपारंनयंतीषुरिषतेर्गतिकर्मणोवधकर्मणोवातस्यैषाभवति॥१८॥

सुपर्णंवस्तेमृगोअस्यादंतोगोभिःसंनद्धापततिप्रसूता॥यत्रानरःसंचविच द्रवंतित
त्रास्मभ्यमिषवःशर्मयंसन्॥सुपर्णंवस्तइतिवाजानभिप्रेत्यमृगमयोस्यादंतोमृग
यतेर्वागोभिःसंनद्धापततिप्रसूतेतिव्याख्यातंयत्रनराःसंद्रवंतिच विद्रवंतिचत
त्रास्मभ्यमिषवःशर्मयच्छंतुशरणंसंग्रामेष्वश्वाजनीकशेत्याहुःकशाप्रकाशयति
भयमश्वायकृष्यतेर्वाणूभावाद्वाक्पुनःप्रकाशयत्यर्थान्खशयाक्रोशतेर्वाश्वकशाया
एषाभवति॥१९॥आजंघंतिसान्वेषांजघनाँउपजिघ्नते॥अश्वाजनिप्रचेतसो
श्वान्त्समत्सुचोदय॥आघ्नंतिसानून्येषांसरणानिसक्थीनिसक्थिसज्यतेरासक्तो

स्मिन्कायोजघनानिचोपघ्नतिजघनंजंघन्यतेरश्वाऽजानिप्रचेतसः प्रवृद्धचेतसोऽश्वा·
२ मल्क न्सौंसमरणेषुसंग्रामेषुवोदयोलूखलमुरुकरंवौर्करंवोर्ध्वंवौरूमेकुर्वित्यब्रवीत्तदुलू खं २
खलमभवदुरुकरंचैतदुलूखलमित्याचक्षतेपरोक्षेणेतिचब्राह्मणंतस्यैषाभवति॥
२०॥ यच्चिद्धित्वंगृहेगृहउलूखलकयुज्यसे॥ इहद्युमत्तमंवदजयतामिवदुंदुभिः॥ इ
तिसानिगदव्याख्याता॥ २१॥ वृषभः प्रजांवर्षतीतिवातिबृहतिरेतइतिवातद्वृषक
र्मावर्षणाद्वृषभस्तस्यैषाभवति॥ २२॥ न्यक्रंदयन्नुपयंतएनममेहयन्वृषभंमध्यआ
जेः॥ तेनसूभर्वंशतवत्सहस्रंगवांमुद्गलः प्रधनेजिगाय॥ न्यक्रंदयन्नुपयंतएन

नि·उ·१ मितिव्याख्यातममेहयन्वृषभंमह्यआजेराजयनस्याजवनस्येतिवातेनतंस्मभवंवीरा
२९ जानंभवेत्तिरत्तिकर्मीतद्वास्मभवंसहस्रंगवांमुद्गलःप्रधनेजिगायप्रधनइतिसंग्रा
मनामप्रकीर्णान्यस्मिंधनानिभवंतिद्रुघणोद्रुममयोघनस्तत्रेतिहासमाचक्षतेमु
द्गलोभार्म्यश्वऋषिर्वृषभंचद्रुघणंचयुक्त्वासंग्रामेव्यवहृत्याजिंजिगायतदभिवादि
न्येषर्ग्भवति॥२३॥इमंतंपश्यवृषभस्ययुंजंकाष्ठायामध्येद्रुघणंशयानं॥येनजिग
यशतवत्सहस्रंगवांमुद्गलःपृतनाज्येषु॥इमंतंपश्यवृषभस्यसहयुंजंकाष्ठायामध्ये राम·
द्रुघणंशयानंयेनजिगायशतवत्सहस्रंगवांमुद्गलःपृतनाज्येषुपृतनाज्यमितिसंग्रा २९

मनामपतननानामजनाद्वाजयनाद्वामुद्गलोमुद्गवान्मुद्गगिलोवामदनंगिलतीतिवाम
दंगिलोवामुदंगिलोवाभार्म्यश्वोभृम्यश्वस्यपुत्रोभृम्यश्वोभृमयोस्याश्वाः अश्वभरणाद्वा
पितुरित्यंननामपातेर्वापिबतेर्वाप्यायतेर्वातस्यैषाभवति॥२८॥पितुंनुस्तोषंमहोधर्मा
णंतविषी॥यस्यत्रितोव्योजसावृत्रंविपर्वमर्दयत्॥तंपितुंस्तोमिमहतोधारयितारं
बलस्यतविषीतिबलनामतवतेर्वावृद्धिकर्मणोयस्यत्रितओजसाबलेनत्रितस्त्रिस्था
नइंद्रोवृत्रंविपर्वाणंव्यर्दयतिनद्योव्याख्याताःतास्तासामेषाभवति॥२९॥इमंमेगंगेयमु
नेसरस्वतिशुतुद्रिस्तोमंसचतापरुष्ण्या॥असिक्न्यामरुद्वृधेवितस्तयार्जीकीयेशृ

नि॰उ॰२ णुह्यासुषोमया ॥ इमंमेगंगेयमुनेसरस्वतिशुतुद्रिपरुष्णिस्तोममासेवध्वमसिक्न्या
३० च सहमरुद्वृधेवितस्तयाचार्जिकीयेआशृणुहिसुषोमयाचेतिसमस्तार्थोथैकपद
निरुक्तंगंगागमनाद्यमुनाप्रयुवतीगच्छतीतिवाप्रवियुतंगच्छतीतिवासरस्वतीसर
इत्युदकनामसर्तेस्तद्वतीशुतुद्रीशुद्राविणीक्षिप्रद्राविण्याशुतुन्नेवद्रवतीतिवेराव
तीपरुष्णीत्याकुःपर्ववतीभास्वतीकुटिलगामिन्यसिक्न्यशुक्लाऽसितासितमितिवर्ण
नामतत्प्रतिषेधोसितंमरुद्वृधाःसर्वानद्योमरुतएनावर्धयंतिवितस्ताविदग्धाविवृ राम॰
द्धामहाकूलार्जिकीयांविपाळित्याकुर्ऋजूकप्रभवावर्जुगामिनीवाविपाड्विपाटनाद्वा ३०

विपाशनाद्वाविप्रापणाद्वापाशा अस्यांव्यपाश्यंतवसिष्ठस्यमुमूर्षतस्तस्माद्विपाळुच्यतेपूर्वमा
सीदुरुंजिरासुषोमासिंधुर्यदेनामभिप्रसुवंतिनद्यः सिंधुःस्यंदनादापआप्नोतेस्तासामेषा सा
भवति ॥२६॥ आपोहिष्ठामयोभुवस्तानऊर्जेदधातन ॥ महेरणायचक्षसे ॥ आपोहि
स्थसुखभुवस्तानोन्नायधत्तमहतेचनोरणायरमणीयायचदर्शनायौषधयओषद्
धयंतीतिवौषत्येनाधयंतीतिवादोषंधयंतीतिवातासामेषाभवति ॥२७॥ याओषधीः
पूर्वाजातादेवेभ्यस्त्रियुगंपुरा ॥ मनैनुबभ्रूणामहंशतंधामानिसप्तच ॥ याओषध
यःपूर्वाजातादेवेभ्यस्त्रीणियुगानिपुरामन्येनुतद्बभ्रूणामहंबभ्रुवर्णानांहरणानांभरणानामि

नि॰उ॰३
३१

तिवाशतंधामानिसप्तचेति धामानित्रयाणिभवंति स्थानानिनामानिजन्मानीतिजन्मान्य
त्राभिप्रेतानिसप्तशतंपुरुषस्यमर्मणांतेष्वेनादधतीतिवारात्रिर्व्याख्याता तस्या एषा
भवति॥२८॥आरात्रिपार्थिवंरजः पितुरप्रायुधामभिः॥दिवःसदांसिबृहतीवितिष्ठ
वर्ततेतमः सआत्वेषंँ॥ आपूपुरस्त्वंरात्रिपार्थिवंरजस्थानैर्मध्यमस्यदिवःसदांसिबृहतीमहतीवि
तिष्ठसआवर्ततेत्वेषंतमोरजोऽरण्यान्यरण्यस्यपत्न्यरण्यमपार्णंग्रामादरमणंभवती।
तिवातस्याएषाभवति॥२९॥अरण्यान्यरण्यान्यसौयाप्रेवनश्यसि॥कथाग्रामंनपृच्छसिनत्वाभी
रिवविंदतीँ॥अरण्यानीत्येनामामंत्रयतेयासावरण्यानिवनानिपराचीवनश्यासिकथंग्रामंन

पृछसिनत्वाभीर्विंदतीवेतीवः परिभयार्थेवाश्रद्धाश्रद्धानात्तस्याएषाभवति॥ ३०॥ श्र
द्धयाग्निःसमिध्यतेश्रद्धयाहूयतेहविः॥ श्रद्धांभगस्यमूर्द्धनिवचसावेदयामसि॥ श्रद्ध
याग्निःसाधुसमिध्यतेश्रद्धयाहविःसाधुहूयतेश्रद्धांभगस्यभागधेयस्यमूर्धनिप्र
धानांगेवचनेनावेदयामःपृथिवीव्याख्याताततस्याएषाभवति॥ ३१॥ स्योनापृथिवि
भवानृक्षरानिवेशनी॥ यच्छानःशर्मसप्रथः॥ सुखानःपृथिविभवानृक्षरानिवेश
न्यृक्षरःकंटकऋछतेःकंटकःकंतपोवाकृंततेर्वाकंटतेर्वास्याद्गतिकर्मणउद्गततमो
भवतियच्छनःशर्मयच्छंतुशरणंसर्वतःपृथ्वघाव्यौंतातस्याएषाभवति॥ ३२॥ अमी

ख्या १

षांचित्तंप्रतिलोभयंतीगृहाणांगांन्यप्वेपरेहि॥अभिप्रेहिनिर्दहहृत्सुशोकैरंधेनामि
त्रास्तमसासचंतां॥अमीषांचित्तानिप्रज्ञानानिप्रतिलोभयमानांगृहाणांगान्यप्वेपरे
ह्यभिप्रेहिनिर्दहैषांहृदयानिशोकैरंधेनामित्रास्तमसासंसेव्यंतामग्नाय्यग्नेःपत्नी
तस्याएषाभवति॥३३॥इहेंद्राणीमुपह्वयेवरुणानींस्वस्तये॥अग्नायींसोमपीतये॥
इतिसानिगदव्याख्याता॥३४॥अथातोष्टौद्वंद्वान्युलूखलमुसलेउलूखलंव्याख्यातं
मुसलंमुहुःसरंतयोरेषाभवति॥३५॥आयजीवाजसातमाताह्युच्चाविजर्भृतः॥ह
रीइवांधांसिबप्सता॥आयष्टेअन्नानांसंभक्ततमेतेह्युच्चैर्विह्रियेतेहरीऽइवान्ना

निभुंजानेहविधानेहविषांनिधानेतयोरेषाभवति॥३६॥आवामुपस्थमद्रुहादेवाःसी
दंतुयज्ञियाः॥इहाद्यसोमपातये॥आसीदंतुवामुपस्थमुपस्थानमद्रोग्धव्येइतिवायज्ञि
यादेवायज्ञसंपादिनइहाद्यसोमपानाय॥द्यावापृथिव्योआख्यातेतयोरेषाभवति॥३७॥
द्यावानःपृथिवीइमंसिध्रमद्यदिविस्पृशं॥यज्ञंदेवेषुयच्छतां॥द्यावापृथिव्योनइमं
साधनमद्यदिविस्पृशंयज्ञंदेवेषुनियच्छतां॥विपाट्छुतुद्र्योर्व्याख्यातेतयोरेषाभवति॥ शू.३
३८॥प्रपर्वतानामुशतीउपस्थादश्वेइवविषितेहासमाने॥गावेवशुभ्रेमातरारिहाणे
विपाट्छुतुद्रीपयसाजवेते॥पर्वतानामुपस्थादुपस्थानादुशतीकामयमानेअश्वे

नि·उ·१
३३

इवविमुक्तेइतिवाविषण्णे इतिवाहासमानेहासतिस्पर्द्धायांहर्षमाणेवागावाविवशु
भ्रेशोभनेमातरौसंरिहाणेविपाट्छुतुद्रीपयसाप्रजवेतेआर्त्नीअर्तन्योवारण्योवा
रिषण्योवातयोरेषाभवति॥३९॥तेआचरंतीसमनेवयोषामातेवपुत्रंबिभृतामु
पस्थे॥अपशत्रून्विध्यतांसंविदानेआर्त्नीइमेविष्फुरंतीअमित्रान्॥तेआचरंत्यौस
मनसाविवयोषेमातेवपुत्रंबिभृतामुपस्थउपस्थानेपविध्यतांशत्रून्त्संविदानेआर्त्न्यौ
विमे विघ्नत्यावमित्रान्छुनासीरौशुनोवायुःशुएत्यंतरिक्षेसीरआदित्यःसरणात्त
योरेषाभवति॥४०॥शुनासीराविमांवाचंजुषेथांयद्दिविचक्रथुःपयः॥तेनेमामुप

राम॰
३३

सिंचतं॥ इतिसानिगदव्याख्याता देवीजोष्ट्रीदेव्यौ जोषयित्र्यौ द्यावापृथिव्याविति वाहो
रात्रेइतिवासस्यंचसमाचेतिकात्यक्यस्तयोरेषसंप्रैषो भवति॥८१॥ देवीजोष्ट्रीवसुधि
तीययोरन्याघाद्वेषांसिसुयवदान्यावक्षद्वसुवार्याणि यजमानायवसुवनेवसुधेय
स्यवीतांयज॥ देवीजोष्ट्रीदेव्यौजोषयित्र्यौ वसुधितीवसुधान्यौययोरन्याघानिद्वेषां
स्यवयावयस्यावहद्वसन्यावसूनिवननीयानियजमानायवसुवननायच्चवसुधाना
यच्चवीतांपिबेतांकामयेतांवायजेतिसंप्रैषोदेवी ऊर्जाहुतीदेमाऊर्जाहुन्यौद्यावा
पृथिव्यावितिवाहोरात्रेइतिवासस्यंचसमाचेतिकात्यक्यस्तयोरेषसंप्रैषोभवति॥

नि०उ०३ ॥ ७॥ देवीऊर्जाहुतीइषमूर्जमन्यावक्षत्सग्धिंसपीतिमन्यानवेनपूर्वंदयमानाःस्याम

३८ पुराणेननवंतामूर्जमूर्जाहुतीऊर्जयमानेऽअधातांवसुवनेवसुधेयस्यवीतांयज॥

३यै देवीऊर्जाहुतीदेव्याऊर्जाहुत्यान्याबलंचरसंचान्यावहत्यावहत्यन्नासहजग्धिंचसहपीतिंचान्या

नवेनपूर्वंदयमानाःस्यामपुराणेननवंतामूर्जमूर्जाहुतीऽऊर्जयमानेअधातांवसुव

ननायत्त्ववसुधानायत्त्ववीतांपिबेतांकामयेतांवायजेतिसंप्रैषोयजेतिसंप्रैषः॥ ७

अययान्यश्वोवोढामानोमित्रःकनिक्रदद्भुद्रवंदसंवत्सरमुपप्लवंदप्रावेपाःप्रेतेवदं राम०

त्वमंदान्यज्ञसंख्योगाद्धनेस्पतत्रुपश्वासयबह्वीनोमहिरिवभोगैरथेतिष्ठन्धन्वनागावक्ष्य ३८

तीवस्क पर्णं वस्तं आजं घंतियच्चिद्धि त्वं वृषभो न्यक्रंदयन्निमं तं पितुं विमं म आपोहियाओ
षधीरारात्र्यरण्यानिश्रद्धयास्योनामीषामिहेंद्राणीमथातोष्टावायजीस्रावामुपस्थं ध्या
वानःप्रपर्वतानंतिआन्वरंतीशुनासीरौदेवीजोष्ट्रीदेवीऊर्जाहुतीत्रिचत्वारिंशतत्॥इति ति३
निरुक्तेउत्तरषट्केतृतीयोऽध्यायः॥३॥ॐअथातोमध्यस्थानादेवतास्तासांवायुःप्रथ
मागामीभवतिवायुर्वातेर्वेतेर्वास्याद्गतिकर्मणएतेरितिस्थौलाष्ठीविरनर्थकोककारस्त
स्यैषाभवति॥१॥वायवायाहिदर्शतेमेसोमाअरंकृताः॥तेषांपाहिश्रुधीहवं॥वायवा
याहिदर्शनीयेमेसोमाअरंकृताःअलंकृतास्तेषांपिबश्रृणुनोह्वामितिकमन्यंमध्य
न१

निरु.४ मादेवमवस्यन्तस्यैषा पराभवति ॥२॥ आससाणासः शवसानमच्छेन्द्रं सुचक्रे रथ्यासो
३५ अश्वाः ॥ अभिश्रव ऋज्यंतो वहेयुर्नू चिन्नु वायोरमृतं विदस्येत् ॥ आससृवांसोभिबला
यमानमिंद्रं कल्याणान्वश्च रथे योगा ये रथ्या अश्वा रथस्य वोढारः ऋज्यंत ऋजुगामिनो
न्नमभिवहेयुर्नवं च पुराणं च ॥ अवइत्यं नः नाम ख्यत इति सततो वायोश्वास्यमक्षीय
थान विदस्येदितीन्द्रप्रधानेत्येके नैघंटुकं वायुकर्मोभयप्रधानेत्यपरं वरुणो वृणोतीति सतं
स्तस्यैषा भवति ॥३॥ नीचीनबारं वरुणः कवंधं प्रससर्ज रोदसी अंतरिक्षं ॥ तेन विश्वस्य राम.
भुवनस्य राजा यवं न वृष्टिर्व्युनत्ति भूम ॥ नीचीनद्वारं वरुणः कवंधं मेघं कवनमुदकं भव ३५

तितदस्मिन्धीयतेउदकमपिकबंधमुच्यतेबंधिरनिभृतत्वेकमनिभृतंचप्रसृजतिद्या
वापृथिव्योश्चांतरिक्षंचमहत्वेनतेनसर्वस्यभुवनस्यराजायवमिववृष्टिर्भुनत्तिभूर्मिं
तस्यैषापराभवति॥ ४॥ तमूषुसमनागिरापितॄणांचमन्मभिः॥ नाभाकस्यप्रशस्तिभि
र्यःसिंधूनामुपोदयेसप्तस्वसासमध्यमोनभंतामन्यकेसमे॥ तंस्वभिष्टोमिसमानैर्यागि न्यौ
रागीत्यास्तुत्यापितॄणांचमननीयैःस्तोमैर्नाक्रस्यप्र[illegible]शस्तिभिर्ऋषिर्नाभाकोबभूवयः
स्यंदमानानामासामपामुपोदयेसप्तस्वसारमेनमाहुर्वाग्भिःसमध्यमइतिनिरुच्यतेथैष
एवभवति॥ नभंतामन्यकेसमे॥ माभूवन्नन्यकेसर्वेयेनोद्विषंतिदुर्धियःपापधियःपा

भा३

षा२

नि-उ-४ पसंकल्पारुद्रोरौतीतिसतोरोरूयमाणोद्रवतीतिवारोदयतेर्वाय[illegible]द्रुदत्तद्रुद्रस्यरुद्रत्व
३६ मितिकाठकंयदरोदीत्तद्रुद्रस्यरुद्रत्वमितिहारिद्रविकंतस्यैभवति॥५॥इमारुद्राय
स्थिरधन्वनेगिरःक्षिप्रेषवेदेवायस्वधाम्ने॥अषाढायसहमानायवेधसेतिग्मायु
धायभरताश्रृणोतुनः॥इमारुद्रायदृढधन्वनेगिरःक्षिप्रेषवेदेवायान्नवतेषाढा-
यान्यैःसहमानायविधात्रेतिग्मायुधायभरतश्रृणोतुनस्तिग्मंतेजतेरुत्साहकर्मण
आयुधमायोधनात्तस्यैषापराभवति॥६॥यातेदिद्युदवसृष्टादिवस्परिक्ष्मयाचर राम॰
तिपरिसावृणक्तुनः॥सहस्रंतेस्वपिवातभेषजामानस्तोकेषुतनयेषुरीरिषः॥या ३६

तेदिद्युदवसृष्टादिवस्परिदिवोऽधिदिद्युद्यतेर्वाद्युतेर्वाद्योततेर्वाक्ष्मयाचरतिक्ष्मापृथि
वीतस्यांचरतितयाचरतिविक्ष्मापयंतीचरतीतिवापरिवृणक्तुनःसासहस्रंतेस्वा
प्तवचनभैषज्यानिमानस्त्वंपुत्रेषुचपौत्रेषुचरीरिषस्तोकंतुद्यतेस्तनयंतनोते
रग्निरपिरुद्रउच्यतेतस्यैषाभवति॥७॥जराबोधतद्विविड्ढिविशेविशेयज्ञियाय॥
स्तोमंरुद्रायदृशीकं॥जरास्तुतिर्जरतेस्तुतिकर्मणोस्तांबोधतयाबोधयितरिति
वातद्विविड्ढितकुरुमनुष्यस्यमनुष्यस्ययजनायस्तोमंरुद्रायदर्शनीयमिंद्रइरां
दृणातीतिवैरांददातीतिवैरांदधातीतिवैरांदारयतइतिवैरांधारयतइतिवैंदवेद्र

वतीतिवेंदोरमतइतिवेंधेभूतानीतिवातद्यदेनंप्राणैःसमैंधंस्तदिंद्रस्येंद्रत्वमितिवि
ज्ञायतइदंकरणादित्याग्रायणइदंदर्शनादित्यौपमन्यवइंदतेर्वैश्वर्यकर्मणइंछत्रू
णांदारयितावाद्रावयितावादरयितावयज्वनांतस्यैषाभवति॥८॥अदर्दरुत्सम
सृजोविखानित्वमर्णवान्बद्बधानाँअरम्णाः॥महांतमिंद्रपर्वतंवियद्वःसृजोविधारा
अवदानवंहन्॥अदृणाउत्सम्उत्सउत्सरणाद्वोत्सदनाद्वोत्स्यंदनाद्वोनत्तेर्वाव्यसृजो
स्यखानित्वमर्णवानर्णस्वतएतान्माध्यमिकान्संस्त्यायान्बाबध्यमानानरम्णाँतिः
संयमनकर्मावाविसर्जनकर्मावामहांतमिंद्रपर्वतंमेघंयद्यद्वृणोर्व्यसृजोस्यधारा
२रम्णा

अवहंनेनंदानवंदानकर्मणांतस्यैषापराभवति ॥ ९ ॥ योजातएवप्रथमोमनस्वांदे
वोदेवान्क्रतुनापर्यभूषत ॥ यस्यशुष्माद्रोदसीअभ्यसेतांनृम्णस्यमह्नासजनासइं
द्रः ॥ योजायमानएवप्रथमोमनस्वीदेवोदेवान्क्रतुनाकर्मणापर्यभवत्पर्यगृह्णा
त्पर्यक्षैद्दैत्यक्रामदितिवायस्यबलाद्यावापृथिव्यावप्यबिभीतांनृम्णस्यमह्नाबलस्य
महत्वेनसजनासइंद्रइत्यृषेर्दृष्टार्थस्यप्रीतिर्भवत्याख्यानसंयुक्तांपर्जन्यस्तुपराधं
तविपरीतस्यतर्पयिताजन्यःपरोजेतावाजनयितावाप्रार्जयितावारसानांतस्यै
षाभवति ॥ १० ॥ विवृक्षान्हंत्युतहंतिरक्षसोविश्वंबिभायभुवनंमहावधात् ॥ उता

३८

नि॰ उ॰ ४ नागा ईषते वृष्ण्यावतो यत्पर्जन्यः स्तनयन्हंति दुष्कृतः॥ वि हंति वृक्षान्विहंति च रक्षांसि
३९ सर्वापि चास्माद्भूतानि बिभ्यति महावधान्महान्ह्यस्य वधोऽप्यनपराधो भीतः पलाय
ते वर्षकर्मवतो यत्पर्जन्यः स्तनयन्हंति दुष्कृतः पापकृतो बृहस्पतिर्बृहतः पाता वा पा
लयिता वा तस्यैषा भवति॥११॥ अश्नापिनद्धं मधु पर्यपश्यन्मत्स्यं न दीन उदनि क्षि
यंतं॥ निष्टज्जभार चमसन्न वृक्षाद्बृहस्पतिर्विरवेणा विकृत्य॥ अशनवता मेघेनापि
नद्धं मधु पर्यपश्यन्मत्स्यमिव दीन उदके निवसंतं निर्जहार तच्चमसमिव वृक्षाच्चमसः राम॰
कस्माच्चमंत्यस्मिन्निति बृहस्पतिर्विरवेण शब्देन विकृत्य ब्रह्मणस्पतिर्ब्रह्मणः पाता ३९

वापालयितावातस्यैषाभवति॥१२॥अश्मास्यमवतंब्रह्मणस्पतिर्मधुधारमभियमो
जसातृणत्॥तमेवविश्वेपपिरेस्वर्दृशोबहुसाकंसिसिचुरुत्समुद्रिणं॥अशानवंत
मास्यंदनवंतमवातितंब्रह्मणस्पतिर्मधुधारमभियमोजसाबलेनाभ्यतृणत्तमे
प:४ वसर्वेपिबंतिरश्मयःसूर्यदृशोबह्वेनंसहसिंचंत्युत्समुद्रिणमुदकवंतं॥१३॥क्षेत्रस्यप
तिःक्षेत्रंक्षियतेर्निवासकर्मणस्तस्यपातावापालयितावातस्यैषाभवति॥१४॥क्षेत्रस्य
पतिनावयंहितेनेवजयामसि॥गामश्वंपोषयित्न्वासनोमृळातीदृशे॥क्षेत्रस्यपति
नावयंसुहितेनेवजयामोगामश्वंपुष्टंपोषयितृचाहरेतिसनोमृळातीदृशेबलेनवा

नि·उ·४
४०

धनेन वा मृळतिर्दानकर्मा तस्यैषापरा भवति ॥ १६ ॥ क्षेत्रस्य पते मधुमंतमूर्मिं धेनु
रिव पयो अस्मासु धुक्ष्व ॥ मधुश्चुतं घृतमिव सुपूतमृतस्य नः पतयो मृळयंतु ॥ क्षेत्रस्य त२
पते मधुमंतमूर्मिं धेनुरिव पयोस्मासु धुक्ष्वेति मधुश्चुतं घृतमिवोदकं सुपूतमृ
तस्य नः पातारो वा पालयितारो वा मृळयंतु मृळयतिरुपदयाकर्मा पूजाकर्मा वा तद्य
त्समान्यामृचि समानाभिव्याहारं भवति तज्जामि भवतीत्येकं मधुमंतं मधुश्चुतमिति
यथा यदेव समाने पादे समानाभिव्याहारं भवति तज्जामि भवतीत्यपरं हिरण्यरूपः स
हिरण्यसंदृगिति यथा यथा कथा च विशेषोजामि भवतीत्यपरं ॥ मंडूका इवोदकान्मं

राम०
४०

दूकाउदकादिवेतियथा॥ वास्तोष्पतिर्वास्तुर्वसतेर्निवासकर्मणस्तस्यपातावापालयिता
वातस्यैषाभवति॥२६॥अमीवहावास्तोष्पतेविश्वारूपाण्याविशन्॥सखासुशेवःए
धिनः॥अभ्यमनहावास्तोष्पतेसर्वाणिरूपाण्याविशन्त्सखानःसुसुखोभवशेवइ
तिसुखनामशिष्यतेर्वकारोनामकरणोंतस्थांतरोपलिंगीविभाषितगुणःशिवमित्य
प्यस्यभवतियद्यद्रूपंकामयतेतत्तद्देवताभवति॥रूपंरूपंमघवाबोभवीतीत्यपिनि
गमोभवतिवाचस्पतिर्वाचःपातावापालयितावातस्यैषाभवति॥२७॥पुनरेहिवा
चस्पतेदेवेनमनसासह॥वसोष्पतेनिरामयमय्येवतन्वंमम॥इतिसानिगदव्या

उनि·उ४
४१

ख्यातापान्नपात्तनूनप्त्रा व्याख्यातस्तस्यैषा भवति ॥ १८ ॥ यो अनिध्मो दीदयदप्स्वन्तर्यं वि
प्रास ईळते अध्वरेषु ॥ अपान्नपान्मधुमतीरपो दा याभिरिंद्रो वावृधे वीर्याय ॥ यो नि
ध्मो दीदयद्दीप्यतेभ्यंतरमप्सु यं मेधाविनस्तुवंति यज्ञेषु सो पान्नपान्मधुमतीरपो दे
ह्यभिषवाय याभिरिंद्रो वर्धते वीर्याय वीरकर्मणे यमो यच्छतीति सतस्तस्यैषा भव
ति ॥ १९ ॥ परेयिवांसं प्रवतो महीरनु बहुभ्यः पंथामनुपस्पशानं ॥ वैवस्वतं संगम
नं जनानां यमं राजानं हविषा दुवस्य ॥ परेयिवांसं पर्यागतवंतं प्रवत उद्वतो निवत
इत्यवतिर्गतिकर्मा बहुभ्यः पंथानमनुपस्पाशयमानं वैवस्वतं संगमनं जनानां यमं

राम·
४१

राजानंहविषादुवस्येतिदुवस्यती राध्नोतिकर्माऽग्निरपियमउच्यतेतमेताऋचोनु
प्रवदंति॥२०॥सेनेवसृष्टामंदधात्यस्तुर्नदिद्युत्त्वेषप्रतीका॥यमोहजातोयमोजनि
त्वंजारःकनीनांपतिर्जनीनां॥तंवश्चराथावयंवसत्यास्तंनगावोनक्षंतइद्धं॥इतिद्विपदाः
सेनेवसृष्टाभयंवाबलंवादधात्यस्तुरिवदिद्युत्त्वेषप्रतीकाभयप्रतीकाबलप्रतीकाय
शःप्रतीकामहाप्रतीकादीप्तप्रतीकावा॥यमोहजातइंद्रेणसहसंगतः॥यमाविहेहमा
तरेत्यपिनिगमोभवतियमइवजातोयमोजनिष्यमाणोजारःकनीनांजरयिताकन्या
नांपतिर्जनीनांपालयितायानांतत्प्रधानाहियज्ञसंयोगेनभवंति॥तृतीयोऽग्निष्टे
ज्ञा

४१

नि॰ उ॰ ४ पतिरित्यपिनिगमोभवति॥ तंवश्चराथावरंत्वापश्वाकुत्सावसत्याचनिवृसंसोषधा
४२ कृत्वास्तंय यागावआप्नुवंतितथाप्नुयामेढं समृद्धंभोगैर्मित्रःप्रमीतेस्त्रायतेसंमिन्वा
नोद्रवतीतिवामेद[illegible]यतेर्वातस्यैषाभवति॥२१॥ मित्रोजनान्यातयतिब्रुवाणो
मित्रोदाधारपृथिवीमुतद्यां॥ मित्रःकृष्टीरनिमिषाभिचष्टेमित्रायहव्यंघृतवज्जुहो
त॥ मित्रोजनानायातयतिब्रुवाणः शब्दंकुर्वन्मित्रएवधारयतिपृथिवींचदिवंचमि
९२ त्रःकृष्टीरनिमिषन्नभिविपश्यतीतिकृष्टयइतिमनुष्यनामकर्मवंतोभवंतिविकृष्ट राम॰
देहावामित्रायहव्यंघृतवज्जुहोतेतिव्याख्यातंजुहोतिर्दानकर्माकः कमनोवाक्रमणो ४२

रेथोवा

वास्कंखोवातस्यैषाभवति॥२२॥हिरण्यगर्भःसमवर्त्तताग्रेभूतस्यजातःपतिरेकआसी
त्॥सदाधार [illegible] पृथिवींद्यामुतेमांकस्मैदेवायहविषाविधेम॥हिरण्यगर्भोहिरण्यमयो
गर्भोहिरण्यमयोगर्भोस्येतिवागर्भोगृभेर्गृणात्यर्थेगिरत्यनर्थोनितिवायदाहिस्त्रीगुणा
न्गृह्णातिगुणाश्चास्यागृह्यंतेथगर्भोभवतिसमभवदग्रेभूतस्यजातःपतिरेकोबभू
वसधारयतिपृथिवींचदिवंचकस्मैदेवायहविषाविधेमेतिव्याख्यातंविधतिर्दानक
र्मासरस्वान्व्याख्यातस्तस्यैषाभवति॥२३॥येतेसरस्वऊर्मयोमधुमंतोघृतश्चुतः॥
तेभिर्नोविताभव॥इतिसानिगदव्याख्याता॥२४॥विश्वकर्मासर्वस्यकर्तातस्यैषाभ

४२

नि॰उ॰४
४३

वति॥२५॥विश्वकर्माविमनाआद्विहायाधाताविधातापरमोतसंदृक्॥तेषामिष्टानि
समिषामदंतियत्रासप्तऋषीन्परऽएकमाहुः॥विश्वकर्माविभूतमनाव्याप्ताधाताच
विधाताचपरमश्चसंद्रष्टाभूतानांतेषामिष्टानिवाकांतानिवाक्रांतानिवागतानिवा
मतानिवानतानिवाद्भिःसहसंमोदंतेयत्रैतानिसप्तऋषीणानिज्योतींषितेभ्यःप
रआदित्यस्तान्येतस्मिन्नेकंभवंतीत्यधिदैवतमथाध्यात्मंविश्वकर्माविभूतमनाव्या
प्ताधाताचविधाताचपरमश्चसंदर्शयितेंद्रियाणामेषामिष्टानिवाकांतानिवाक्रां
तानिवागतानिवामतानिवानतानिवान्नेनसहसंमोदंतेयत्रेमानिसप्तऋषीणा

राम
४३

नीद्रियाण्येभ्यःपरआत्मातान्येतस्मिन्नेकंभवंतीसात्मगतिमाचष्टेतत्रेतिहासमाच
क्षतेविश्वकर्माभौवनःसर्वमेधेसर्वाणिभूतानिजुहवांचकारसआत्मानमप्यंततोजु
हवांचकारतदभिवादिन्येषर्ग्भवतियइमा विश्वाभुवनानिजुह्वदितितस्योत्तरा
भूयसेनिर्वचनाय॥२६॥विश्वकर्मन्हविषावावृधानःस्वयंयजस्वपृथिवीमुतद्यां॥
मुह्यंत्वन्येअभितोजनासइहास्माकंमघवासूरिरस्तु॥विश्वकर्मन्हविषावर्द्धयमानः
स्वयंयजस्वपृथिवींचदिवंचमुह्यंत्वन्येऽअभितोजनाःसपत्नाइहास्माकंमघवासू
रिरस्तुप्रज्ञातातार्क्ष्यस्त्वष्ट्राव्याख्यातस्तीर्णेंतरिक्षेक्षियतितूर्णमर्थंरक्षत्यश्नोतेर्वात

नि॰उ॰४ स्यैषाभवति॥२७॥त्यमूषुवाजिनंदेवजूतंसहावानंतरुतारंरथानां॥अरिष्टनेमिंपृतना
४४ जमाशुंस्वस्तयेतार्क्ष्यमिहाहुवेम॥तंभृशामन्नवंतंजूतिर्गतिःप्रीतिर्वादेवजूतंदेवगतं
देवप्रीतंवासहस्वंतंतारयितारंरथानामरिष्टनेमिंपृतनाजितमाशुंस्वस्तयेतार्क्ष्यमिह
ह्वयेमेतिकमन्यंमध्यमादेवमवस्यत्तस्यैषापराभवति॥२८॥सद्यश्चिद्यःशवसापं
चकृष्टीःसूर्यइवज्योतिषापस्ततान॥सहस्रसाःशतसाअस्यरंहिर्नस्मावरंतेयुवतिं
नशर्याम्॥सद्योपियःशवसाबलेनतनोत्यपःसूर्यइवज्योतिषापंचमनुष्यजातानि राम॰
सहस्रसानिनीशतसानिन्यस्य [illegible] सागतिर्नस्मैनंवारयंतिप्रयुवतीमिवशरमयी ४४

मिषुंमन्युर्मन्यतेर्दीप्तिकर्मणः क्रोधकर्मणोवधकर्मणोवामन्युस्तस्मादिषवस्तस्यैषा
भवति॥२९॥ त्वयामन्योसरथमारुजंतोहर्षमाणासोधृषितामरुत्वः॥ तिग्मेषवआयु
धासंशिशानाअभिप्रयंतुनरोअग्निरूपाः॥ त्वयामन्योसरथमारुह्यरुजंतोहर्षमाणा
सोधृषितामरुत्वस्तिग्मेषवआयुधानिसंशिश्यमानाअभिप्रयंतुनरोअग्निरूपाअग्नि
कर्माणःसंनद्धाःकवचिनइतिवादधिक्राव्याख्यातस्तस्यैषाभवति॥३०॥ आदधिक्राः
शवसापंचकृष्टीःसूर्यइवज्योतिषापस्ततान॥ सहस्रसाःशतसावाज्यर्वापृणक्तुमध्वा
समिमावचांसि॥ आतनोतिदधिक्राःशवसाबलेनापःसूर्यइवज्योतिषापंचमनु

४४

नि·उ·८ ष्यजातानि सहस्रसाः शतसा वाजी वेजनवान्नर्वैरपावान्त्संपृणक्तु नो मधुनोदकेन व
४५ चनानीमानीति मधु धमतेर्विपरीतस्य सविता सर्वस्य प्रसविता तस्यैषा भवति॥
३१॥ सविता यंत्रैः पृथिवीमरम्णादस्कंभने सविता द्यामदृंहत्॥ अश्वमिवाधुक्षद्धु
निमंतरिक्षमतूर्ते बद्धं सविता समुद्रं॥ सविता यंत्रैः पृथिवीमरमयदनारंभणेंतरि
क्षे सविता द्यामदृंहदश्वमिवाधुक्षद्धुनिमंतरिक्षे मेघं बद्धमतूर्णे इति वा त्वरमाण तैर्बद्धमतू ३
इति वा सविता समुद्रितारमिति कमन्यं मध्यमादेवमवक्ष्यदादित्योपि सवितोच्यते तथा राम·
च हैरण्यस्तूपे स्तुतोर्चन् हिरण्यस्तूप ऋषिरिदं सूक्तं प्रोवाच तदभिवादिन्येषर्ग्भवति॥ ४५

३२।हिरण्यस्तूपःसवितर्यथात्वांगिरसोजुह्वेवाजेअस्मिन्॥एवात्वार्चन्नवसेवंदमानः
सोमस्येवांशुंप्रतिजागराहं॥हिरण्यस्तूपोहिरण्यमयस्तूपोहिरण्यमयःस्तूपोस्येतिवा
स्तूपस्त्यायतेःसंघातःसवितर्यथात्वांगिरसोजुह्वेवाजेन्नेस्मिन्नेवंत्वार्चन्नवनायवं
दमानःसोमस्येवांशुंप्रतिजागर्म्यहंत्वष्टाव्याख्यातस्तस्यैषाभवति॥३३॥देवस्त्वष्टास
विताविश्वरूपःपुपोषप्रजाःपुरुधाजजान॥इमाच्चविश्वाभुवनान्यस्यमहद्देवानामसु
मे२ रत्वमेकं॥देवस्त्वष्टासवितासर्वरूपःपोषतिप्रजारसानुप्रदानेनबहुधाचेमाजनयतीमा
निचसर्वाणिभूतान्युदकान्यस्यमहत्त्वात्सैमेदेवानामसुरत्वमेकंप्रज्ञावत्त्वंवानवत्त्वंवा

नि॰उ॰४ पिवास्करिरिति प्रज्ञानामोऽस्यत्यनर्थानऽस्तास्मा स्यामर्थो अस्करत्वमादिलुप्तं वातो वातीति
४६ सतस्तस्यैषा भवति॥३४॥ वात आ वातु भेषजं शंभु मयोभु नो हृदे॥ प्रण आयूंषि तारि
षत्॥ वात आवातु भेषज्यानि शंभु मयोभु च नो हृदयाय प्रवर्धयतु च न आयुरग्निर्व्या
ख्यातस्तस्यैषा भवति॥३५॥ प्रति त्यं चारुमध्वरं गोपीथाय प्रहूयसे॥ मरुद्भिरग्न आ
गहि॥ तं प्रति चारुमध्वरं सोमपानाय प्रहूयसे सोऽग्ने मरुद्भिः सहागच्छेति कमन्यं मध्यमा
षा२ देवमवक्ष्यत्तस्यैषापरा भवति॥३६॥ अभि त्वा पूर्वपीतये सृजामि सोम्यं मधु॥ मरुद्भि राम॰
रग्न आगहि॥ अभि सृजामि त्वा पूर्वपीतये पूर्वपानाय सोम्यं मधु सोममयं सोऽग्ने मरु ४६

ङ्गिः सहाम छेति॥ ३७॥ वेनो वेनतेः कांतिकर्मणस्तस्यैषा भवति॥ ३८॥ अयं वेनश्चोदयत्पृ
श्निगर्भा ज्योतिर्जरायू रजसो विमाने॥ इममपां संगमे सूर्यस्य शिशुं न विप्रा मतिभी रि
हंति॥ अयं वेनश्चोदयत्पृश्निगर्भाः प्राष्टवर्णगर्भा आप इति वा ज्योतिर्जरायुर्ज्योति
रस्य जरायुःस्थानीयं भवति जरायुर्जरया गर्भस्य जरर्या यूयत इति वैममपां च संग
मने सूर्यस्य च शिशुमिव विप्रा मतिभी रिहंति लिहंति स्तवंति वर्द्धयंति पूजयंतीति वा
शिशुः शंसनीयो भवति शिशीतेर्वा स्याद्दानकर्मणश्चिरलब्धो गर्भो भवत्यसुनीतिर
सून्नयति तस्यैषा भवति॥ ३९॥ असुनीते मनो अस्मासु धारय जीवातवे सुप्रतिर

ऽस्यसं

नि०उ०४ नआयुः॥ रारंधिनः सूर्यँदृशिघृतेनत्वंतन्वंवर्धयस्व। असुनीतेमनोस्मासुधारायचि
८७ रंजीवनायप्रवर्द्धयचनआयूरंधयचनः सूर्यस्यसंदर्शनायरध्यतिर्वशगमनेपिदृ
श्यते॥ मारधामद्विषतेसोमराजन्नित्यपिनिगमोभवतिघृतेनत्वमात्मानंतन्वंवर्द्ध
यस्वेतीव्याख्यातस्तस्यैषाभवति॥४०॥ ऋतस्यहिशुरुधःसंतिपूर्वीःऋतस्यधीति
र्वृजिनानिहंति॥ ऋतस्यश्लोकोबधिराततर्दकर्णाबुधानःशुचमानआयोः॥ ऋतस्य
हिशुरुधःसंतिपूर्वीःऋतस्यप्रज्ञावर्जनीयानिहंतिऋतस्यश्लोकोबधिरस्यापिकर्णा राम०
वातृणत्तिबधिरोबद्धश्रोत्रःकर्णौबोधयंदीप्यमानश्चायोरयनस्यमनुष्यस्यज्योति ८७

३२

षोवोदकस्यवैंदुरिंधेरुन्नेवीतस्येषाभवति॥ ४१॥ प्रतद्धोन्वेयंभ्रमायेंदेवेहब्योन
यइषवान्मन्मरेजतिरक्षोहामन्मरेजति॥ स्वयंसोअस्मदानिदोवधैरजेतदुर्मतिं॥ अ
वस्रवेदघशंसोवतरमवेक्षुद्रमिवस्रवेत्॥ प्रब्रवीमितद्ब्रमायेंदेवेहवनाहेइवयइष
वानेन्नवान्कामवान्वामननानिचनोरेजयतिरक्षोहाचबलेनरेजयतिस्वयंसोस्म
दभिनिंदितारंवधैरजेतदुर्मतिं॥ अवस्रवेदघशंसस्ततश्चावतरंक्षुद्रमिवावस्रवे
दभ्यासेभूयांसमर्थंमन्यंतेयथाहोदर्शनीयाहोदर्शनीयेतितत्परुच्छेपस्यशीलंपरुच्छे
पऋषिःपर्ववच्छेपःपरुषिपरुषिशेपोस्येतिवेतीमानिसप्तविंशतिर्दैवतानामधेया

४७

नि॰ उ॰ ४ न्यनुक्रांतानिसूक्तभांजिहविर्भांजितेषामेतान्यहविर्भांजिवैनोस्ननीति ऋं तदंदुःप्रजापतिःप्र
४८ जानांपातावापालयितावातस्यैषाभवति॥ ४२॥ प्रजापतेनत्वदेतान्यन्योविश्वाजा
तानिपरिताबभूव॥ यत्कामास्तेजुहुमस्तन्नोअस्तुवयंस्यामपतयोरयीणां॥ प्रजाप
तेनहित्वदेतान्यन्यःसर्वाणिजातानितानिपरिबभूवयत्कामास्तेजुहुमस्तन्नोअस्तु
वयंस्यामपतयोरयीणामित्याशीर्हिथ्योख्यातस्तस्यैषाभवति॥ ४३॥ अं[illegible]मुक्षेर [illegible]
हिंगृणीषेबुध्नेनदीनांरजःस्रुषीदन्॥ अप्सुजमुक्षेरहिंगृणीषेबुध्नेनदीनांरजः राम॰
स्रुदकेषुसीदन्बुध्नमंतरिक्षंबद्धाअस्मिन्धृ[illegible]ताभापइतिवेदमपीतरद्बुध्नमेतस्मादे ४८

ञामुक्षेर ३

वबद्धा अस्मिन्धृताः प्राणा इति योहिः स बुध्न्यो बुध्नमंतरिक्षंतन्निवासात्तस्यैषा भवति
४४॥ मानोहिर्बुध्न्यो रिषेधान्मायज्ञोअस्यस्रिधदृतायोः॥ माचनोहिर्बुध्न्यो रेषणाय धान्मा
यस्य यज्ञो स्याच स्रिधद्यज्ञकामस्य सुपर्णो व्याख्यातस्तस्यैषा भवति॥४५॥ एकः सुपर्णः
स समुद्रमाविवेश स इदं विश्वं भुवनं विचष्टे॥ तंपाकेन मनसापश्यमंतितस्तं मातारेळ्हि
स उ रेळ्हि मातरं॥ एकः सुपर्णः स समुद्रमाविशति स इमानि सर्वाणि भूतान्यभिविपश्य
ति तं पाकेन मनसापश्यमंतित इत्यृषेर्दृष्टार्थस्य प्रीतिर्भवत्याख्यानसंयुक्ता तं मातारेळ्हि
वागेषा माध्यमिका स उ मातरे ळ्हि पुरूरवा बहुधा रोरूयते तस्यैषा भवति॥४६॥ सम
रं

नि॰उ॰४ स्मिंजायमानऽआसतुग्नाउतेमवर्द्धन्नद्यःस्वगूर्ताः॥महेयत्वापुरूरवोरणायावर्द्धय
४९ न्दस्युहत्यायदेवाः॥ समासतास्मिंजायमानेग्नागमनादापोदेवपत्न्योवापिचैनम
वर्द्धयन्नद्यःस्वगूर्ताःस्वयंगामिन्योमहतेचयत्वापुरूरवोरणायरमणीयायसंग्रा
मायावर्द्धयन्दस्युहत्यायचदेवादेवाः॥ ४७॥ अथातोमध्यस्थानांवौयाह्यासस्राणा यवा४
सोनीचीनबारंतमृषिमारुद्रार्ययातेरिद्युज्जुराबोधादर्दर्योजातोविन्द्रक्षानम्नापि
नड्डुमभ्मास्यमवर्तंक्षेत्रस्यपतिःक्षेत्रस्यपतिर्नांक्षेत्रस्यपतेर्मीवहांपुनरेहियोऽस राम॰
निध्मःपरियियवांसंसेनेवसस्तष्टामित्रोजनान्हिरण्यगर्भायितेसरस्वोविश्वकर्मासर्वस्य ४९

कर्ताविश्वकर्माविमनाःविश्वकर्मन्हविषात्यमूषुसद्यश्चित्त्वयामन्योआदधिक्राःसवि
ताहिरण्यस्तूपोदेवस्त्वष्टावातआवातुप्रतित्यमभित्वांवेनोवेनतेरयंवेनोसुनीतेऋ
तस्यहिप्रतद्वोचेयंप्रजापतेज्ञामुकेछैमानोहिरकःसुपर्णःसमस्मिन्त्सप्तचत्वारिंश
त्॥ इतिनैरुक्तेउत्तरषट्केचतुर्थोऽध्यायः॥ ॐ॥ श्येनोआख्यातस्तस्यैषाभवति॥
१॥ आदायश्येनोअभरत्सोमंसहस्रंसवाँअयुतंचसाकं॥ अत्रापुरंधिरजहादरा
ती र्मदेसोमस्यमूराअमूरः॥ आदायश्येनोहरत्सोमंसहस्रंसवानयुतंचसहस्रंसह सह २
स्रंसाव्यमभिप्रेत्यतत्रायुतंसोमभक्षास्तत्संबंधेनायुतंदक्षिणाइतिवातत्रपुरंधिर

नि॰उ॰ ५ जहाद्गमित्रानदानानामितिवामदेसोमस्यमूरा अमूरइत्यैंद्रंचसूक्तंसोमपानेनचस्तुतस्त

॥ ५० ॥ स्मादिंद्रंमन्यंतओषधिःसोमःसुनोतेर्यदेनमभिषुण्वंतिबहुलमस्यनैघंटुकंवृत्तमा

श्चर्यमिवप्राधान्येनतस्यपावमानीषुनिदर्शनायोदाहरिष्यामः॥२॥स्वादिष्ठयाम

दिष्ठयापवस्वसोमधारया॥इंद्रायपातवेसुतः॥इतिसानिगदव्याख्याताथैषापराभ

वति चंद्रमसोवैतस्यवा॥३॥सोमंमन्यतेपपिवान्यत्संपिंषंत्योषधिं॥सोमंयंब्रह्मा

णोविदुर्नतस्याश्नातिकश्चनः॥सोमंमन्यतेपपिवान्यत्संपिंषंत्योषधिमितिवृथासु ॥ राम॰ ॥

तमसोममाहुःसोमंयंब्रह्माणोविदुरिति॥नतस्याश्नातिकश्चनायज्वेत्यधियज्ञमथा ॥ ५० ॥

धिदैवतं सोमं मन्यते पपिवान्यत्संपिंषंत्योषधिमिति यजुः सुतमसो

ममाह सोमं यं ब्रह्माणो विदुश्चंद्रमसं न तस्याश्नाति कश्चनादेवइत्ययेषा

पराभवति चंद्रमसोवैतस्यवा ॥ ७ ॥ यत्वादेवप्रपिबंतिततआप्यायसेपुनः ।

वायुस्सोमस्यरक्षितासमानांमासआकृतिः ॥ यत्वादेवप्रपिबंतिततआप्याय

सेपुनरितिनाराशंसानभिप्रेत्यपूर्वपक्षापरपक्षाविद्धिना ॥ वायुःसोमस्यरक्षि

तावायुमस्यरक्षितारमाहसाहचर्याद्धिसहरणाद्वासमानांसंवत्सराणांमासआ

कृतिः सोमरूपविशेषैरोषधीश्चंद्रमावाचंद्रमाश्चावंद्रमति चंद्रोमालाचांद्र

॥ नि·उ·५ ॥ मानमस्येति वा चंद्रश्चंदतेः कांतिकर्मणश्चंद्रमित्यप्यस्य भवति चारु द्रमति चिरं
॥ ५१ ॥ द्रमति चमेर्वा पूर्वं चारु रुचेर्विपरीतस्य तस्यैषा भवति ॥ ५ ॥ नवोनवो भवति जाय
मानोऽह्नां केतुरुषसामेत्यग्रं ॥ भागं देवेभ्यो विदधात्यायन्प्र चंद्रमास्तिरते दीर्घमा
युः ॥ नवोनवो भवति जायमान इति पूर्वपक्षादिमभिप्रेत्याऽह्नां केतुरुषसामेत्यग्र
मित्यपरपक्षांतमभिप्रेत्यादित्यदैवतो द्वितीयः पाद इत्येके ॥ भागं देवेभ्यो विदधात्या
यन्नित्यर्धमासेज्यामभिप्रेत्य प्रवर्धयते चंद्रमा दीर्घमायुर्मृत्युर्मारयतीति सतो मृतं राम ॥
च्यावयतीति वा शतबलाक्षो मौद्गल्यस्तस्यैषा भवति ॥ ६ ॥ परं मृत्यो अनु परेहि पंथां यस्ते ५१ ॥
स्व इतरो देवयानात् ॥ चक्षुष्मते शृण्वते ते ब्रवीमि मा नः प्रजां रीरिषो मोत वीरान् ॥ परं मृ

वपरेह्हिमृत्यो कथितंतेनमृत्योमृतंच्यावयतेभवतिमृत्सोमदेर्वामुदेर्वोतेषामेषाभवति॥
७॥त्वेषमित्थासमरणंशिमीवतोरिंद्राविष्णूसुतपावामुरुष्यति॥यामर्त्योयप्रतिधी
यमानमित्कृशानोरस्तुरसनामुरुष्यथः॥इतिसानिगदव्याख्याताविश्वानरोव्याख्या
तस्तस्यैषाभवति॥८॥प्रवोमहेमंदमानायांधसोर्चाविश्वानरायविश्वाभुवे॥इंद्र
स्ययस्यसुमखंसहोमहिश्रवोनृम्णंचरोदसीसपर्यतः॥प्रार्चतयूयंस्तुतिंमहते
धसोन्नस्यदात्रेमंदमानायमोदमानायस्तूयमानायशब्दाय्यमानायेतिवाविश्वान
रायसर्वेविभूतायेंद्रस्ययस्यसुमहद्बलंमहच्चश्रवणीयंयशोनृम्णंचव

५१

नि॰उ॰५ लंतन्वन्तंद्यावापृथिव्योवः परिचरतइतिकमन्यंमध्यमादेवमवक्ष्यत्तस्यैषापराभव
५२ ति॥ ९॥ उदुज्योतिरमृतंविश्वजन्यंविश्वानरः सवितादेवोअश्रेत्॥ उदशिश्रियज्ज्यो
तिरमृतंसर्वजन्यंविश्वानरः सवितादेवइतिधातासर्वस्यविधातातस्यैषाभवति॥
१०॥ धाताददातुदाशुषेप्राचींजीवातुमक्षितां॥ वयंदेवस्यधीमहिसुमतिंसत्यधर्म
णः॥ धाताददातुदत्तवतेप्रजांजीविकामनुपक्षीणांवयंदेवस्यधीमहिसुमतिंक
ल्याणींमतिंसत्यधर्मणोविधाताधात्राव्याख्यातस्तस्यैषनिपातोभवतिबहुदेव राम॰
तायामृचि॥ ११॥ सोमस्यराज्ञोवरुणस्यधर्मणिबृहस्पतेरनुमत्याउशर्मणि॥ तवा ५२

हमद्यमघवन्नुपस्तुतोधातर्विधातःकलशाँअभक्षयं॥इत्येताभिर्देवताभिरभिप्रसू
तःसोमकलशानभक्षयमितिकलशःकस्मात्कलाअस्मिञ्छेरतेमात्राःकलिश्चकला
श्चकिरतेर्विकीर्णमात्राः॥१२॥अथातोमध्यस्थानादेवगणास्तेषांमरुतःप्रथमागा
मिनोभवंतिमरुतोमितराविणोवामितरोचिनोवामहद्द्रवंतीतिवातेषामेषाभवति॥
१३॥आविद्युन्मद्भिर्मरुतःस्वर्कैरथेभिर्यातऋष्टिमद्भिरश्वपर्णैः॥आवर्षिष्ठयानइ
षावयोनपप्ततासुमायाः॥विद्युन्मद्भिर्मरुतःस्वर्कैःस्वंचनैरितिवास्वर्चनैरितिवा
स्वर्चिभिरितिवारथैरायातऋष्टिमद्भिरश्वपर्णैरश्वपतनैर्वर्षिष्ठेनचनोन्नेनवय

नि-उ-५ इवापततस्कमायाः कल्याणकर्माणोवाकल्याणप्रज्ञावारुद्राव्याख्यातास्तेषामेषाभव
५३ ति॥१४॥आरुद्रासइंद्रवंतःसजोषसोहिरण्यरथाःसुवितायगंतन॥ इयंवोऽअस्मत्प्रति
हर्यतेमतिस्तृष्णजेनदिवउत्साउदन्यवे॥ आगच्छतरुद्राइंद्रेणसहजोषणाःसुविताय
कर्मणइयंवोस्मदपिप्रतिकामयतेमतिस्तृष्णजइवदिवऽउत्साऽउदन्यवेतृष्णक्तृष्य
तेरुदन्युरुदन्यतेर्ऋभवऽउरुभांतीतिवर्तेनभांतीतिवर्त्तेनभवंतीतिवातेषामेषाभवति॥
१५॥ विष्ट्वीशमीतरणित्वेनवाघतोमर्तासःसंतोअमृतत्वमानशुः॥ सौधन्वनाऋ राम॰
भवःसूरचक्षसःसंवत्सरेसमपृच्यंतधीतिभिः॥ कृत्वाकर्माणिक्षिप्रत्वेनवोल्हारोमे ५३

धाविनोवामर्तासःसंतोमृतत्वमानशिरेसौधन्वनाःऋभवःसूरख्याना[redacted]वास
रप्रज्ञावासंवत्सरेसमपृच्यंतधीतिभिःकर्मभिःऋभुर्विभ्वावाजइतिसुधन्वनःआं
गिरसस्यत्रयःपुत्राबभूवुस्तेषांप्रथमोत्तमाभ्यांबहुवन्निगमाभवंतिनमध्यमेनत
देतदृभोश्चबहुवचनेनचमसस्यचसंस्तवेनबहूनिदशातयीषुसूक्तानिभवंत्यादि
त्यरश्मयोप्यृभवःउच्यंते॥अगोह्यस्ययदसस्तनागृहेतदद्येदमृभवोनानुगच्छथ॥
अगोह्यःआदित्योगूहनीयस्तस्ययदस्वपथगृहेयावत्तत्रभवथनतावदिहभवथेत्यं
गिरसोव्याख्यातास्तेषामेषाभवति॥१६॥विरूपासःइदृषयस्तःइद्गंभीरवेपसः॥तेः

नि॰पु॰८ अंगिरसः सूनवस्तेऽअग्नेः परिजज्ञिरे ॥ बहुरूपाः ऋषयस्ते गंभीरकर्माणो वा गं
५८ भीरप्रज्ञा वा तेंगिरसः पुत्रास्तेग्नेरधिजज्ञिरऽइत्यग्निजन्म पितरो व्याख्यातास्तेषामे
षा भवति ॥१७॥ उदीरतामवरऽउत्परासऽउन्मध्यमाः पितरः सोम्यासः ॥ असुं यऽई
युरवृकाः ऋतज्ञास्ते नोवंतु पितरो हवेषु ॥ उदीरतामवरऽउदीरतांपरऽउदीरतांमध्य
माः पितरः सोम्याः सोमसंपादिनस्तेसुं येप्राणमन्वीयुरवृकाऽअनमित्राः सत्यज्ञा वा यज्ञज्ञा
वा तेनःआगछंतु पितरो ह्वानेषु माध्यमिको यमःइत्याहुस्तस्मान्माध्यमिकान्पि राम॰
तॄन्मन्यंतेंगिरसो व्याख्याताः पितरो व्याख्याता भृगवो व्याख्याताऽअथर्वाणोथ्य ५८

नवंतस्छर्वतिश्वरतिकर्मीनत्मातिषेधस्तेषामेषासाधारणाभवति॥१८॥अंगिरसो
नःपितरोनवग्वाऽअथर्वाणोभृगवःसोम्यासः॥तेषांवयंसुमतौयज्ञियानामपि
भद्रेसौमनसेस्याम॥अंगिरसोनःपितरोनवगतयोनवनीतगतयोवाथर्वाणोभृग
वःसोम्याःसोमसंपादिनस्तेषांवयंसुमतौकल्याण्यांमतौयज्ञियानामपिचैषांभ
द्रेभंदनीयेभाजनवतिवाकल्याणेमनसिस्यामेतिमाध्यमिकोदेवगणइतिनैरुक्ताः
पितरऽइत्याख्यानमथाप्यृषयःस्तूयंते॥१९॥ सूर्यस्येववक्षथोज्योतिरेषांसमुद्र
स्येवमहिमागभीरः॥वातस्येवप्रजवोनान्येनस्तोमोबसिष्ठाऽअन्वेतवेवः॥इति

५४

नि॰उ॰५
५५

यथाऽआप्ना आप्नोतेस्तेषामेष निपातो भवत्यैंद्र्यामृचि॥२०॥ त्क्षेयंसं पुरुवर्पसमभ्व
मिनतममाप्त्यमाप्त्यानां॥ आदर्षते शवसा सप्तदानून्प्रसाक्षते प्रतिमानानि भूरि॥
स्तोतव्यं बहुरूपमुरुभूतमीश्वरतममाप्तव्यमाप्तव्यानामादृणाति यःशवसा बले
न सप्तदानूनिति वा सप्तदानवानिति वा प्रसाक्षते प्रतिमानानि बहूनि साक्षतिरा
प्नोतिकर्मा॥२१॥ अथातो मध्यस्थानां स्त्रियस्तासामदितिः प्रथमागामिनी भवत्यदि
तिर्व्याख्याता तस्याऽएषा भवति॥२२॥ दक्षस्य वादिते जन्मनि व्रते राजाना मित्रावरु
णा विवाससि॥ अतूर्तपंथाः पुरुरथो अर्यमा सप्तहोता विषुरूपेषु जन्मसु॥ दक्ष

नि ४
राम॰
५५

स्यवादितेजन्मद्विव्रतेकर्मणिराजानौमित्रावरुणोपरिचरासिविवासतिःपरिचर्यायां
हविष्मांऽआविवासतीत्याशास्तेवीतूर्तपंथाःऽअत्वरमाणपंथाबहुरथोर्यमादित्यो
रीन्नियछतिसप्तहोतासप्तास्मैरश्मयोरसानभिसन्नामयंतिसप्तैनमृषयःस्तुवंती
तिवाविषमरूपेषुजन्मसुकर्मसूद्येष्वादित्योदक्षःऽइत्याहुरादित्यमध्येचस्तुतोदि
तिर्दाक्षायणी॥अदितेर्दक्षोऽअजायतदक्षाद्वदितिःपरीतिचतत्कथमुपपद्येतस
मानजन्मानौस्यातामित्यपिवादेवधर्मेणेतरेतरजन्मानौस्यातामितरेतरप्रकृती
अग्निरप्यदितिरुच्यतेतस्यैषाभवति॥२३॥यस्मैत्वंसुद्रविणोददाशोनागास्त्वम

५५६

नि·उ·५ दितेसर्वताता॥यंभद्रेणशवसाचोदयासिप्रजावताराधसातेस्याम॥यस्मैत्वंसुद्रवि
५५ णोददास्यनागास्त्वमनपराधत्वमदितेसर्वासुकर्मततिष्वागआङ्‌पूर्वाद्गमेरेनऽए
तेःकिल्बिषंकिल्भिदंसुकृतकर्मणोभयंकीर्तिमस्यभिनत्तीतिवायंभद्रेणशवसाब
४ साध लेनचोदयसिप्रजावताचराधंनेनतेवयमिहस्यामेतिसरमासरणात्तस्याःएषा
भवति॥२८॥किमिछंतीसरमाप्रेदमानट्दूरेह्यध्वाजगुरिःपराचैः॥कास्मेहितिःका
परितक्म्यासीत्कथंरसायाःअतरःपयांसि॥किमिछंतीसरमेदंप्रानट्दूरेह्यध्वाज राम·
१ त्वं गुरिर्जंगम्यतेःपरांचनैरंचितःकातेस्मास्वर्थहितिरासीत्किंपरितकनंपरितक्म्यारा ५५

५६

पं२

त्रिःपरितऽएनांतक्मतक्कोमेत्सुत्सनामतकतइति सतःकथंरसायाः अतरःपयां
सीतिरसानदीर सतेःशब्दकर्मणःकथंरसानितान्युदकानीतिवादिवशुनींद्रेणप्र
हितापणिभिरसुरैःसमूदऽइत्याख्यानंसरस्वतीव्याख्यातातस्याएषाभवति॥२५
पावकानःसरस्वतीवाजेभिर्वाजिनीवती॥यज्ञंवष्टुधियावसुः॥पावकानःसरस्व
त्यन्नैरन्नवतीयज्ञंवष्टुधियावसुःकर्मवसुस्तस्याऽएषापराभवति॥२६॥महोऽ
अर्णःसरस्वतीप्रचेतयतिकेतुना॥धियोविश्वाविराजति॥महदर्णःसरस्वती
प्रचेतयतिप्रज्ञापयतिकेतुनाकर्मणाप्रज्ञयावेमानिचसर्वाणिप्रज्ञानान्यभिविरा

५६

नि॰उ॰५
५६

जतिवागर्थेषुविधीयतेतस्मान्माध्यमिकांवाचंमन्यंतेवाग्व्याख्यातातस्याएषाभ
वति॥२७॥ यद्वाग्वदंत्यविचेतनानिराष्ट्रीदेवानांनिषसादमंद्रा॥ चतस्रऽऊर्जंदु
दुहेपयांसिक्वस्विदस्याःपरमंजगाम॥ यद्वाग्वदंत्यविचेतनान्यविज्ञातानिराष्ट्री
देवानांनिषसादमंद्रामदनाचतस्रोनुदिशाऽऊर्जंदुदुहेपयांसिक्वस्विदस्याःपरमं
जगामेतिपृथिवींगछतीतिवायदादित्यरश्मयोहरंतीतिवातस्याऽएषापराभ
वति॥२८॥ देवींवाचमजनयंतदेवास्तांविश्वरूपाःपशवोवदंति॥ सानोमंद्रेषमू
र्जंदुहानाधेनुर्वागस्मानुपसुष्टुतैतु॥ देवींवाचमजनयंतदेवास्तांसर्वरूपाःपश

राम॰
५६

वोवदंतित्यनुक्त्वाचश्वात्युक्त्वाचश्वसानोमदनान्नंचरसंचदुहानाधेनुर्वागस्मा
नुपैतुसुष्टुतानुमतीराकेतिदेवपत्न्याविति नैरुक्ताः पौर्णमास्याविति याज्ञिका
यापूर्वापौर्णमासीसानुमतिर्योत्तरासाराकेतिविज्ञायतेनुमतिरनुमननात्तस्याः
एषाभवति॥२९॥अन्विदनुमतेत्वंमन्यासैशंचनस्कृधि॥क्रत्वेदक्षायनोहिनुप्रणः
आयूंषितारिषः॥अनुमन्यस्वानुमतेत्वंसुखंचनःकुर्वन्नंचनोपत्यायधेहिप्रव
र्द्धयस्वनः आयूराकारातेर्दानकर्मणस्तस्याएषाभवति॥३०॥राकामहंसुहवांसुष्टुती
हुवेशृणोतुनःसुभगाबोधतुत्मना॥सीव्यत्वपःसूच्याच्छिद्यमानयाददातुवीरंश

नि·उ·५ तदायमुक्थ्यं॥ राकामहं सुहवां सुष्टुती हुवे शृणोतु नः सुभगा बोधत्वात्मना
५७ सीव्यत्वपः प्रजननकर्म सूच्याच्छिद्यमानया सूची सीव्यतेर्ददातु वीरं शतप्रदमुक्थ्यं
वक्तव्यप्रशंसं सिनीवाली कुहूरिति देवपत्न्याविति नैरुक्ताः अमावास्ये इति याज्ञि
काः या पूर्वामावास्या सा सिनीवाली योत्तरा सा कुहूरिति विज्ञायते सिनीवाली सिन
नैमं भवति सिनाति भूतानि वालं पर्व वृणोतेस्तस्मिन्नन्नवती वा लिनी वा वालेने
वास्यामणुत्वाच्चंद्रमाः सेवितव्यो भवतीति वा तस्याः एषा भवति ॥ ऋ ॥ सिनीवालि राम
पृथुष्टुके या देवानामसि स्वसा॥ जुषस्व हव्यमाहुतं प्रजां देवि दिदिड्ढि नः॥ सिनीवा ५७

लिपृथुजघनेस्तुकस्त्यायतेःसंघातःपृथुकेशस्तुकेपृथुष्टुकेवायात्वंदेवानामसिस्व
सास्वसासुअसास्वेषुसीदतीतिवाजुषस्वहव्यमदनंप्रजांचदेविदिशानःकुहूर्गूहतेः
क्वाभूदितिवाक्वसतीहूयतइतिवाक्वाहुतंहविर्जुहोतीतिवातस्याएषाभवति॥३२॥
कुहूमहंसुवृतंविद्मनापसमस्मिन्यज्ञेसुहवांजोहवीमि॥सानोददातुश्रवणंपितॄणांत
स्यैतेदेविहविहविषाविधेम॥कुहूमहंसुकृतंविदितकर्माणमस्मिन्यज्ञेसुह्वानामा
ह्वयेसानोददातुश्रवणंपितॄणांपित्र्यंधनमितिवापित्र्यंयशइतिवातस्यैतेदेविहवि
षाविधेमेतिव्याख्यातंयमीव्याख्यातातस्याःएषाभवति॥३३॥अन्यमूषुत्वंयम्य

नि·उ·५
५८

न्यउत्वांपरिष्वजातेलिबुजेववृक्षं॥तस्यवात्वंमनइछासवातवाधोकृणुष्वसंवि
दंसुभद्रां॥अन्यमेवहित्वंयम्यन्यस्त्वांपरिष्वंक्ष्यतेलिबुजेववृक्षंतस्यवात्वंमनइछ
सवातवाधानेनकुरुष्वसंविदंसुभद्रांकल्याणभद्रांयमीयमंचकमेतांप्रत्याचच
क्षइत्याख्यानं॥३४॥उर्वशीव्याख्यातातस्याऽएषाभवति॥३५॥विद्युंनयापतं
तीदविद्योद्भरंतीमेअप्याकाम्यानि॥जनिष्टोअपोनर्यःसुजातःप्रोर्वशीतिरतदी
र्घमायुः॥विद्युदिवयापतंत्यद्योततहरंतीमेअप्याकाम्यानुदकान्यंतरिक्षलोकस्य
यदानूनमयंजायेतांऽद्भ्योध्यपइतिनर्योमनुष्योनृभ्योहितोनरापत्यमितिवासुजा

राम·
५८

न्युर

तःसुजातनरोर्योर्वशीप्रवर्द्धयतेदीर्घमायुःपृथिवीव्याख्यातातस्याएषाभवति ॥ ३६ ॥
बळित्थापर्वतानांखिद्रंबिभर्षिपृथिवि ॥ प्रयाभूमिंप्रवत्वतिमन्हाजिनोषिमहिनि ॥
सत्यंत्वंपर्वतानांमेघानांखेदनंछेदनंभेदनंबलममुत्रधारयसिपृथिविप्रजिन्वसि
याभूमिंप्रवणवतिमहत्वेनमहतीसुदकवतीतिवैंद्राणींद्रस्यपत्नीतस्याएषाभवति ॥
३७ ॥ इंद्राणीमासुनारिषुसुभगामहमश्रवं ॥ नह्यस्याअपरंचनजरसामरतेपति
र्विश्वस्मादिंद्रउत्तरः ॥ इंद्राणीमासुनारिषुसुभगामहमश्रणवंनह्यस्याऽअपरामपि
समांजरसांम्रियतेपतिःसर्वस्माद्यःइंद्रऽउत्तरस्तमेतद्ब्रूमस्तस्याऽएषापराभवति ॥ ३८ ॥

६०

नि·उ·५ नाहमिंद्राणि रारणस्सख्युर्वृषाकपेर्ऋते॥ यस्येदमप्यं हविः प्रियं देवेषु गच्छति विश्व
५९ स्मादिंद्र उत्तरः॥ नाहमिंद्राणि रमे सख्युर्वृषाकपेर्ऋते यस्येदमप्यं हविरप्सुशृत
गौ मद्भिः संस्कृतमिति वा प्रियं देवेषु निर्यच्छति सर्वस्मादिंद्रः इंद्रः उत्तरस्तमेतद्ब्रूमो गौ
री रोचते ज्वलतिकर्मणोऽयमपीतरो गौरो वर्णः एतस्मादेव प्रशस्यो भवति तस्याः
एषा भवति॥३९॥ गौरीर्मिमाय सलिलानि तक्षत्येकपदी द्विपदी सा चतुष्पदी॥ अ
ष्टापदी नवपदी बभूवुषी सहस्राक्षरा परमे व्योमन्॥ गौरी निर्मिमाय सलिला गम०
नि तक्षती कुर्वत्येकपदी मध्यमेन द्विपदी मध्यमेन चादित्येन च चतुष्पदी दिग्भिरष्टा ५९

पदीदिग्भिश्चावांतरदिग्भिश्चनवपदीदिग्भिश्चावांतरदिग्भिश्चादित्येनचसहस्रा
क्षराबहूदकापरमेव्यवनेतस्याः एषापराभवति॥ ४०॥ तस्याः समुद्राः अधिविक्ष
रंतितेनजीवंतिप्रदिशश्चतस्रः॥ ततःक्षरत्यक्षरंतद्विश्वमुपजीवति॥ तस्याः समुद्राः
अधिविक्षरंतिवर्षंतिमेघास्तेनजीवंतिदिगाश्रयाणिभूतानिततःक्षरत्यक्षरमुद
कंतत्सर्वाणिभूतान्युपजीवंतिगोर्व्याख्यातातस्याः एषाभवति॥ ४१॥ गोरमीमेद
नुवत्संमिषंतं॥ ऋ०क॰ गोरन्वमीमेद्वत्संनिमिषंतमनिमिषंतमादित्यमितिवाम्
र्धानमस्याभिहिंकुरोन्मननायसृक्वाणंसरपंघर्ममहरपामभिवावशानामिमा
मूर्धानंहिंकृणोन्मातवाउ॥ सृक्वाणंघर्ममभिवावशानामिमातिमायुंपयतेपयोभिः॥

वँसावितासा
सुहस्तोगोधुगुतदोहधेनाँ ।। श्रेष्ठंसवंसाविषन्नोभीद्धोघर्मस्तदुषुप्रवोचँ ।।
तिमायुंप्रप्यायतेपयोभिर्मायुमिवादित्यमितिवावामेषामाध्यमिकाघर्मधुगिति
याज्ञिकाधेनुर्धयतेर्वाधिनोर्वातस्याःएषाभवति।।४२।।उपह्वयेसुदुघांधेनुमे
तां।।ऋक्।।उपह्वयेसुदोहनांधेनुमेतांकल्याणहस्तोंगोधुगपिचदोग्ध्येनांश्रे
ष्ठंसवंसवितासुनोतुनःइसैषहिश्रेष्ठःसर्वेषांसवानांयदुदकंयद्वापयोयजु
ष्मदभीद्धोघर्मस्तंसुप्रब्रवीमिवागेषामाध्यमिकाघर्मधुगितियाज्ञिकाःअघ्न्या
हंतव्याभवत्यघघ्नीतिवातस्याःएषाभवति।।४३।।सूयवसाद्भगवतीहिभूयाः।।
ऋक्।।सूयवसादिनीभगवतीहिभवाथेदानींवयंभगवंतःस्यामाद्धितृणमघ्न्ये
अथोवयंभगवंतस्याम ।। अद्धितृणमघ्न्येविश्वदानींपिबशुद्धमुदक माचरंती ।।

वत्साभिच्छं तीमनसाभ्यागात्सादुहामाश्विभ्यांपयो अघ्न्येयंसावर्धतांमहतेसौभगाय॥

सर्वदापिबच्च शुद्धमुदकमाचरंतीतस्याः एषापराभवति॥ ४४॥ हिंकृण्वतीवसुप
त्नीवसूनां॥ ऋक्॥ इतिसानिगदव्याख्याता पथ्या स्वस्तिः पंथाः अंतरिक्षंतन्निवा
सात्तस्याः एषाभवति॥ ४५॥ स्वस्तिरिद्धिप्रपथेश्रेष्ठारेक्णस्वत्यभियावाममेति॥
सानोअमासोअरणेनिपातुस्वावेशाभवतुदेवगोपा॥ स्वस्तिरेवहिप्रपथेश्रे
ष्ठारेक्णस्वतीधनवत्यभ्येतियावसूनिवननीयानि सानोमा गृहे सानिरमणेसा
निर्गमनेपातुस्वावेशाभवतुदेवीगोप्त्रीदेवान्गोपायत्वितिदेवाः एनांगोपायंत्वि
तिवोषाव्याख्यातातस्याः एषाभवति॥ ४६॥ अपोषाअनसः सरत्॥ ऋक्॥ अ

सांपिष्टादि हाबिभ्युषी॥ नियत्सीं शिश्नथद्वृशा॥

पासरदुषा अनसः संपिष्टान्मेघाद्बिभ्युष्यनो वायुरनितेरपिवोपमार्थे स्यादनसः इव
शकटादिवानः शकटमानद्धमस्मिंश्चीवरमनितेर्वा स्याज्जीवनकर्मणः उपजीवंत्ये
नम्मेघोप्यनः एतस्मादेव यन्निरशिश्नथद्वृषा वर्षिता मध्यमस्तस्याः एषापरा भव
ति ॥ ४७ ॥ एतदस्याः अनः शये सुसंपिष्टं विपाश्या ॥ ससार सीं परावतः ॥ एतदस्याः
अनः आशेते सुसंपिष्टमितरदिव विपाशि विमुक्तपाशि ससारोषाः परावतः प्रेरि
तवतः परागताद्वैक्काम्याख्याता तस्याः एषा भवति ॥ ४८ ॥ अभि नः इळा यूथस्य मा
तास्मन्नदीभिरुर्वशी वा गृणातु ॥ उर्वशी वा बृहद्दिवा गृणानाभ्यूर्ण्वाना प्रभृथस्यायोः ॥

श्रवस्युमा

सिषक्तु नः ऊर्जव्यस्य पुष्टेः ॥ अभिगृणातु नः इळा यूथस्य माता सर्वस्य माता स्मदभि
नदीभिरुर्वशी वा गृणातु र्वशी वा बृहद्दिवा मह द्दिवा गृणानो ऽभ्यूर्ण्वाना प्रभृथस्य प्रभृ
तस्यायोरयनस्य मनुष्यस्य ज्योतिषो वोदकस्य वा सेवतान्नो न्नस्य पुष्टे रोदसी रुद्र
स्य पत्नी तस्याः एषा भवति ॥४९॥ रथं नु मारुतं वयं ॥ ऋक् ॥ रथं क्षिप्रं मारुतं मेघं
वयं श्रवणीयमाह्वयामहेः आ यस्मिन्तस्थौ सुरमणीयान्युदकानि बिभ्रती सचाम
रुद्भिः सह रोदसी रोदसी ॥५०॥ श्येनो मारब्धा तंः आदाय स्वादिष्ठया सोमं मन्यते य
त्वा देवनवो नवः परं मृत्सो त्वेषमित्याप्रवो महः उदुज्योतिं धीता ददातु सोमस्य राज्ञो

नि·उ·५ थातोमध्यस्थाना देवगणा। आविद्युन्मद्भिरारुद्रासो। विश्वीशामा। विरूपासः उदीरता
६२ मवरं गिरसो नः सूर्यस्येव वक्षथे व्यम थातोमध्यस्थानास्त्रियो दक्षस्य वाय स्मे त्वंकि
मिछंती पावकानो महोऽर्णो यद्वाग्वदंती देवीं वाचमन्विदनुमते राकामहं सिनीवा
लि कुहूमहमन्यमूषूर्वशी। विद्युन्न बळित्थं इंद्राणी नाहमिंद्राणि गौरीर्मिमाय तस्याः
समुद्रा गौरमीमेदुप ह्वये सुयवसाद्धिं ऋपवती स्वस्तिरिद्ध्यपोषा एतदस्या अभिनः
इळारथंतु पंचाशत्॥ इति निरुक्ते उत्तरषट्के पंचमोऽध्यायः॥ हरिःॐम॥ अथातो राम·
द्युस्थानादेवतास्तासामश्विनौ प्रथमागामिनौ भवतोऽश्विनौ यद्व्यश्नुवाते सर्वं रसेना ६२

न्योज्योतिषान्योश्वैरश्विनावित्यौर्णवाभः स्तत्कावश्विनौ द्यावापृथिव्यावित्येकेहोरात्रा
वित्येके सूर्याचंद्रमसावित्येके राजानौ पुण्यकृतावित्यैतिहासिकास्तयोःकालः ऊर्ध्व
र्ध३ म[illegible]रात्रात्प्रकाशीभावस्यानुविष्टंभमनुतमोभागोहिमध्यमोज्योतिर्भागः आदित्य
स्तयोरेषाभवति॥ २॥ वसातिषुस्मचरथोसितौपेत्वाविव॥ कदेदमश्विनायुवमभि
देवाँ अगच्छतं॥ इतिसानिगदव्याख्यातावसातिषुस्म चरथौ वसातयोरातयोर्व
संतेस्माऽइतरेतरातयोर्वक्तेर्वावहतेर्वासितौपेत्वाविव॥ अपेतावृत्रहपांसुरात
१ योः समानकालयोः समानकर्मणोः संस्कृतप्राययोरसंस्तवेनैषोऽर्द्धर्चो भवतिवासा

१ स्तयोः

६४

नि·उ·६
६३

स्यो न्यः उन्मत उषःपुत्रस्तवान्यः इति तयोरेषापरा भवति॥२॥ इहेहजातासमवाव
शीतां॥ ऋक्॥ इहन्वेहन्वजातो संस्तूयेते पापेनालिप्यमानया तन्वा नामभिश्च स्वैः जि
ष्णुर्वामन्यः सुमहतो बलस्यैरयिता मध्यमो दिवो न्यः सुभगः पुत्रः ऊह्यत आदित्य
स्तयोरेषापरा भवति॥३॥ प्रातर्युजा विबोधयाश्विनावेहगच्छतां॥ अस्य सोमस्य
पीतये॥ प्रातर्योगिनौ विबोधयाश्विनाविहागच्छतामिस्य सोमस्य पानाय तयोरे
षापरा भवति॥४॥ प्रातर्यजध्वमश्विना हिनोत न सायमस्ति देवया अजुष्टं॥ उता
न्यो अस्मद्यजते विचावः पूर्वः पूर्वो यजमानो वनीयान्॥ प्रातर्यजध्वमश्विनौ

राम·
६३

प्रहिणुतनसायमस्तिदेवेभ्याऽअजुष्टमेतदप्यन्योस्म द्युजतेविन्चावः पूर्वः पूर्वोयज
मानोवनीयान्वनयितृतमस्तयोःकालःसूर्योदयपर्यंतस्तस्मिन्नन्यादेवताओप्यं
तउषावष्टेःक्रांतिकर्मणउछतेरितरामाध्यमिकातस्याऽएषाभवति॥५॥उषस्त
च्चित्रमाभरास्मभ्यंवाजिनीवति॥येनतोकंचतनयंचधामहे॥उषस्तच्चित्रंचाय
नीयंमंहनीयंधनमाहरास्मभ्यमन्नवतियेनपुत्रांश्चपौत्रांश्चदधीमहितस्याऽएषा
पराभवति॥६॥एताऽउत्याऽउषसःकेतुमक्रतपूर्वेऽअर्द्धेरजसोभानुमंजते॥
निष्कृण्वानाऽआयुधानीवधृष्णवःप्रतिगावोरुषीर्यंतिमातरः॥एतास्ताऽउ

६५

हिरण्यवर्णं सुवृतं सुचक्रं॰ आरोह सूर्ये अमृतस्य लो
कं स्योनं पत्ये वहतुं कृणुष्व॰

नि॰ उ॰ ६ षसः केतुमकृषत प्रज्ञानमेकस्याः एवंपूजनार्थेनकुवचनं स्यात्सूर्वैर्ऽंतरिक्षलोक
६४ स्य समंजते भानुना॥ निष्कृण्वानाः आयुधानीव धृष्णवः॥ निरित्येष समित्येतस्य स्था
३ ष्ठ नः एमीदेषां निँ[illegible]तं जारिणीवेत्यपि निगमो भवति प्रतियंति गावो गमनादरुषीरा
रोचनान्मातरो भासो निर्मोत्र्यः सूर्या सूर्यस्य पत्नैषैवाभिसृष्टकालतमा तस्याः एषा
भवति॥ ७॥ सुकिंशुकं शल्मलिं विश्वरूपं॥ कृ कृ॥ सुकाशनं शल्मलं सर्वरूप
मपि वोपमार्थे स्यात्सुकिंशुकमिव शल्मलिमिति किंशुकं क्रंशतेः प्रकाशयतिकर्म राम॰
णः शल्मलिः सुशरो भवति शरवान्वा रोह सूर्ये अमृतस्य लोकमुदकस्य सुखंप ६४

सुपुत्र आदु सुस्नुषे ॥ घसत इंद्र उक्षणः

त्येवहतुंकुरुष्वसविता सूर्यांप्रायछत्सोमायराज्ञेप्रजापतयेवेतिचब्राह्मणंवृषाक
पायीवृषाकपेःपत्न्यैषेवाभिसृष्टकालतमा तस्याःएषाभवति॥८॥वृषाकपायि
रेवति॥ऋक्॥वृषाकपायिरेवतिसुपुत्रेमध्यमेनसुस्नुषेमाध्यमिकयावाचास्नुषासाधु
सादिनीतिवासाधुसानिनीतिवास्वपत्यंतत्सनोतीतिवाप्राश्नातुतःइंद्रउक्षणःएता
न्माध्यमिकान्त्संस्त्यायानुक्षणःउक्षतेर्वृद्धिकर्मणःउक्षंत्युदकेनेतिवाप्रियंकुरुष्व
सुखाचयकरंहविःसुखकरंहविःसर्वस्माद्यःइंद्रःउत्तरस्तमेतद्ब्रूमःआदित्यंसर
ण्यूःसरणात्तस्याःएषाभवति॥९॥अपागूहन्नमृतांमर्त्येभ्यः॥ऋक्॥अपागूह

नि·उ·६
६५

न्नमृतांमर्त्येभ्य:कृत्वीसवर्णामददुर्विवस्व:तैप्यश्विनावभरद्यत्तदासीदजहाद्वौमिथुनौ
सरण्यूर्मध्यमंचमाध्यमिकांचवा चमितिनैरुक्तायमंचयमीचेत्यैतिहासिकास्तत्रेतिहा
समाचक्षतेत्वाष्ट्रीसरण्यूर्विवस्वतःआदित्याद्यमौमिथुनौजनयांचकारसासवर्णाम
न्यांप्रतिनिधायाश्वंरूपंकृत्वाप्रदुद्रावसविवस्वानादित्यआश्वमेवरूपंकृत्वातामनु
सृत्यसंबभूवततोश्विनौजज्ञातेसवर्णायांमनुस्तदभिवादिन्येषर्ग्भवति॥१०॥त्व
ष्टादुहित्रेवहतुंकृणोती॥ ऋ०क०॥ त्वष्टादुहितुर्वहनंकरोतीतीदंविश्वंभुवनंसमेती।
मानिचसर्वाणिभूतान्यभिसमागच्छंतियमस्यमातापर्युह्यमानामहतोजाया।

विवस्वतोननाशोरात्रिरादित्यस्योदितोदयंतद्धीयते॥११॥ सविताव्याख्यातस्तस्यका
लोयदाद्यौरपहततमस्काकीर्णरश्मिर्भवतितितस्येषाभवति॥१२॥ विश्वारूपाणिप्रति
मुंचतेकविः॥ऋक॥ सर्वाणिप्रज्ञानानिप्रतिमुंचतेमेधावीकविःक्रांतदर्शनोभवति
च४ कवतेर्वाप्रसुवतिभद्रंद्विपाद्भ्यश्चतुष्पाद्भ्यश्चव्यचिख्यपन्नाकंसविता वरणीयः प्रया
णमनूषसोविराजत्यधोरामःसावित्रःइतिपशुसमाम्नायेविज्ञायतेकस्मात्सामान्या
दित्यधस्तात्तद्वेलायांतमोभवत्येतस्मात्सामान्यादधस्ताद्रामोधस्तात्कृष्णःकस्मात्सा
मान्यादित्यग्निंचित्वानरामामुपेयाद्रामारमणायोपेयतेनधर्मायकृष्णजातीयैतस्मा

नि·उ·६ त्सामान्यात्कृकवाकुःसावित्रः इतिपशुसमाम्नायेविज्ञायतेकस्मात्सामान्यादितिकालानु
